83 *c* तन्वीरार्द्रा J V
85–91 order as in J.
85 *c* to 88 d Acc. for Nom. J V D M
90 *a* °र्वेद्विप्रयोग: J V M
90 *c* °तुमतः J V
94 *b* अन्वास्यैनां J V M
95 *c* विद्युद्गर्भे J V
97 *b* समाव्य J V D M
98 *d* पूर्वाशास्यं J V D
101 *a* दृष्टिपातं J V D M
106 *a* °न्नात्मना नाव° J V D
107 *b* मासानन्यान् J V D

Readings which have to be adopted on account of grammatical or geographical reasons.

8 *b* आभ्यसत्य: against J V
15 *b* धनुष्खडं ,, J S D M
26 *a* नगनदी against all
62 *c* वातैः सजलपृषतैः कल्पवृक्षां-
शुकानि against J S.
76 *c* शिञ्ज° V ,, S J
99 *d* संकल्पैस्ते against J S D M

Readings common to J and D or J, D and M and different from S.

(The readings are of J and D. When M agrees M is added after the reading.)

1 *a* स्वाधिकारात् प्रमत्तः M
3 *c* कौतुका° ,,
6 *a* पुष्कला°
9 read as 12 M
10 *b* सगन्धः M
13 *a* मत्तः
16 व्रज लघुगतिः M
27 *d* वञ्चितः स्याः
34 *b* अत्येति M
37 *c* सौदामन्याः ,,
d मा च भूः
41 *d* विवृतजघनां M
46 *c* नूनमावर्ज्य ,,
48 *a* अथ च्छायया ,,

49 *b* बन्धुस्नेहात्
d त्वमसि भविता M
51 *a* पश्चार्धलम्बी M
54 *ab* ये संरम्भोत्पतनरभसा: ...मुक्ता-
ध्वानं सपदि शरभा
लङ्घयेयुर्भवन्तम्। M
c वृष्टिपाता° M
55 *d* कलिपष्यन्ते ,,
56 *c* सुरव
58 *d* प्रतिदिनमिव M
61 *d* वलयकुलिशो°
62 *d* नानाचेष्टैर्जलद ललितै: M
64 *b* सुरवा: स्निग्धपर्जन्यघोषम्
65 *a* अलके *b* लोध्र° M
67 *a* °भुजोच्छ्वासितालिङ्गितानां M
69 *a* बिम्बाधराणां M *d* विफलप्रेरणा ,,
79 *a* शिखरिदशना° M
80 *cd* गाढोत्कण्ठा, बाला, जाता पद्मिनीवा°
85 *b* तां मयोद्दिष्टनीयां M
86 *d* विरहमहतीमश्रु° M
88 *c* सलिलगुरुभि: M
90 *d* °शयना सद्म°
93 *a* वामश्चास्या: M
98 *a* आत्मनश्चो° M; *b* ब्रूया एवं
101 *a* °प्रेक्षणे *d*; चण्डि M
105 *a* संक्षिप्येत M °मा त्रियामा M
106 *b* नितरां M
108 *a* त्वमसि
110 *b* प्रत्यादेशात् M

Readings of V not supported by J S D M.

(In two cases where D supports V, D is marked after the reading.)

2 *c* प्रशम°
6 *d* वन्ध्या
12 *a* मवन्ध्यं
14 *d* हस्तावलेहान्
15 *a* रत्नच्छाय°
16 *d* प्रवलय गति
20 *b* जम्बूषण्ड°
22 *c* सनयनजलै:
23 *c* फलपारिणतिश्याम°
29 *a* °लां, धुं *b* च्छायां *c* °न्तीं
32 *a* °धूमै: *d* रात्रीं
33 *a* दृश्यमान: *b* चण्डेश्वरस्य D
35 *d* आमोक्ष्यन्ति D
40 *c* तस्मात्तस्या:
42 *a* °संपर्कपुण्य:
44 *b* पुत्रप्रीत्या कुवलयपदप्रापि
45 *a* (शरवण)भुवं
48 *d* अभ्यषिञ्चत्
46 *c* सौम्य
51 *d* °नोपनत°
52 *d* शोभां रम्यां
56 *c* कन्दरासु
57 *c* दिशमभि°
58 *d* प्रतिनिश°
59 *c* लीलामद्रै:
61 *a* जनितसलिलोद्गारमन्त:प्रवेशात्
62 *d* °शे: पर्वतं तं
63 *a* °द्दुगूलां

67 *c* °दैश्चोतितश्चन्द्रपादैः
68 *d* °निपणं
69 *b* त्रासः कामाद°
70 *b* वल्कसच्छेद्यैः
74 *a* यस्यास्तीरे
76 *b* मूले नद्धा
77 *a* °ईक्षणीयं
79 *a* °धरौष्ठा 81 *b* °धरौष्ठं
b °णप्रेक्षणी
81 *d* त्वदुपसरण°
82 *d* निभृते
84 *a* °सप्रस्तुतस्या°
85 *b* या मयोन्मोचनीया
d °विषमादेक°
86 *a* संनिकाणैक°
86, 87 *cd* exchanged
86 *d* विरहशयनस्थ°

90 *a* तथा खेदयेत्°
92 *d* °आकुल°
94 *a* दयितालब्धनिद्रा यदि
95 *c* निहितनयना
d धीर°
97 *c* सौम्य, *a* also 110
98 *a* आयुष्मान्
99 *d* सकल्पैस्ते
100 *c* अगम्यः
101 *a* हरिण°; *b* गण्डच्छाया°
102 *c* °लिप्यते
103 *b* सति स्व° *d* °ष्वस्तु°
104 *d* पूर्वस्पृष्टं
105 *a* सांक्षिप्येरन्
108 *b* सस्वनं
109 *c* विरहहा°
110 *b* तर्कयामि

Readings of D and M not supported by J S or V.
(V.'s support in a few cases is shown by the letter V.)

13 *d* उपभुज्य
16 *c* °सुरभि क्षेत्रं V
21 *c* जग्ध्वा
29 *a* सलिलासावती°
32 *c* अध्वखेद नयेथाः; D पश्यन् लक्ष्मीं;
M. लक्ष्मीं पश्यन्
47 *b* °कृष्णशार° V
51 *c* °च्छाययासौ
55 *b* उपचितबलिं
56 *b* ससक्ताभिः
60 *a* हित्वा तस्मिन्
d मणितटारो°

62 *c* अंशुकानीव वातैः
65 *b* आनने श्रीः
66 *b* °रचितानि
73 *d* नाध्यारयन्ति
76 *c* शिञ्जावलय°
86 *c* क्षण इव V
87 *c* कथमदनपेत् V
87 *c* यत्संभोगः
98 *b* भूया एवं
99 *b* °णास्र (M श्रु) सुतं
101 °हरिणीक्षणे
106 *a* न त्वा°
107 *c* विरहगणितं

Unsupported readings of M.

31 *d* शिप्रा°
56 *c* निह्लादस्ते
68 *c* त्वादृशा जालमार्गैः
80 *a* जानीथाः
84 *c* संभोगं वा
90 *d* °शयनां सौध°
91 *a* °पेशलं
96 *b* °निहितैरागतं
97 *a* सुहृदुपगत°
99 *a* प्रतनु *b* णाश्रुद्रुत°
109 *c* ते त्वसो°
111 जलद विचर

Abbreviations.

K. = Kālidāsa.

N. = Nandargikar.

Ku. (कुमार०), Me. (मेघ०), Ragbu., Vi., Mal. and S'. or S'āk., } = K.'s works.

J., S., V., D., M. = The five versions of Me.

ZDMG = Journal of the German Oriental Society.

JRAS = Journal of the Royal Asiatic Society of London.

JBRAS = Journal of the Bombay Branch of the Royal Asiatic Society.

BEFEO = Bulletin of the French School of Oriental Studies, Hanoi.

ABI = Annals of the Bhandarkar Institute.

IH = Indian Historical Quarterly.

B. S. S. = Bombay Sanskrit Series.

CONTENTS

[*N. B.* The route of the cloud is indicated by the dotted line]

ERRATA

Page	Line	Correct	Page	Line	Correct
xii	30	Geographical Data	41	23-24	be, relieve your fatigue in
xiv	24	1895	42	2	love, and then
xv	17	Latter half	44	16	See notes for Tr.
xxii	6	K.'s plays	46	26	hide, rising in a
xxxiv	4	St 26 and 62	53	after l. 11	add: °कैपुण्य: V
2	13	जनकतनया°	,,	25	नीचैर्वास्यति
5	23	D. for J.	61	13	Add: (c) सोम्य V.
7	6	V. J. M.	68	24	निर्द्वादस्ते
14	9	Add. (c) °थानस्थिर° V.	81	16	1 तदेन्दुद्युतीनां
17	1	कैलासाद्रि°	2	26	Add. (c) विद्युद्दीप्रान्° D.
25	15	द्रुत°	100	5	,, (a) शिखादाम V.
28	25	सारं गायन्ति &c. see Notes	102	18	आ लम्बते
30	12	°णतिश्याम°	,,	20	नयनसलिलस्य
34	26	गण्ड–	103	17	संनिवृत्तं
37	24	Add: °लासावती° M.	117	17	Add. M; ते चण्डि J. D. M.
40	2	पट्पद°	121	8	संक्षिप्येरन्
,,	6	(a) पट्ट मद° J. V. M. (d) शिप्रा॰ M.	,,	24	कर्तरि ल्युप्र.
,,	26	पट्ट स्फुटं	139	20	like Su. (सारो॰)
			[illegible]	10	the Naganadī

स्थिरदेवव्याख्यासनाथं कालिदासीयं

मेघदूतम्

यदर्केन्दुहुताशादिप्रद्योतस्याप्यगोचरे ।
स्थितं प्रकाशयत्यर्थं ज्योतिस्तद्वाङ्मयं नमः ॥ १ ॥
कवीन्द्रानभिवन्द्याथ स्थिरदेवेन रच्यते ।
टीकेयं मेघदूतस्य तद्विदां बोधहेतवे ॥ २ ॥
रसभारभरोद्भिन्नां भारतीं भरताद्दते ।
श्रीमतः कालिदासस्य विज्ञातुं कः क्षमः पुमान् ॥ ३ ॥
तस्य प्रसन्नगम्भीरात्प्रबन्धान्नौरिवाम्बुधेः ।
उद्धर्तुं स्तोकमप्यर्थं व्याख्या नः प्रभविष्यति ॥ ४ ॥

अत्र काव्यं किल रसवदुपादेयम् । रसाः शृङ्गारादयः । तेषु शृङ्गारः प्रवरः । तद्भेदौ संभोगविप्रलम्भौ । तयोरपि विप्रलम्भः सुभगः । तस्य पूर्वानुरागमानकरुणप्रवासाख्याः प्रकाराः । तेषामत्र प्रवासाभिधानो भेदः प्रबन्धोपयोगित्वादभिधित्सितः । स च सरसनायकमन्तेरण वक्तुं न शक्यते । नायकाश्च धीरोदात्तदैवा एव । तेषामपि पुण्यजनाः शृङ्गारिणः । ततः कविर्यक्षं कथानायकत्वेन उपात्तवान् । कालिदासश्च स्वयं शृङ्गारी । तदसौ शृङ्गारसप्रधानं क्रीडाकाव्यमेतदुपनिबद्धवान् । ननु गिरिनगरादिवर्णव्यतिरेकेण कथमस्य महाकाव्यत्वम् । अत्रोच्यते । विदिशाविशालालकादिनगरीवर्णनम् । स्वःसिन्धुनिर्विन्ध्यासिप्राप्रभृतिसमुद्रगामिनीनिगदनोपचारात्तत्प्रतिपादनम्[1] । गिरिशैलादिशैलश्लाघा । 'हस्ते लीलाकमल'मित्यनेन घनसमयपुरःसराणामृतूनां निरूपणम् । 'यत्र स्त्रीणा'मेतेन चन्द्रोदयसमर्थनम् । 'अप्यन्यस्मिञ्जलधर' तथा 'तां कस्यांचिद्भवनवलभा'वित्याभ्यां भानूदयनिवेदनम् । 'विश्रान्तः सन्' तथा 'तत्रागार'मित्येताभ्यां उद्यानस्तुतिनिगदनम् । 'भर्तुः कण्ठ-

1. Ms. reads °गामिनदांनिगदोनो°. Here and in the next passage noted, I have adopted the readings of the सारोद्धारिणी which reproduces this introduction.

च्छवि'रित्यनेन जलकेलिकथनम्। [1]'यस्यां' 'यद्वा'(?) इति मधुपानाभिधानम्। 'संभोगान्तो' 'नीता रात्रि'रिति सुरतस्य वर्णनम्। 'जालोद्गीर्णै'स्तथा 'दिङ्नागाना'मित्याभ्यां हिताहितप्राप्तिपरिहारोपदेशकाभ्यां मन्त्रचिन्ता। दूतो मेघ एव। 'मार्गं ताव'दिति प्रयाणकथनम्। 'ये त्वा' इत्यनेन युद्धप्रबोधनम्। 'शापान्त' इति नायकाभ्युदयभणनम्। विप्रलम्भः कथयैव समर्थितः। 'तां चावश्य'मित्यनेन पत्नीपदेन पत्युद्देशः। 'यः संयोग' इति विवाहसूचनम्। 'तत्र स्कन्द'मिति कुमारकथनम्। एवमेतैर्नगनगरीसागरर्तुचन्द्रार्कोदयोद्यानजलकेलिमधुपानसुरतमन्त्रदूतप्रयाणाजिनायकाभ्युदयविवाह-विप्रलम्भकुमारवर्णनैर्विस्पष्टैरष्टादशभिरमीभिर्महाकाव्यलक्षणैरुपलक्षितत्वादस्य

tion it entailed from his wife, having put an end to his powers, he made his home in the hermit-dwellings

1. Ms. omits this necessary portion from यस्यां to वर्णनम्. The portion उद्यान ... जलकेलिकथनं is supplied at the bottom of the page in the same but smaller hand.

of Rāmagiri, where the shady trees were lovely and the water holy, because the daughter of Janaka, Sītā, had bathed there.]

कश्चित्कान्तेत्यादि । कश्चिदाश्चर्यकारिमहिमा महनीयसंपत् । अस्तंगमितमहिमेतिवचनादनिश्चितमहिमा वा । यतः प्रकृतानुपयोगित्वादाद्ये चास्मिन् केलिकाव्ये पुराणकथानुवादः संदेहमावहतीति कविर्यादृष्टिकमपि नामधेयमनभिधाय सामान्येन निर्दिदेश । यः कोपि यक्षः पुण्यजनो वसतिं चक्रे स्थितिं चकार । क । रामगिर्याश्रमेषु । रामगिरिर्दण्डकान्तः प्रसिद्धः तस्याश्रमेषु मुनिनिवासोचितस्थानेषु । विरहेण रणरणककलितान्तःकरणैकतया एकत्रावस्थानासंभवादाश्रमेष्विति बहुवचनम् । किंभूतेषु । जनकतनयास्नानपुण्योदकेषु विदेहदुहितास्नावनपावनपानीयेषु । अत्र भर्तू राघवस्य संनिधाने सीतायाः श्लाघा महासतीत्वप्रतिपादनार्थम् । तत्स्पृष्टानां च देशानां तीर्थत्वप्रथनार्थम् । तथा च । यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते इति (कुमार० ६.५६) । अथवा लिङ्गान्तरसंभवेपि शृंगारत्वादत्र स्त्रिया निर्देशः । कीदृशेषु । स्निग्धच्छायातरुषु स्निग्धा अरूक्षेति लक्षणं यासामि(यस्या इ-)त्यर्थः । या आतपप्रत्यनीका तया उपलक्षितास्तरवः पादपा येषु ते तथोक्तास्तेषु । अथवा स्निग्धाः सरसपल्लवोल्लासित्वेनारूक्षाः छायातरवो निश्चलाः छायापादपविशेषास्तैरुपलक्षिताः । अत्राश्रमाणां विशेषणद्वयमपि सुखस्थितिकथनार्थम् । केन कारणेन पुनरसौ यक्षेश्वरः पुरीं परिहृत्यात्र निवासमकार्षीदित्याह । शापेन कोपवशात् । कस्य । भर्तुः स्वामिनः । किंभूतेन । वर्षभोग्येन । वर्षेण भुज्यते वर्षभोग्यः । संवत्सरपरिसमाप्यः । अथवा वर्षभोग्यः । कालाध्वनोरत्यन्तसंयोग इति द्वितीयासमासः । वर्षं सकलर्तुसमुदायरूपम् । उद्दीपनविभावभूयस्त्वेन वियोगिहृदयदुःखोत्पादनसमर्थमिति तत्पदोपादानम् । पुनः किंभूतेन । कान्ताविरहगुरुणा । वल्लभाविप्रलम्भदुर्वहेण । कुतः स प्रभुणा शप्तः । यतः स्वाधिकारे प्रमत्तो निजनियोगाप्रयत्नपरः । तस्य हि अलकाधिपतिविधीयमानेश्वरसपर्योपकरणनवनालिनानयनमधिकारः । तत्र कदाचिदसौ प्रेयसीप्रेमवशात्प्रत्यूषे गन्तुमनीशो निशायामेव कमलमुकुलान्यानिनाय । तैश्च धनाधिपतिः पार्वतीपतिं पूजयन्नन्यतमकमलकलिकामध्यबद्धमधुकरेण करे

दृष्टः। ततस्तमसौ शशाप। पाप त्वं मुहूर्तमपि निजजायाविरहमसहमानो ऽपराद्धवानसीहातस्तवानयैव वर्षं वियोगोऽस्त्विति। तेन अस्तंगमितमहिमा प्रतिहतमाहात्म्यः। अस्य दिव्यानुभावसंभवन्ती दूरदर्शनश्रवणादिशक्तिः प्रतिहता तावत्। एवममुना जीमूतो दौत्ये प्रवर्तितः। ननु स्थानान्तरेषु सुलभेष्वप्यत्र किल मैथिलीपतिरुषित्वा दैवाद्विप्रयुक्तोऽपि पुनः सीतया सह संयोगमगमत्। स्वयमपि प्रियासंयोगकामुकः कमनीयलक्षणधरममुमेव भूधरमध्युवास। सर्वत्र विप्रलम्भशृङ्गारः। मन्दाक्रान्ता वृत्तम्। अत्र स्वभावोक्तिरलंकृतिः। तथा च तल्लक्षणम्। नानावस्थं[2] पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा[3]॥ (दण्डी, २.८)

प्रियासंदेशप्रापकाधिगमार्थमाह।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ २॥

(c) प्रशमदिवसे V.

अबलया विप्रयुक्तः कनकवलयस्य भ्रंशेन रिक्तः प्रकोष्ठः यस्य एवंविधः स कामी तस्मिन् अद्रौ कतिचित् मासान् नीत्वा आषाढस्य प्रथमे दिवसे आश्लिष्टः सानुः येन एवंविधं, वप्रे क्रीडायां परिणतं गजमिव प्रेक्षणीयं, मेघं ददर्श।

Separated from wife, his fore-arm bare on account of his golden bracelet having fallen away, the love-lorn Yakṣa passed a few months on the mountain and then on an early day in Āṣāḍha he saw a cloud, clinging to the summit and wonderful to see like an elephant dashing his tusks in sport against the city ramparts.]

1. So ms. Obviously after दूरेष्वपि something like अत्रैव कथं वसति चक्रे is necessary to complete the objection, to which the answer is contained in नन्वित्यादि. 2. Ms. रूपं. 3. Ms. ईता.

तस्मिन्नद्रौ कतिचिदबलेत्यादि। तस्मिन्नद्रौ रामगिरौ तच्छब्दस्य पूर्वप्रक्रान्त-परामर्शित्वादत्र बहुवचनानुवृत्तिर्युक्ता कथमेकत्वेन प्रयोग इति। उच्यते। सर्व-नाम्नोऽनुसंधिवृत्तिश्छन्नस्येत्यनेन न्यायेन समासगुणीभूतस्य गिरेरेवानुवृत्तिः स्व-च्छन्देन क्रियते इत्यदोषः। स यक्षः कतिचित् कियतोऽपि। शेषान्मासान् गमय चतुर इति वचनाच्चाष्टौ। मासान् वर्षभागान् नीत्वाऽतिवाह्य अबलाविप्रयुक्तः प्रियाविरहितः स एव कामी भूरिकामः। अतिशायने मत्वर्थीयः। कामित्वा-दलंकारित्वम्। नाकामी मण्डनप्रियः। तत एव कृशतनुरतः कनकवलयभ्रंश-रिक्तप्रकोष्ठः। हाटककटकपातशून्यीभूतभुजाग्रः। वलयं कङ्कणम्। कलधौत-विशेषणेन तदैश्वर्याख्यापनम्। वलयाकृतेश्च गुरुत्वादचिरपतनोत्पत्तिः। तत्रासौ ददर्श दृष्टवान्। मेघं अम्बुवाहम्। कीदृशम्। आश्लिष्टसानुं आलिङ्गित-तटम्। निकटकटकवर्तिनमित्यर्थः। कदा। आषाढस्य प्रथमदिवसे शुचेः प्रवरे दिने। आदिप्रवरौ प्रथमाविति प्रवरत्वं च कृत्यादिकर्मणाम्। ततः प्रारभ्यमाणत्वाद्यस्मिन् दिने स मास एव प्रतीयते। पुनः किम्। वप्रक्रीडा-परिणतगजप्रेक्षणीयम्। वप्रस्तटः तत्र क्रीडा तटाघातलक्षणा तस्यै परिणतः तिर्यग्दन्तप्रहारो यो गजः तद्वत्प्रेक्षणीयो रमणीयस्तं कूलकेलिसिद्धम्। (अत्रो-पमा। तथा च। उभयोः समानमेकं गुणादिसिद्धं) भवेद्यथैकत्र। अर्थेन्यत्र तथा तत्साध्यत इति सोपमा ने[2]या॥ (रुद्रट, ८.४).

जलदालोकने यक्षस्याभिलषितार्थविवक्षामभिधातुमाह।

> तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
> रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
> मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
> कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥ ३॥

(a) J. D. M.; कौतुकाधान. J. केतका०...इदमत्यन्तश्लाघ्यविशेषणं न स्यादिति बोद्धव्यम्.

[राजराजस्य अनुचरः केतकानां आधानस्य हेतोः तस्य कथमपि पुरः स्थित्वा अन्तः(गतं) बाष्पं यस्य एवंविधः चिरं दध्यौ.

1. The obvious omission in the ms. is supplied in brackets. 2. Ms. शेया.

सुखिनः अपि चेतः मेघालोके अन्यथा वृत्तिः यस्य एवंविधं भवति, किं पुनः कण्ठस्य आश्लेषस्य प्रणयिनि दूरे संस्था यस्य एवंविधे जने (स्यात्)?

The servant of Kubera with an effort stood before that cause of the efflorescence of the ketaka and, his tears pent up within, he meditated for a long while. Even a man in happy circumstances has his mind perturbed at the sight of clouds; how much more so would it be of one whose beloved, ever fond of putting her arms round his neck, was far away?]

तस्य स्थित्वेत्यादि। तस्य पयोदस्य पुरोऽग्रे स्थित्वा। कीदृशस्य। केतकाधानहेतोः। केतकीकुसुमोत्पादननिदानस्य। अनेनोद्दीपनविभावत्वादवलोकनमपि कर्तुमशक्यम्। किं पुनः पुरोवस्थानमित्याह। कथमपि महता क्लेशेन। कामिनः कमनीयवस्तुविलोकनात्तदुत्कालिकाकलितचेतसः संपद्यन्त इत्युक्तम्। अन्तर्बाष्पः प्रकृतिधीरत्वादबाह्यविसृतनेत्रसलिलः। चिरं दध्यौ वधूमनुसंधाय सुचिरमचिन्तयत्। ध्यायतेः सकर्मकस्यापि कर्माविवक्षा। यथा गजवद्गच्छतीति। यदि वा स राजराजस्य कुबेरस्यानुचरः तदा चारानुकारी महानायकः। ततः स्वधैर्यध्वंसात् कतिपया[1] कालकला विलम्ब्य विममर्श स्वाभिप्रायमस्मै निवेदयामि न वेति। कुतः पुन तस्योद्गाढेयमुत्कंठा चेतस्युल्लसति। मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः। मेघा लोक्यन्ते यस्मिन् स मेघालोकः। तस्मिन् प्रावृट्काल इत्यर्थः। सुखिनोऽपि वल्लभासंभोगभाजोऽपि चेतश्चित्तं भवति संपद्यते। कीदृग्। अन्यथावृत्ति प्रच्युतप्राच्यस्थिति। प्रकृत्यवस्थातोऽन्यथा वर्तत इत्यर्थः। असुमेवार्थं व्यतिकरेणापि कथयति। कण्ठाश्लेषप्रणयिनि। कण्ठाश्लेष आलिङ्गनं तत्र प्रणयः प्रीतिर्यस्य तस्मिन् परिरम्भाभिलाषिणि जने प्रणयिनीलक्षणे किं पुनर्दूरसंस्थे व्यवधानभाजिनि जायत इत्यर्थः। अर्थान्तरन्यासोऽलंकारः। ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥ (दण्डी, २.१६९)

1. Ms. reads °ध्वंसाकलनस्वंकयाकतिपया°.

तत्प्रियासंभाषणार्थमाह ।

प्रत्यासन्ने नभसि दयिताजीविताल्म्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

(a) S. notes v. l. आलम्बनार्थं; V. S. M. °र्थी.

[नभसि प्रत्यासन्ने दयितायाः जीवितस्य आलम्बनेन अर्थी, स्वकुशलमयीं प्रवृत्तिं जीमूतेन हारयिष्यन् सः प्रीतः प्रत्यग्रैः कुटजकुसुमैः कल्पितः अर्घः यस्मै एवंविधाय तस्मै प्रीत्या प्रमुखं वचनं यस्मिन् एवंविधं स्वागतं व्याजहार.

The month of S'rāvaṇa being near, he wanted his beloved's life to be propped up and, wanting to make the cloud carry a message of his well-being, he offered him worship with fresh flowers of the kuṭaja and, rejoicing, offered him a welcome with words, brimful of joy.]

प्रत्यासन्ने नभसि दयितेत्यादि । व्याजहार जगाद । कः । स यक्षः । किम् । स्वागतं शोभनमागतं तवेत्यादि कुशलसंभाषणम् । कृतसत्कारोऽयमस्मत्प्रयोजनमनुष्ठास्यतीति । प्रीतस्तुष्टः । प्रीतिप्रमुखवचनं प्रीत्या प्रमुखं प्रधानं वचनमुक्तिर्यत्र स्वागते तत्तथोक्तम् । कस्मै । जीमूताय । आशिष्यायुष्यभद्रार्थकुशलार्थे चेति चतुर्थी । किंभूताय । कल्पितार्घाय कृतपूजाय । प्रत्यग्रैः अतिनवैः देवतातिथिसपर्यायोग्यैः कुटजकुसुमैर्गिरिमाल्लिकाकुसुमैः । आर्तवत्वादधिकमनोरमैः । किमर्थं पुनरस्यासौ प्रणयोपचारं चकार । हारयिष्यन् प्रापयितुं प्रवृत्तिं वार्ताम् । केन । जीमूतेन । कीदृशीम् । स्वकुशलमयीं आत्मीयक्षेमनिर्वृत्ताम् । यतः प्रियवियुक्तवनिताः पतिकुशलवार्ताश्रवणादाश्वसन्ति । अन्यथा प्रत्यासन्ने नभसि समुपस्थिते श्रावणे मासि । सलिलभरावनततोयवाहनिवहपिहितत्वेन वियति वा निकटतामिवागते । गतधैर्यास्ताः सद्यः प्राणैर्वियुज्यन्त इत्यपि

संभाव्यते । ततः प्राह । दयिताजीवितालम्बनार्थी दयिताजीवितं प्रियाप्राणितं आलम्बनं धारणमित्यर्थः प्रयोजनं यस्यास्ताम् । आलम्बनार्थमिति यदि पाठः तदालम्बनायेत्यर्थः । अत्र हेतुरलंकारः । तथा च । श्रुतमेकं यदन्यत्र श्रुतेरनुभवस्य च[3] । हेतुतां प्रतिपद्येत काव्यलिङ्गं तदुच्यते ॥ (उद्भट, ७४)

पयोदप्रार्थनाकथनार्थमाह ।

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रणयकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

(d) S. V. D. प्रणयकृपणाः J. M. प्रकृति०

[धूमः, ज्योतिः, सलिलं, मरुच्च एतेषां संनिपातः मेघः क्व; पटूनि करणानि येषां तैः प्राणिभिः प्रापणीयाः संदेशानां अर्थाः क्व; इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे. कामेन आर्ताः हि चेतनेषु अचेतनेषु च प्रणयेषु कृपणाः.

How ridiculous it is to connect together the cloud, a conglomerate of smoke, fire, water and wind, and the subject of a message, meet for live beings of acute senses? This the Yakṣa, in his yearnings of love, failed to notice and made his request. Love-sick men, indeed, become pitiful in their supplications to the animate and the inanimate alike.]

धूमज्योतिरित्यादि । धूमो ज्योतिश्च सलिलं च मरुच्चामीषां चतुर्णामचेतनानां समुदायरूपं क्व मेघः । संदिश्यन्त इति संदेशास्ते च ते अर्थाश्च संदेशार्थाः क्व । कीदृशाः । प्राणिभिः प्रापणीयाः सचेतनैर्नेतव्याः । अत्र प्रापणक्रियासामर्थ्यात् स्थावराणामसंग्रह एव । जङ्गमजीवेष्वपि सरीसृपादीनपहाय प्राणिनो विशिनष्टि । पटुकरणैरविकलेन्द्रियैः । इत्येतदसंभाव्यमौत्सु-

1. Ms. has °नार्थं 2. Edn. स्मृ॰ 3. Edn. वा.

यात् अधैर्याद् अपरिगणयन् अविवेचयन् गुह्यकः पुण्यजनः तं तोयदं ययाचे याचितवानिति । अघटमानार्थकथनदौर्गत्यं अर्थान्तरन्यासेन निरस्यति । कामार्ता हि यस्मात्कारणात् कामेन स्मरेण आर्ताः पीडिताः प्रणयकृपणाः दीनाः प्रणयेन याचनेन कृपणाः भवन्ति । कस्मिन् विषये । चेतनाचेतनेषु चेतनाश्चाचेतनाश्च तेषु । अस्यायमर्थः । कुसुमशरपरवशाश्चेतनं याच्यमचेतनमयाच्यमिति विवेक्तुमसमर्थाः सर्वात्मनापदमेव याच्ञादैन्यमनुभवन्ति । कामार्ता इति बहुवचनेन व्याप्तिं प्रदर्शयति । न केवलमयमेव । यः कोऽपि कामपीडितः स सर्वोऽप्यस्थान एवार्थयते । यथा मैथिलीविरहसंस्थुलो दाशरथिस्तदुदन्तकथनासमर्थान् स्थावरानप्यर्थान् प्रार्थयते तथा पुरूरवा उर्वश्या विप्रलब्धः सुरसरितोऽपि विटपिनः पादपानपि प्रार्थयते स्म । अत्र विषमार्थान्तरन्यासयोः संपर्कात् संसृष्टिरलंकृतिः । तथा । विषम इति प्रथतेऽसौ वक्ता विघटयति कमपि संबन्धम् । यत्रार्थयोरसन्तं परमतमाशङ्क्य तत्त्वे ॥ (रुद्रट, ७.४७) राजन्ति यत्रालंकारा अन्योन्यान्वितवृत्तयः । यथा-पदार्था वाक्यार्थाः संसृष्टिः साभिधीयते ॥

याच्यस्य चाटुवचनैः प्रलोभनां विरचयन्नाह ।

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

(a) पुष्कला° J. D. (d) V. वन्ध्या for मोघा.

[पुष्कराश्च आवर्तकाश्च तेषां भुवने विदिते वंशे जातं, मघोनः कामेन रूपं यस्य एवंविधं, प्रकृतिभूतं पुरुषं त्वां जानामि. तेन विधेर्वशात् दूरे बन्धुः यस्य एवंविधः अहं त्वयि अर्थित्वं गतः. अधिगुणे वन्ध्या याच्ञा वरं न अधमे लब्धकामा.

I know you to be born in the world-famous family of the Puṣkaras and Āvartakas, as the minister of

2. Ms. कथनादौमित्य.

Indra that can assume any form he wills. Therefor it is that, having been parted from a dear relation by adverse destiny, I appear as a supplicant before you. Better to have one's mendicancy fail with a noble person than have it granted by a pusillanimous one.]

जातं वंशे भुवनविदित इत्यादि । यतस्त्वामहं एवंविधं जानामि अवबुध्ये। जातं उत्पन्नं वंशे अन्वये भुवनविदिते लोकविख्याते पुष्करावर्तकानां प्रलयकालजलदानां इति। अनेन आभिजात्यप्ररूपणम् । प्रकृतिपुरुषम् प्रकृतिश्चासौ पुरुषश्च तम् प्रधानपुरुषम् । कस्य । मघोनः पाकशासनस्य । तस्य मेघाः परिवार इति प्रसिद्धिः । कीदृशम् । कामरूपम् । वक्ष्यति च पुष्पमेघीकृतात्मेति । अमुना सामर्थ्यकथनम् । तेनार्थित्वं अर्थिभावं त्वयि गतः प्राप्तः । तदपि कस्मात् । दूरबन्धुः विप्रकृष्टभार्य इत्यर्थित्वकारणम् । स्वपौरुषापराधं निषेध्याभिधत्ते । विधिवशाद् दैवपारतन्त्र्यात् । अहं सारवान् कथमर्थी इत्याह । याच्ञा प्रार्थना मोघा निष्फलापि वरं अदैन्यकारिणी । कस्मिन् । अधिगुणे जात्याद्युत्कृष्टे । भिन्नलिङ्गे विशेषणं यथा वरं कूपशताद्वापी । न पुनरधमे निकृष्टे लब्धकामा प्राप्ता अभीष्टापि त्रपाकारित्वात् । ननु पूर्वमचेनत्वदोषो यावदस्य निन्दा प्रस्तुता तस्यैव पुनर्जात्यादिभिः स्तुतिरिति दुर्निषेध्यः पूर्वापरविरोधः । समाधीयते । श्रुतिस्मृतिबहिर्भूतं यावत्सामान्यजनप्रवादमात्रमुररीकृत्य दूषणं प्रतिपादितमिदानीं चेहादिप्रतिपाद्यपदार्थत्वेन प्रशंसेति न दोषः । अर्थान्तरन्यासः ।

प्रार्थनीयस्य परोपकारित्वं गुणान्तरं प्रस्तुवन्नाह ।

> संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
> संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
> गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
> बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

[पयोद, संतप्तानां त्वं शरणं असि तद् धनानां पत्युः क्रोधेन विश्लेषितस्य मे प्रियायाः संदेशं हर. बाह्ये उद्याने स्थितः हरः तस्य शिरसः चन्द्रिकया धौतानि हर्म्याणि यस्यां एवंविधा यक्षाणां

ईश्वराणां अलका नाम वसतिः ते गन्तव्या.

Oh Cloud ! you are the refuge of those that are tormented. Carry, therefore, to my beloved the message of one who has been sundered by the wrath of Kubera. Your destination will be Alakā, the residence of the Yakṣa lords, where the moonlight coming from the head of S'iva, who dwells in an outside park, bathes its palatial buildings.]

संतप्तानामित्यादि । संतप्तानामिति बहुवचनेन यः कोपि संतापपीडितस्तस्य त्वं शरणं आश्रयोसि तन्नूनमस्मान्मे मम धनपतेः कुबेरस्य क्रोधेन कोपेन विश्लेषितस्य वियोजितस्य । इत्यनेन आत्मनः संतप्तत्वप्रतिपादनम्। हे पयोद पयः शीतस्वभावं उष्णप्रकृतिसंतापप्रत्यनीकं तद्ददातीति पयोदः तस्य संबोधनम् । अनेनास्य संतापोपशमशक्तिकथनम् । अतः संदेशमुदन्तं हर प्रापय प्रियायाः प्रेयस्याः । प्रेष्यत्वेन नियोगदानमनुचितमिति गन्तव्या ते यातव्या । कृत्यानां कर्तरि वा षष्ठी । तवोदीचीमि³तस्तदा अलका नाम अलकाभिधाना नगरी । सा कीदृशी । वसतिः आवासभूमिः । यक्षेश्वराणामिति बहुवचनेन तन्निवासिनो न प्रतिपक्ष्यानाख्यापयति । पुनश्च किंभूता । बाह्येत्यादि । बाह्योपवनं तत्र स्थितः हरः शशिशेखरः तस्य शिरसि चन्द्रिका मूर्ध्नि बद्धा मुग्धेन्दुकलाकान्तिस्तया धौतानि धवलितानि हर्म्याणि यक्षगृहाणि यस्यां सा तथोक्ता । अमुना विशेषणेन अस्या पुरान्तरव्यावर्तकमभिज्ञानमुक्तम् । अत्र हेतुरलंकारः ।

स्वकृत्ये प्रवर्तमानमम्भोदं प्रलोभयन्नाह ।

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥

(b) आश्वसन्त्यः V. J. (d) अयमिव J.

---

3. Ms. स्तवमवोदीचीमंचतत्तदालका &c.

[उद्गृहीताः अलकानां अन्ताः याभिः एवंविधाः प्रत्ययात् आश्वसत्यः पथिकानां वनिताः पवनस्य पदवीं आरूढं त्वां प्रेक्षिष्यन्ते संनद्धे त्वयि विरहेण विधुरां जायां कः उपेक्षेत. अहमिव यः पराधीनवृत्तिः एवंविधः अन्योऽपि जनः न स्यात्.

When on the path of the wind you will be looked up to by the way-farers' wives, who will hold up their tresses of hair, their minds taking hope from their confidence in you. When you have girded your loins, who would be indifferent to his forlorn wife and (surely) there cannot be another such (wretch) as I am whose life is in the power of others.]

त्वामारूढमित्यादि। प्रेक्षिष्यन्ते द्रक्ष्यन्ति। पथिकवनिताः पान्थप्रियाः। त्वां भवन्तम्। किंभूतम्। आरूढमध्यासीनम्। पवनपदवीं समीरणसरणिं अन्तरिक्षमित्यर्थः। किंभूताः। उद्गृहीतालकान्ताः उदञ्चितकुटिलकचाञ्चलाः। अनेन विरहिणीनां कल्पनाया अभावाल्लम्बालकत्वमुक्तम्। पुनः कीदृश्यः। आश्वसत्यः स्वस्थीभवन्त्यः। कुतः। प्रत्ययात्। यदा यदा पयोदोऽयमुदेति तदा तदास्मत्पतयः प्रत्यायान्तीति अवधारितनिश्चयाः। कस्मात्पुनः पथिकानां पयोददर्शनान्निजप्रेयसीप्रत्यागमनमुदेति। विरहिहृदयोत्कण्ठोत्पादकत्वादित्याह। कः कृपारहितः त्वयि संनद्धे भवति उद्यातेप्रगुणितधनुस्तडिद्विलसनगर्जनादिसामग्रीके सति विरहविधुरां वियोगविह्वलां जायां उपेक्षेत वधूमवधीरयेत। त्वमपि कस्मादुपेक्षस इत्याह। विधिवशादहं यथा पराधीनवृत्तिरस्वाधीनवर्तनस्तथा अन्यो योऽस्वतन्त्रो जनः स एव न स्यान्न भवेत्। अपिशब्दः संभावनायां। प्रियोपेक्षको न संभाव्यत इत्यर्थः। अत्र व्यतिरेको नामालंकारः। तथा च। यत्रोपात्ते[1] प्रतीत्यैव सादृश्ये वस्तुनोर्द्वयोः। यत्र यद्भेदकथनं व्यतिरेकः स उच्यते[2]॥ (दण्डी, २.१८०)

प्रस्थानोचिताचारं निरूपयन्नाह।

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।

1. Edn. शब्दोपात्ते प्रतीते वा. 2. Edn. [illegible]

काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ ९ ॥

St. 9 appears as 12 in J. D. M. (c) J. M. भवतः

[पुंसां वन्द्यैः रघूणां पत्युः पदैः मेखलासु अङ्कितं प्रियं सखायं अमुं तुङ्गं शैलं आलिङ्ग्य आपृच्छस्व. भवता संयोगमेत्य चिरविरहजं उष्णं बाष्पं मुञ्चतः यस्य काले काले स्नेहस्य व्यक्तिः भवति.

Embrace and bid good-bye to this dear friend, the lofty mountain, impressed on its slopes with the adorable footsteps of Rama, who, every time when there is a meeting between you, manifests his affection by emitting hot vapours (tears), caused by his long separation from you.]

आपृच्छस्वेत्यादि । अमुं रामगिरिशैलमापृच्छस्व । गमनाय संवादय । आङः प्रच्छ इत्यात्मनेपदम् । कीदृशम् । तुङ्गमुन्नतं अत एव गमनसमये तत्प्रश्नोपपत्तिः । पुनः किंभूतम् । प्रियसखं प्रियश्चासौ सखा च प्रियसख इति । राजन्नहन्सखिगोरतद्धिताभिधेयम् । इत्यतस्तमभिमतं मित्रम् । मित्रत्वं च परस्परोपकार्योपकारकभावद्वाराचरणम् । आधारभूता भूधराश्चराचराणां च सृष्टहष्टयः पयोदा (ल)तादिसंपदुत्पत्तिहेतवः इत्यमीषां मिथः सुहृद्त्वम् । तत एनमालिङ्ग्य परिरभ्य । वल्लभत्वादालिङ्गनमुचितम् । पुनः किंभूतम् । अङ्कितं चिह्नितं रघुपतिपदैः रामचरणन्यासैः । क । मेखलासु नितम्बभूमिषु । किंविशिष्टैः । वन्द्यैर्नमस्कार्यैः । पुंसामिति कर्तरि षष्ठी । पुंभिरित्यर्थः । एतेनास्य महापुरुषनिषेवितत्वेन उपादेयत्वमुक्तम् । न चेदानींतनमिव भूधराम्भोधरयोः सख्यमित्याह । काले काले सर्वस्मिन् समागमसमये भवता त्वया सह भवतो वा संयोगमेत्य संगमागत्य यस्य स्नेहव्यक्तिः स्निग्धताविर्भावो भवति । स्नेहपदेनार्द्रता प्रीतिश्च प्रतिपद्यते । तामेव वक्ष्यति । मुञ्चतः त्यजतो बाष्पमूष्माणमुष्णमशीतलं । कालोद्गमाद्बाष्पपदेनोष्माश्रु[1] चोच्येते । किंविशिष्टम् । चिरविरहजं बहु-

1. Ms. °द्गमाद्बाष्पपदेनोष्माश्रेचोच्यते.

कालवियोगसमुत्थम्। अत्र परिकरो नामालंकारः। तथा च। साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशिष्येत। द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति (रुद्रट, ७. ७२) स्वभावोक्तिरिति दण्डी।

शुभनिमित्तादिनिवेदनेन जलदं याने प्रोत्साहयन्नाह।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगर्वः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥ १०॥

(b) V. तोयगृध्नुः also S. as V. L., J. D. M. सगन्धः

[त्वां अनुकूलः यथा पवनः मन्दं मन्दं नुदति; वामश्च अयं सगर्वः चातकः मधुरं नुदति. नूनं गर्भस्य आधानस्य क्षणे परिचयः यासां ताः, आनद्धाः मालाः याभिः ताः, बलाकाः नयनयोः सुभगं भवन्तं खे सेविष्यन्ते.

Gently blows the wind so as to be agreable to you and the proud cātaka cooes to your left sweetly; and surely the Balakas, with their intimacy born in the joy of impregnation, will wait upon you in the sky, twining themselves round you, who are lovely to behold.]

मन्दंमन्दमित्यादि। वीप्साया मन्दतातिशयप्रकाशनम्। शनैः शनैरित्यर्थः। त्वां नुदति प्रेरयति पवनः पवमानः। कीदृशः। अनुकूलः पृष्ठानुगामी। मन्दगतिरनुकूलश्च यदा वायुर्वाति तदा प्रयातुः सुखावहः कथित इति निमित्तविदः। न केवलं मरुदेव प्रशस्तः। चातकः सारङ्गाभिधः पक्षी। चकारः पवनापेक्षया समुच्चये। वामः तव वामभागे[1]। यस्मान्मृगपक्षिणश्च प्रयातुर्वामाः कामदा इति शकुनशास्त्रसमयो दृश्यमानः। नदति कूजति मधुराः सुस्वरमदीप्तस्वरम्। कीदृशः। सगर्वः प्रहृष्ट इति शुभचेष्टाकथनम्।

1. Ms. वामभागः

तथा च । कामं कामसमासक्ता भोज्यं भोज्यप्रदायिनः । हृष्टाः पुष्टिं प्रयच्छन्ति प्रयातुर्मृगपक्षिणः ।। एतेन शकुनप्रशस्तता । तोयगृध्नुरित्यपरः पाठ एव । स तादृशस्य शुभस्य सूचकत्वे न घटते । शकुनादिसंपद्यमानं फलं प्रदर्शयति । यथेदमनुकूलादिनिमित्तं तर्कयामि तथा नूनं निश्चितं भवन्तं नयनसुभगं लोचनाभिरामं सेविष्यन्ते श्रयिष्यन्ति बलाका विशकण्टिकाः । तासां यत्प्रत्ययेनैव स्त्रीत्वमुक्तम् । सुभगं च स्त्रियः स्वयमभिसरन्ति । किंभूतास्ताः । आबद्धमालाः (आबद्धाः मालाः) स्रजो याभिस्तास्तथोक्ताः । कृतालंकाराः पुरंध्रयः पतिमुपसर्पन्ति । स्वभावादेव पयोदकाले बलाकाः श्रेणीभूता भवन्ति । कस्माद्धेतोः । गर्भाधानक्षणपरिचयाद् गर्भस्याधानं धारणं तस्मिन् क्षणे समये परिचयस्तस्मात् । सन्तोप्याहुरपत्यार्थे दंपत्योः संगमं मिथः । ताः किल जलदसंपर्काद्गर्भं बिभ्रतीति प्रवादः । क्व । खे शून्ये संभोगयोग्ये प्रदेशे । खशब्देन शून्यनभसोऽभिधानात् । अत्रानुमानमलंकारः । तथा च । यत्र बलीयः कारणमालोक्याभूतमेव भूतमिति । भावीति वा तथान्यत् कल्प्येत[1] तदन्यदनुमानम् ।। (रुद्रट, ७. ५९)

प्रियाजीवितसत्ताकथनेन पाथोदस्य तदर्थप्रयाणप्रयाससाफल्यं निरूपयन्नाह ।

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपातप्रणयि हृदयं विप्रयोगे रुणद्धि ।। ११ ।।

(d) सद्यःपातप्रणयि S. V. D; सद्यःपाति J. M. also noted as V. L. by S.

[अविहतगतिः च दिवसानां गणनायां तत्परां एकपत्नीम् अव्यापन्नां तां भ्रातुः जायां अवश्यं द्रक्ष्यसि. प्रायशः विप्रयोगे अङ्गनानां कुसुमसदृशं सद्यःपातप्रणयि हृदयं आशाबन्धः रुणद्धि.

And surely, provided you go without interruption, you will see your sister-in-law alive, a faithful wife

---

1. Edn. कथ्येत.

intent on counting days. The thread of hope often prevents women's loving hearts, flowerlike and prone to speedy dissolution, from falling out in the days of separation.]

तांचावश्यमित्यादि । पयोद द्रक्ष्यसि विलोकयिष्यसि तां प्रस्तुताम् चकारोऽनन्तरवाक्यापेक्षया समुच्चयार्थः । अवश्यमसंशयं । भ्रातृजायां बन्धुव मित्यनेन आत्मनि बन्धुतामारोप्य पयोदस्य सुहृत्त्वात्तदवलोकनाधिकारित मापादयति । कीदृशीम् । दिवसगणानातत्परां कालावधेः कियन्ति व्यतीतानि कति च प्रियविरहदिनान्यवशिष्टान्येवं वासरपरिसंख्या तन्निष्ठां अत एव अव्यापन्नाम् अपरित्यक्तजीविताम् । दिनसंख्यान्तान् सा प्राणान् धारयति । त्वं कीदृग् । अविहतगतिः पथि चेन्न विलम्बसे । यदि वा सदागतित्वात्तद्गृहप्रवेशादौ अप्रतिहतगमनः । कीदृशीम् । एकपत्नीं एकः पतिर्यस्याः सा तादृक्तामेकपत्नीमिति । पत्युः दीतौ यज्ञसंयोगे । पतिव्रतामित्यर्थः । एतेनानन्यगामित्वात् तस्या दर्शनयोग्यता कथिता । ननु यदि त्वदेकशरणा सा कथं विरहसंतापान्न व्यापन्ना तदर्थमाह । आशाबन्धः । आशा विश्वासवती स्पृहा । आबध्यते समन्ताद् धार्यतेऽनेनेत्याबन्धः । करणे घञ् । आशैवाबन्धः कुसुमसदृशं कुसुमवत्सुकुमारम् । सदृशादयः शब्दा गुणसादृश्यवाचिनः प्रायशो बाहुल्येन । अङ्गनानामबलानां हि यस्मादर्थे हृदयं मनः सद्यःपातप्रणयि सद्यः वियोगसमकाले पातः पतनं तत्प्रणयः परिचयः स यस्यातीति तत्तादृग् विपत्तिषु वियोगे । सद्यःपाति पतनशीलं प्रणयि प्रणयः [1]स्नेहस्तद्वदिति पाठान्तरम् । विप्रयोगे वल्लभविप्रलम्भे सति रुणद्धि धत्ते पतनात् त्रायते । इदमुक्तं भवति । यथा पातोन्मुखं कुसुमं आशासु दिक्षु बन्धो वृन्तं आवृणोति तथा प्रियावियोगे मदनदहनदग्धं पुरस्त्रीणां हृदयं पत्या सह पुनः संभोगो भविष्यतीति या आशा सा ध्वंसाद्धारयिष्यति । मनसः प्रणाशश्च पंचत्वमुच्यते अत्रानुमानम् ।

> कर्तुं यच्च प्रभवति महीमुच्छिलन्ध्रातपत्रां
> तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।

1. Ms. प्रणयि पतनशीलं प्रणयस्नेहवद्विति

आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ १२ ॥

(a) उच्छिलिन्ध्रामवन्ध्यं V. उच्छिलीन्ध्रामवन्ध्यां J. M. उत्सिलि० D. Many mss. support S.

[यत् च महीम् उद्गतानि शिलन्ध्राणि एव आतपत्राणि यस्यां एवंविधां कर्तुं प्रभवति तत् ते श्रवणयोः सुभगं गर्जितं श्रुत्वा मानसे उत्का येषां, बिसं च किसलयं च तयोः छेदाः एव पाथेयं विद्यते येषां ते तथोक्ताः राजहंसाः नभसि भवतः आ कैलासात् सहायाः संपत्स्यन्ते.

And when the Rājahaṁsas hear that thunder of yours, beautiful to the ear, which has the power to cover the earth with umbrellas of mushrooms, they will long for the Mānasa and, providing themselves with bits of lotus-stalks as their food for the journey, keep you company in the sky until the Kailāsa is reached.]

एकाकिनः किल मार्गे गमनमनुचितमिति सहायसंपत्तिं प्रतिपादयितुमाह। कर्तुं यच्चेत्यादि। संपत्स्यन्ते संपूर्वः पदिः संपत्ताविति संपन्नास्ते सहाया अभिसरा भविष्यन्ति। के। ते प्रसिद्धाः राजहंसा इति हंसविशेषा अरुणचरणवदनाः। राजपदविशेषणेन अमीषामुत्तमत्वम्। उत्तमैः सह संगः श्रेयान्। कथं पुनः पक्षिणः सहायकत्वेनोपात्ताः। त्वं गगनगतिस्ततः खगा एवाद्य सहायधर्माय नियुक्ता इति युक्तमेव भवति। (नभसि) विहायसि भवतस्तव ते खगा एव हंसाः। कस्मात्। त्वं जलधरस्ते च जलसेविनः। समानशीलव्यसनिनां सख्यमाख्यातम्। निःपाथेयानां पथि दौःस्थ्यं दुर्निवारमेतन्निरासार्थं कथयति। बिसेत्यादि। बिसानां मृणालानां किशलयान्यग्राणि तेषां छेदाः षण्डानि तान्येव पाथेयं पथि हितं शम्बलं तद्विद्यते येषामित्येकपदात्मत्वम्। परिच्चयमात्रेणामी कियति वा दूरे गमिष्यन्तीत्युक्तम्। आकैलासादादित्यव्ययीभावः कैलासं यावत्। तदपि कुतः। यतस्ते मानसोत्काः मानसे सुरसरसि उत्का येषां ते तथोक्ताः। प्रावृषि किल मराला

1. Ms. राजहंसा हंस इति विशेषा अरुण°.

मानसं सरोऽनुसरन्तीति प्रसिद्धिः। अमीषामुत्कलिकायामपि किं कारणम्। तत् तथाविधं श्रुत्वा निशम्य गर्जितं स्तनितं। कस्य। भवतः। कीदृशम्। श्रवणसुभगं श्रुतिरमणीयम्। अनेनास्योद्दीपनविभावाच्चाभिधानम्। कीदृशम्। यत् कर्तुं च प्रभवति। चकारः क्रियासमुच्चये। न केवलं मरालानुत्कण्ठयति महीं वसुधामपि विधातुमीष्टे। कीदृशीम्। उच्छिलन्ध्रातपत्रां उद्गतानि शिलन्ध्राणि छत्रकाणि तान्येवातपत्राणि यस्यां सा। एतेन मेघश्लाघा। यस्य शब्दमात्रादपि वसुंधरा एवंविधां संपदमादधाति तस्य व्यापारः किं वा न विधास्यतीति। अनुमानम्।

मार्गोपदेशनार्थमाह।

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥

(a) मत्तः शृणु J. D. (b) J. श्रव्यबन्धं, D. श्राव्यबन्धं (d)उपयुज्य V. J.; उपभुज्य D. M.; reading of S. not clear.

[जलद, कथयतः (मे) तव प्रयाणस्य अनुकूलं मार्गं तावत् शृणु, —तदनु श्रोत्रपेयं मे संदेशं श्रोष्यसि,—यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीणः स्रोतसां परिलघु पयः च उपयुज्य गन्तासि.

Just listen, as I am telling it, to a suitable route for your journey,—my message, worthy of being drunk with the ears, will only come after it,—a route according to which you will be proceeding (thus with your journey): stepping on mountains, whenever weary, and recouping yourself, whenever exhausted.]

मार्गं तावदित्यादि। तावच्छब्दः क्रमार्थः। प्रथमं मार्गमध्वानं शृणु ममाकर्णय कथयतः आचक्षाणस्य। कीदृशम्। त्वत्प्रयाणानुरूपं भवद्गमनोचितं सुकुमारत्वादखेदावहम्। संदेशं सदिश्यमानं मे मम तदनु। तदुपरीत्यादयः पंचम्या। अव्ययेन हि षष्ठीसमासः प्रतिषिद्धः। यदि वा तदव्ययं तस्मादर्थे। तत् तस्मा-

न्मार्गश्रवणाद् अनु पश्चाज्जलद पयोद श्रोष्यसि निशमयिष्यसि । कीदृशम् । श्रोत्रपेयं आदरश्रवणीयम् । कृत्यैरधिकार्थवचन इति तृतीयासमासः । अध्वगमने सुखिनः खेदः समुत्पद्यते ततः सौहार्दादस्य मार्गोपयोगिनं विधिमुपदिशति । खिन्नः खिन्न इति द्विरुक्त्या कालाभिव्याप्तिः । यदा यदा श्रान्तो भविष्यसि तदा तदा । शिखरिषु पर्वतेषु । बहुवचनं व्यक्तिग्रहणार्थम् । तेन शिखरिणि शिखरिणीति गम्यते । पदं न्यस्य । पदमिति जातावेकवचनम् । पादावारोप्य विश्रम्य । यतः क्षीणानां लघु संतर्पणमुचितं गुरुसंतर्पणं स्थूले । विपरीतं हितं कृतं इति वचनात् । कस्य संबन्धि । स्रोतसाम् । अत्रापि बहुत्वस्य स एवार्थः । स्रोतसः स्रोतस इति । स्रोतः सत्क्षेत्रप्रस्रवणवाचि न पुनर्नदीपर्यायः । चिकित्सागमविरोधात् जलदकाले नादेयं पयः पाने प्रतिषिद्धं तद्धि पङ्किलत्वाद् गुरु । वर्षासु दिव्यं गिरिशिखरस्रुतं वा पेयं न नादेयं इत्यायुर्वेदः । अत्र श्लेषोलंकारः । तथा च । पदं श्लिष्टमनेकार्थमेकरूपान्वितं वचः । तदभिन्नपदप्रातमिति श्लेषं विदुर्द्विधा ॥ (दण्डी, २.३१०)

स्वार्थसिद्ध्यर्थं मनुष्यपथिविपत्परिहारमुपदिशन्नाह ।

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥

(a) वहति D. (d) हस्तावलेहान् V.

['पवनः अद्रेः शृङ्गं हरति किं स्वित्' इति उन्नतानि मुखानि यासां ताभिः मुग्धाभिः सिद्धाङ्गनाभिः चकितचकितं दृष्टः उत्साहो यस्य, उदीच्यां मुखं यस्य एवंविधः, पथि दिङ्नागानां स्थूलानां हस्तानां अवलेपान् परिहरन्, अस्मात् सरसाः निचुलाः यस्मिन् एवंविधात् स्थानात् खं उत्पत.

Fly into the sky from this spot of sappy canes, escaping on your way the insolence of the fat trunks

1. Edn. (a) श्लिष्टमिष्ट°; (c, d) °पदं भिन्नपदप्रायमिति द्विधा.

of the elephants of the quarters, your energy watched with the greatest astonishment by naïve siddha damsels looking up and crying out. 'What ! Is the wind blowing off the mountain peak ? ']

अद्रेः शृङ्गमित्यादि । तोयद त्वं उत्पत ऊर्ध्वं गच्छ । कीदृग् उदङ्मुखः उत्तराभिमुखः खं आकाशमनुपरुद्धं प्रदेशम् । कीदृशः । दृष्टोत्साहोऽवलोकितोद्यमो मुग्धसिद्धाङ्गनाभिः मुग्धाः अ—[1] सिद्धानां देवविशेषाणां अङ्गनाः वध्वः ताभिः । मुग्धत्वाद् भ्रान्तिः । कीदृशीभिः । उन्मुखीभिः ऊर्ध्वाननाभिः इति हेतोः । कथम् । चकितचकितं यथा भवति पातशङ्कया । किंस्विदद्रेः शृङ्गं शिखरिणः शिखरं हरति नयति पवनः प्रभञ्जनः । स्विदिति वितर्के । कस्मात् । स्थानादस्मात् सरसनिचुलात् सरसाः स्निग्धाः निचुलाः वेतसाः यत्र तस्मात् । प्रायस्ते नादेयीनामान उपनदि प्ररोहन्तीत्यतो वर्षाधर्मवर्णनव्याजेन मा मामनुव्रजेति विसर्जयेत्यभिहितं[2] भवति । तथा चोक्तम् । नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाश्रये । आरामेषु च कूपादाविष्टबन्धून् विसर्जयेत् ॥ किं कुर्वन् । पथि मार्गे परिहरन् वर्जयन् दिङ्नागानां आशागजानां स्थूलहस्तावलेपान् पीवरकरग्राहान् । तदवस्थानां स्थूलपदविशेषणं सामर्थ्यकथनार्थम् । ते हि प्रतिगजं भ्रान्त्या करैर्जिघृक्षन्ति । ननु कुबेरगुप्तायां दिशि प्रस्थितस्यास्य बाधाविधायक एक एव दिक्कुम्भी संभवति तत् कथं बहुवचनम् । उच्यते । बहुत्वमेवात्र विवक्षितं यदम्बुदं प्रति यक्षो भणति दिगन्तराणि परिहृत्य त्वयोत्तरैव हरित् तूर्णं गन्तव्येति भावः । अत्र विषये संदेहो नामालंकारः । तथा च । अलंकारान्तरच्छायां यत्कृत्वा धीषु बन्धनम् । असंदेहेऽपि संदेहरूपं संदेहनाम तत् ॥ (उद्भट, ६.३)

प्रयाणाभिमुखं अभिनवभूपालोभभाषणेनाम्भोदं प्रलोभयन्नाह ।

> रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्
> वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।

---

1. Ms. leaves a blank.
2. प्रयाहीत्यतो वर्षाधर्मवर्णनव्याजेन मामनुव्रजेति विसर्जयेत्यभिहितं.

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

(a) रत्नछाय. V. (b) धनुष्खण्ड° V. (d) गोपवेशस्य noted by Hultzsch is not clear from V.

[एतत् पुरस्तात् वल्मीकाग्रात् रत्नानां छायानां व्यतिकरः इव प्रेक्षणीयं आखण्डलस्य धनुषः खण्डं प्रभवति, येन ते श्यामं वपुः, स्फुरिता रुचिः यस्य तादृशेन बर्हेण गोपस्य वेषः इव वेषः यस्य सः तस्य विष्णोः (वपुः) इव, अतितरां कान्ति आपत्स्यते.

Here in front of you rises from an ant-hill a section of the rain-bow, a wonderful sight like the lustre of gems mingling together. which will materially add to the beauty of your dark body, as the peacock's plumage of shining hue adds to that of Viṣṇu dressed as a cowherd.]

रत्नच्छायेत्यादि। तोयद तव वपुः शरीरं श्यामं हरिद्वर्णं कान्तिं शोभां अतितरां अतिशयेन आपत्स्यते। भाविनि प्रमाणाभाव इति प्रमाणमभ्यधात्। येन करणभूतेन तत्प्रत्यक्षं चक्षुःसंबद्धं गृह्णाति तदर्थमाह। पुरस्तादग्रे प्रेक्ष्यमभिरामं शोभावहं वल्मीकाग्रात् कुम्रान्तात् प्रभवति प्रादुर्भवति। भुवः प्रभवति पञ्चमी। वल्मीकतः शतक्रतुधनुरुदेतीति प्रसिद्धिः। धनुःखण्डमाखण्डलस्य चापच्छेदः पुरंदरस्य। स्तोकनिर्गमात्खण्डमित्युक्तम्। तत्कीदृशम्। रत्नच्छायाव्यतिकर इव रत्नानां मणीनां छायाः कान्तयः तासां व्यतिकरो मिश्रीभावः। इव सादृश्ये। सदृशत्वं च चित्रगुणेन। व्यतिकरपदेन रत्नबहुत्वलाभादस्य चित्रवर्णतोपपत्तिः। दृष्टान्तभूतस्य स्वलिङ्गेन प्रयोगाभाव भिन्नलिङ्गतेत्युपमादोषाः। एतेन शचीपतेरिव चित्रचापेन शोभाविर्भावो भवतोऽपि भविष्यतीत्यभिहितं भवति। न परं पौरंदरीमेव[1] दिशं प्रकारान्तरेणोक्तवानितीवोपमानेन श्रीपतेरपि श्रियमस्मिन्निवेशयति बर्हेणेत्यादिना। बर्हेण बर्हिपिच्छेन स्फुरितरुचिना प्रेङ्खितकान्तिना गोपवेषस्य वल्लववेषधारिणो

1. Ms. मेवं.

विष्णोः कृष्णस्य यथा कायः कान्तिमाप तथा तवापि प्राप्स्यति। गोपालः कि केलिकलितचेतसः केकिपिच्छपरिच्छेदमाद्रियन्ते । तत उक्तं गोपवेषस्येति अत्रोपमा ।

मदर्थं पथि प्रस्थितस्य तव न केवलं शोभालाभ एव विषयोपभोगो भविष्यति तद्दर्शयितुमाह ।

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्य मालं
किंचित् पश्चात् प्रगुणय गतिं भूय एवोत्तरेण ॥ १६ ॥

(a) भ्रूविलासा° V. D. (c) °सुरभि क्षेत्र V. D. M. (b) प्रबल गतिं V. व्रज लघुगतिः J. M. D.

[त्वयि कृषेः फलं आयत्तं इति प्रीत्या स्निग्धैः, भ्रूणां विकाराणां अनभिज्ञैः, जनपदस्य वधूनां लोचनैः, पीयमानः सद्यः सीरेण उत्कषणं तेन सुरभीणि क्षेत्राणि यस्य एवंविधं मालं आरुह्य, किंचित् पश्चात्, भूयः एव उत्तरेण लघुगतिः व्रज.

The eyes of the maidens of the country around, unaccustomed to the contraction of eye-brows, (but) tender with affection, because the fruit of agricultural labour is dependent on you, will feast themselves on you ; and then, climbing up the plateau in which the fields are fragrant, having been ploughed recently, speed up your journey, (first) slightly to the west and then once more in a northerly direction.]

त्वय्यायत्तमित्यादि । त्वमुदीचीं प्रस्थितोऽपि किंचिन्मनाक् पश्चान्मालं पाश्चात्यसीमान्तं दक्षिणाश्रितमारुह्य तस्योपरि स्थित्वा । कीदृशम् । सद्यःसीरोत्कषणसुरभिक्षेत्रं सद्यः प्रत्यग्रं सीरोत्कषणं लाङ्गलमुखोल्लेखनं तेन सुरभीणि सुगन्धीनि क्षेत्राणि यत्र तत्तथाविधम् । अनेन तदारोहणोपपत्तिः । यतः प्रायः प्रावृषि हलदलिता तोयवर्षणेनाम्बुभिरभ्युक्षिता क्षितिः परि-

मलं मुञ्चति तमामेदिमादाय मुदितः सन् । किंभूतः । पीयमानः सस्पृहमालोक्यमानः जनपदवधूलोचनैः ग्रामतरुणीनेत्रैः । कीदृशैः । भ्रूविकारानभिज्ञैः ग्राम्यत्वाद् भ्रूविभ्रमापण्डितैः । पुनः कीदृग्भिः । प्रीतिस्निग्धैः प्रेमार्द्रैः । तासां किमालोकनकारणमिति हेतौ । यतः त्वय्यायत्तम् । निमित्तसप्तमीयम् । भवति अधीनं कृषिफलं सस्यलक्षणं । तव वृष्ट्या निष्पाद्यत इति भावः । क्षणमात्रं कृतविलम्बश्च भूयः पुनरप्युत्तरेणैव दिग्भागेन गतिं गमनं प्रगुणय सज्जीकुरु । प्रचलय वा प्रवर्तय । एतदुक्तं भवति । अकृत्रिमप्रेमाभिरामग्रामरामाविलोकनभावाभेदाभिमानिकीं प्रीतिमनुभूय भूय एवोत्तरां दिशमाश्रित्य त्वरया प्रयाहि । अत्र हेतुरलंकारः ।

पथि विश्रामस्थानकथनेनामुं भूयः प्रलोभयन्नाह ।

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

See अध्वक्लान्तं &c. in Appendix.

[आसारेण प्रशमितः वनस्य उपप्लवः येन तादृशं, अध्वनः श्रमेण परिगतं त्वां सानुमान् आम्रकूटः मूर्ध्ना साधु वक्ष्यति. क्षुद्रः अपि प्रथमस्य सुकृतस्य अपेक्षया संश्रयाय प्राप्ते मित्रे विमुखः न भवति; किं पुनः यः तथा उच्चैः ?

You having extinguished a disastrous fire on the Amra-kūṭa by a heavy shower of rain, that mountain will hold you well on his head, over-whelmed as you will be by the fatigue of journey. Even an insignificant man, out of regard for former obligations, does not become averse to a friend who has come for shelter; how much truer would this be with one who is so lofty ?]

त्वामासारेत्यादि । आम्रकूटाभिधानः सानुमान् शिखरी त्वां वक्ष्यति भवन्तं धारयिष्यति मूर्ध्ना मस्तकेन । मूर्धपदेनादरप्रतिपादनम् । साधु भद्रं यथा भवति । कीदृशम् । आसारप्रशमितवनोपप्लवं आसारेण वेगवद्वर्षेण प्रशमितोऽपनीतः वनानां तदाश्रितकाननानां उपप्लवः दावपावकाख्यो येन तम् । एतेनास्योपकारकरणकारणं भणितम् । पुनः किंभूतम् । अध्वश्रमपरिगतं मार्गखेदव्याप्तं इत्यनेन विश्रामदानं युक्तम् । इदमर्थान्तरन्यासेन समर्थयते । क्षुद्रोपि लघुरपि । क्षुद्रशब्देन अपचितपरिमाणः । हीनमना इति पर्यालोचनया । संश्रयाय समाश्रयार्थं प्राप्ते समागते मित्रे सुहृदि विमुखः पराङ्मुखो न भवति वैमुख्यं न भजते । किं पुनर्यस्तथोच्चैः तेन प्रकारेणोच्चैः । उच्चैःपदेन तुङ्ग उदारहृदयश्चोच्यते । स किमनुचितमाचरिष्यतीति किमुशब्दः । अत्रानुमानार्थान्तरन्यासयोः संसृष्टिः ।

भवदाश्रयदानेन भूभृतोपि शोभां संभावयितुमाह ।

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

[स्निग्धया वेण्या समानः वर्णः यस्य: एवंविधे, शिखरं आरूढे त्वयि (सति), परिणतैः फलैः द्योतिभिः काननानां आम्रैः छन्नः उपान्तः यस्य तादृशः अचलः, भुवः स्तनः इव, मध्ये श्यामः शेषे विस्तारे पाण्डुः, अमराणां मिथुनैः प्रेक्षणीयां अवस्थां नूनं यास्यति.

When, with a hue resembling the soft lustre of braided hair, you would have mounted to the peak, the mountain with its outskirts covered with the mango-trees of the forest, brightened up by their ripe fruit, would surely present a wonderful spectacle to the heavenly pairs (flying over it) : looking just like a breast of the earth, dark in the centre and white in the remaining expanse.]

छन्नोपान्त इत्यादि । छादितपर्यन्तः । काननाम्रैर्विपिनसहकारैः । कीदृशैः । परिणतफलद्योतिभिः पाकपिङ्गफलप्रकाशिभिः त्वयि भवति आरूढे समाक्रान्तवति शिखरं अग्रशृङ्गं अचलः शैलः । कीदृशि । स्निग्धवेणीसवर्णे कान्तिमत्कबरीसमानत्विषि । स्तन इव पयोधर इव । इव उपमायाम् । अनेन अवनेर्वनितात्वम् उपमागुणः सादृश्ये । कुचः कीदृशः । मध्ये श्यामः । चूचुकप्रदेशेऽसितवर्णः । शेषविस्तारपाण्डुः मध्यादवशिष्टपरिणाहभागे गौरः । अचलपदेन स्तनस्यापि पीनता उत्तुङ्गता च गम्येते । तदिदं मनोहरत्वादुक्तं नूनमित्यादि । नूनं निश्चितं यास्यति गमिष्यति अवस्थां दशाम् । कीदृशीम् । अमरमिथुनप्रेक्षणीयां देवदम्पतिदर्शनीयाम् । अतश्चोत्प्रेक्षेयम् । नूनं मन्ये मरुद्द्वन्दानि शृङ्गारवन्त्येनमवनिस्तनत्वेनोत्प्रेक्षिष्यन्ते । गगनगतित्वादमरा एव गिरेः सामग्र्यग्राहिणो न भूचराः तेषां तदेकदेशदर्शित्वात् । अमुना सतामुपकारकरणं सद्य एव फलतीति भावः । अत्रोपमा ।

प्रशस्तवस्तुदर्शनमस्योपदिशन्नाह ।

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गाद् द्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां पश्यस्युपलविषमे विन्ध्यपादे विकीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

(a) तस्मिन् स्थित्वा J. (b) तोयोत्सर्गद्रुत॰ V. J. D. M. Mss. support S. (c) विशीर्णां V. J. D. M.

[वनचराणां वधूभिः भुक्तानि कुञ्जानि यस्मिन् तादृशे तस्मिन् मुहूर्तं स्थित्वा तोयस्य उत्सर्गेण द्रुततरा गतिः यस्य एवंविधः, तस्मात् परं वर्त्म तीर्णः (सन्), उपलैः विषमे विन्ध्यस्य पादे विकीर्णां रेवां, गजस्य अङ्गे भक्तीनां छेदैः विरचितां भूतिं इव, द्रक्ष्यसि.

On this mountain, where the thickets are enjoyed by foresters' wives, stop for a while, and, covering the distance that lies beyond with a speed quickened by a discharge of water, you will see Narmada with its

waters scattered on a spur of the Vindhya with its uneven rocks, looking like the festive painting on the body of an elephant, made up of sections of various patterns.]

स्थित्वा तस्मिन्नित्यादि। स्थित्वा उषित्वा तस्मिन्नाम्रकूटे कटकिनि किंविशिष्टे। वनचरवधूभुक्तकुञ्जे किरातकान्तासेवितलतापिहितप्रदेशे। वनचरपदे सप्तमी लुब्धकबहुलत्वात्। अनेन संभोगयोग्यरहःस्थानकथनम्। मुहूर्तं क्षणमात्रम्। एतेन अत्यासक्तेर्निषेधः। तोयोत्सर्गाद् उदकत्यागाद् द्रुततरगतिस्त्वरितगमनः तत्परं तस्माद्गिरेरनन्तरं वर्त्म तीर्णः पन्थानमतिक्रान्तः। तोयत्यागेन वर्त्मतरणकारणं लाघवमुक्तम्। त्वं रेवां नर्मदां द्रक्ष्यसि प्रेक्षिष्यसे। कीदृग्विधाम्। विन्ध्यपादे विकीर्णां विन्ध्यस्य प्रसिद्धशिखरिणः पादे प्रत्यन्तपर्वते विकीर्णां विशीर्णाम्। एतेन संस्थानकथनम्। कीदृशि। उपलविषमे शिलापुटस्थपुटे। असुना विकरणमुक्तम्। तामुपमिमीते। भक्तिच्छेदैर्विच्छित्तिपत्रभङ्गैः इव सादृश्ये विरचितां विन्यस्तां भूतिं रक्षां अङ्गे गात्रे गजस्य कुञ्जरस्य। एतेन विन्ध्यस्य पादपदाभिधानेन सिन्धुरत्वाध्यारोपः तदङ्गोन्द्भासिभूतिपत्रावलीसादृश्यप्रकाशनेन रेवाया रामणीयकं दूरादवलोक्यमानत्वं चोक्तम्। अत्रोपमा।

तोयत्यागोपवर्षितस्यास्य पथि पथ्योपदेशार्थमाह।

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

(b) जम्बूषण्ड॰ V.

[वान्ताः वृष्टयः येन सः, तस्याः तिक्तैः वनगजानां मदैः वासितं, जम्बूनां कुञ्जैः प्रतिहतः रयः यस्य एवंविधं तोयं आदाय गच्छेः. घन, अन्तः सारः यस्य तादृशं त्वां तुलयितुं अनिलः न शक्ष्यति. सर्वः हि रिक्तः (सन्) लघुः भवति; पूर्णता गौरवाय (भवति).

1. Ms. त्यागे.

After having vomitted showers, take in the water of this river, rendered aromatic with the pungent ichor of forest elephants and having its velocity blocked by the Jambū thickets through which it has passed; and when you go forth with solid substance inside, oh cloud, the wind would not dare to show you discourtesy for, a man without substance is ever slighted, while fullness of substance makes for respect.].

तस्यास्तिक्तैरित्यादि । हे घन वारिवाह तोयं आदाय गच्छेः जलमुपयुज्य व्रजेः तस्याः नर्मदायाः । कीदृशम् । वासितं अनुविद्धं सुगन्धि । कैः । वनगजमदैः काननकरिदानद्रवैः । अमुना विन्ध्याद्रेर्गजाश्रयत्वमुक्तम् । कीदृशैः । तिक्तैः तिक्तरसैः । कीदृक् । जम्बूकुञ्जप्रतिहतरयं नीरजजम्बूलताजालस्खलितवेगम् । अनेनास्य कषायतोपपत्तिः । अथवा प्रवाहस्थिरत्वकथनं यस्मादतिवेगेन प्रवाहस्य पयः पातुं न शक्यते । त्वं किंविशिष्टः । वान्तवृष्टिः कृततोयत्यागः । वान्तस्य च तिक्तः कषायश्च रसः प्रशस्यते । पयःपानसंतर्पितं अन्तःसारं जातबलं अनिलः समीरः त्वां भवन्तं तुलयितुं न शक्ष्यति न प्रभविष्यतीति । विहितवमनादिशुद्धीनां रिक्तकोष्ठत्वेन निःसारं शरीरं मरुदभिभवति । तदर्थान्तरन्यासेन निरूपयति । रिक्तः सर्वो भवति हि लघुः । हिर्यस्मादर्थोऽपि । यः कोपि रिक्तः क्षीणविभवः स लघुरनादरणीयः । पूर्णता गौरवाय समृद्धिरादरार्थं सर्वस्य भवतीति वाक्यशेषः । श्लेषार्थान्तरन्यासयोः संसृष्टिः ।

मार्गोपदेशकप्रकाशनार्थमाह ।

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

(c) जग्ध्वा D. M.

[अर्धैः रूढैः कैसरैः हरितं च कापिशं च नीपं दृष्ट्वा, आविर्भूताः

प्रथमाः मुकुलाः यासां ताः कन्दलीः च अनुकच्छं (दृष्ट्वा) दग्धेषु अरण्येषु अधिकं सुरभिं उर्व्याः गन्धं आघ्राय च सारङ्गाः जललवान् मुञ्चातः ते मार्गं सूचयिष्यन्ति.

When the deer see the nīpa of a greenish-tawny colour with half-grown filaments, and when they see wild plantains in each marshy place putting forth their first sprouts, and when they smell the aroma of of the earth growing sweeter in the burnt-down forests, they will afford an indication of the route taken by you, the discharger of rain-drops.]

नीपं दृष्ट्वेत्यादि। सारङ्गाश्चातका मार्गमध्वानं सूचयिष्यन्ति कथयिष्यन्ति। कस्य। तव। कीदृशस्य। जललवमुचः तोयकणवर्षिणः। कारणगर्भं विशेषणम्। ते हि त्वदर्पितप्रथमोदबिन्दूनादित्सवः समुत्सुकाः पुरा प्रधावन्ति। ततो मार्गोपदेशका भविष्यन्ति। तेषां मदागमनज्ञानमपि कुत इति चिह्नमाचष्टे। नीपं दृष्ट्वा कदम्बकुसुममालोक्य। कीदृशं। हरितकपिशं नीलकपिङ्गलं। कैः। केसरैः मकरन्दाधारैः अर्धरूढैः सामिसमुद्भिन्नैः। तद्धि जलधराभिगमे समुन्मीलति। न केवलं तदेव। कन्दलीश्च। चकारो नीपपुष्पापेक्षया समुच्चये। किंभूताः। आविर्भूतप्रथममुकुलाः संजातनूतनकोरकाः। क। अनुकच्छम्। अनुशब्दः कर्मप्रवचनीयोभिव्याप्तौ। कच्छं कच्छं अनु अनुकच्छं सरित्तीरदेशे। प्रतीत्यन्तरमपि निरूपयति। मद्दूर(?)चाक्षुषं। प्रत्यक्षेणैव घ्राणैरपि ग्रहणमित्याह। गन्धमाघ्राय चोर्व्याः। गन्धमामोदं आघ्राय सिंघित्वा। चकारः क्रियासमुच्चयार्थः। उर्व्याः पृथिव्याः। गन्धश्च भाविक एव। जलकणसिक्तायाः पुनर्भूयात्। भवतीत्युक्तम्। दग्धारण्येषु ग्रीष्मतापप्लुष्टकाननेषु अधिकसुरभिं अतिशयसुगन्धिम्। अन्ये चान्यथा व्याचक्षते। सूचयिष्यन्ति ऊहिष्यन्ति मार्गं 'अमुनायं यातः' इति। सारङ्गा यन्ति सारङ्गा भृङ्गाः। नीपं दृष्ट्वा सारं शीघ्रं गच्छन्तीति सारङ्गा गजाः। वसुंधरायाश्च गन्धमाघ्राय। एतच्चेतश्चमत्कारि न भवतीत्यनादरदर्शितम्। यतोभिहितः कर्तृपक्षे क्रियासमुच्चयो न घटते। कर्तृसमुच्चये सारङ्गसमेक... ... सह समुच्चीयते। किं च भूवा-

रिणां वारणहरिणानां गगनगामिनो घनस्य मार्गोपदेशकत्वमयुक्तम् । न च गजमृगभृङ्गाणां सारङ्गाभिधानं प्रसिद्धमिति । अत्रानुमानम् ।

पाथोदस्य पथि रामणीयकविलोकनेन कालविलम्बं निषेधयितुमाह ।

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥२२॥

(c) सनयनजलैः V.

[सखे, मत्प्रियार्थं द्रुतं यियासोः अपि ककुभैः सुरभौ पर्वते पर्वते कालक्षेपं उत्पश्यामि. शुक्लं अपाङ्गं येषु तैः सजलैः नयनैः केकाः स्वागतीकृत्य प्रत्युद्यातः भवान् कथमपि आशु गन्तुं व्यवस्येत्.

Although to do me a good turn, oh my friend, you would be wanting to go quickly. I anticipate delays for you on every mountain, fragrant with Kuṭaja flowers. Received by peacocks with eyes full of tears of joy, uttering their cries as words of welcome, please manage somehow to go forth without delay.]

उत्पश्यामीत्यादि । हे सखे वारिवाह उत्पश्यापि उत्प्रेक्षे कालक्षेपं कालविलम्बम् । कस्य । भवतः । कीदृशस्य । यियासोः जिगमिषोः । कथं । द्रुतं सत्वरमपि । किमर्थं । मत्प्रियार्थं मद्धितहेतोः अस्मत्प्रियासंदेशकथनार्थं वा । क । पर्वते पर्वते भूभृति भूभृति । वीप्सायां द्विरुक्तिः । किंभूते । ककुभसुरभौ अर्जुनसुगन्धौ । विशेषणं वर्षाधर्मवर्णनद्वारेण शिखरिणो रमणीयताकथनार्थं । किमर्थं पुनः कालातिक्रम इति कारणमाह । शुक्लापाङ्गैः । केकिभिः । कीदृशैः । सजलनयनैः चिरकालसुहृद्दर्शनेन बाष्पवारिपूरितनेत्रैः । केकाः स्वगिरः स्वागतीकृत्य स्वागतं विधाय प्रत्युद्यातः प्रत्युद्गत इत्यर्थः । कृतातिथ्य इत्यर्थः । कथमपि महता यत्नेन यदि भवान् गन्तुं प्रयातुं आशु शीघ्रं

व्यवस्येद् व्यवसायं कुर्याद्। यतः संप्रति स्फुटदभिनवककुभकुसुमसुरभिभूधरनिबद्धवसतेः सादरोदीरिततारमयूररवाकर्णनमुदितचेतसः तव कियतीरपि कालकलाः विलम्बः संभाव्यत एवेति वितर्कः। प्रार्थनीयमथवा। सखित्वा-त्त्वामहमेवमर्थये। पथिस्थितियोग्यानप्यर्थानवहाय मदर्थं कथमपि प्रणिधानं विधाय भवानाशु गन्तुं व्यवस्येद् व्यवसायं कुर्यात् गमनेषु विदध्याद्बुद्धिमिति। अत्रानुमानम्।

अथ संबद्धे देशे समृद्ध्यभिधानेनाम्भोदं भूयः प्रलोभयन्नाह।

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२३॥

(c) फलपरिणति श्याम० V.

[आसन्ने त्वयि, दशार्णाः, भिन्नाः सूचयः येषां तादृशैः कैतकैः पाण्डुः छाया यासां तादृश्यः उपवनानां वृतयः येषु तादृशाः, गृहसंबन्धिनां बलिभुजां नीडानां आरम्भैः आकुला ग्रामचैत्याः येषु तादृशाः, परिणतं फलं येषां अतः एव श्यामाः जम्बूवनानां अन्ताः येषु तादृशाः, कतिपयानि दिनानि स्थायिनः हंसाः येषु तादृशाः संपत्स्यन्ते.

At your arrival the Das'ārṇa country will have its garden hedges of Ketakas, of which the point of the flower is bursting in view, of a yellowish colour, its holy trees of the villages will be full of the bustle of crows, the eaters of domestic offerings, they having started building their nests, and while the Jambu woods there would look dark on account of the ripeness of the fruit, swans will be now resting there only for a few days more.]

पाण्डुच्छायइत्यादि। संपत्स्यन्ते संपत्तिभाजो भविष्यन्ति त्वय्यासन्ने भवति निकटवर्तिनि दशार्णानामाने जनपदाः। पाण्डुच्छायोपवनवृतयः पाण्डुच्छाया अवदातकान्तयः उपवनानां उद्यानानां वृतयः कण्टकिवीरुधां वृतयः येषु ते तथोक्ताः। केतकैः केतकीकुसुमैः सूचिभिन्नैः सूचिसमुद्भूतैः। अनेन तेषां केतकीतरुषण्डमण्डितत्वमुक्तम्। पुनः किंभूताः। आकुलग्रामचैत्याः आकुलाः विसंस्थुलाः ग्रामाणां चैत्याः पूज्यपादपाः येषु ते तथाविधाः। कैः। नीडारम्भैः आलयोपक्रमैः गृहबलिभुजां भवनवायसानाम्। अनेनाहिंस्रजनताभिरामग्रामताप्रतिपादनम्। पुनरपि कीदृशाः। परिणतफलश्यामजम्बूवनान्ताः परिणतफलैः पक्वफलैः श्यामाः कालकान्तयः जम्बूवनान्तानां अन्ताः पर्यन्ताः येषु तादृशाः। अनेन प्रचुरवनमनोरमसीमत्वमुक्तम्। पुनः किंभूताः। कतिपयदिनस्थायिहंसाः कतिपयदिनानि तिष्ठन्तीत्येवंशीलाः हंसाः मरालाः येषु ते तादृग्विधाः। अमुना मनोहरत्वकथनम्। ते हि तूर्णप्रतिष्ठाः सर्वेपि सुखवासलालसाः त्रिचतुरवासरान् विलम्ब्य मानसं प्रति प्रयान्ति। तत्रायमभिप्रायः। प्रावृट्स्वभावोद्भावनव्याजेन जलदस्य उद्दीपनविभावत्वसामर्थ्यसमर्थनं शृङ्गारोपयोगित्वेन दशार्णानां च वर्णनम्। अत्र उपमानमलंकरणम्।

मार्गनगरीसंभोगलाभभाषणेन जलदं प्रहर्षयन्नाह।

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्तत्
सभ्रभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥२४॥

(b) फलमपि महत् J. (c) स्वादु यत्र J. (d) चलोर्म्याः J.

[दिक्षु प्रथितं विदिशा लक्षणं यस्याः तादृशीं तेषां राजधानीं गत्वा कामुकत्वस्य अविकलं फलं (भवान्) सद्यः लब्धा; यत् वेत्रवत्याः तत्, चलाः ऊर्मयः यस्मिन् तादृशं, तीरस्य उपान्ते स्तनितेन सुभगं, स्वादु पयः, भ्रुवः भङ्गेन सहितं मुखं इव पास्यसि.

When you go to the capital of this country, of which the name Vidis'a is illustrious in all the quarters,

you will immediately realise the complete fruit of your amorous propensity inasmuch as, beautiful with the murmurs on the edges of her banks, you will drink, as though it were her mouth with frowning eye-brows, the water of the Vetravatī with its ruffled billows.]

तेषां दिक्षु इत्यादि । तेषां प्रस्तुतत्वात् दशार्णदेशसंबन्धिनीं राजधानीं नृपतिवसतियोग्यनगरीं दिक्षु आशासु (प्रथितविदिशालक्षणां) प्रथितं विदिशाभिधानं अधुनाप्रसिद्धं सैव लक्षणं अभिज्ञानं अस्याः । समीपवर्तिनीं पुरीं तां गत्वा समासाद्य । सद्यः गमनानन्तरमेव कामुकत्वस्य कामिभावस्य फलं प्रीतिरूपं अविकलं परिपूर्णं त्वं लब्धा लप्स्यसे । कुतः । यत् यस्मात् । उक्तविशेषणविशिष्टं फलमिति विशेषणं वा । यत् नदीवेत्रवत्याः सरितः पयः पानीयं । पास्यसि घास्यसि । मुखमिवेत्युपमा स्यात् । तद्गुणसादृश्ये वदनोपादानात् । अत्र वेत्रशब्देन वेत्रिणः उपचर्यन्ते (तत्स्थ्यो तद्रक्षावती काचित् रक्षावती नायिका वेत्रवती ?) । तस्यालपनचुम्बनं बाह्यरतं तदनन्तरमाभ्यन्तरं सुरतमिति संभोगक्रमः । तत् तस्याः पयः । किंविशिष्टम् । स्वादु रसनेन्द्रियप्रह्लादनं वदनं च तथाविधं । उभयत्रापि माधुर्यगुणानुगमः । तथा चलोर्मि चञ्चलवीचि जलं । सभ्रूभङ्गं सविलासमास्यम् । अत्रापि भङ्गुरतरङ्गाणां बलात् विभ्रमाभिरामभ्रुवोऽर्थश्रुतगुणेनैव तयोः सादृश्यम् । तद्धि तीरोपान्ते तटनिकटदेशे प्रतिहत्य । स्तनितं ध्वनितं तेन सुभगं सुन्दरं वारि । मणितमनोहरं आननं । अनयोरेव रमणीयतागुणः साधारणः । अत्रोपमा ।

विलासिवासोचितसुहृन्निकेतनविश्रामोपदेशेन अस्य आत्मप्रीतिं प्रकटयन्नाह ।

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥

25. (a) विश्रान्तिहेतोः J.

[तत्र विश्रामहेतोः, प्रौढानि पुष्पाणि येषां तैः कदम्बैः तव संपर्कात् पुलकितमिव, नीचैः आख्या यस्य तं गिरिं अधिवसेः, यः पण्यस्त्रीणां रत्यर्थः परिमलः तं उद्गिरन्ति अमूनि तादृशैः शिलामयैः वेश्मभिः नागराणां उद्दामानि यौवनानि प्रथयति.

There to rest yourself, stay on the mountain Nīcaiḥ, which will have horripilation as it were at your touch with its full-blown Kadamba flowers, and which discloses with its rock-cut houses, emitting the toilet-perfumes of courtezans, the irrepressible youth of the citizens.]

नीचैराख्यमित्यादि। नीचैरिति संज्ञा यस्य तं नीचैर्गिरिं अधिवसेः अध्यासीथाः। किमर्थम्। तस्मिन्नद्रौ विश्रामहेतोः मार्गखेदापनोदाय। वौ श्रमेरिति विभाषया दीर्घः। किंभूतं तम्। पुलकितं इव सञ्जातरोमाञ्चमिव। त्वत्संपर्कात् भवत्समागमात्। सुहृदालिङ्गनेन प्रणयिनः पुलककलितवपुषः संपद्यन्ते। कैः। कदम्बैः नीपपादपैः। कीदृशैः। प्रौढपुष्पैः विकसितपुष्पैः। तदवस्थानि तानि पुलकाङ्कुराकाराणि भवन्ति। कीदृशोसौ। यः प्रथयति प्रख्यापयति। नित्यप्रवृत्तत्वात् वर्तमाननिर्देशः। यौवनानि तारुण्यानि। कीदृशानि। उद्दामानि उदाराणि। केषाम्। नागराणाम्। प्रायस्तरुणवनितासु पुंसां रतयः स्त्यायन्ते। कैः। शिलावेश्मभिः उपलगृहैः। कीदृशैः। पण्यस्त्रीरतिपरिमलोद्गारिभिः पण्यस्त्रीणां पण्याङ्गनानां सुरतकेलिषु परिमलास्तेषु पुरुषलिप्तचन्दनाधिवासादामोदस्तमुद्गिरन्ति उद्वमन्तीत्येवंशीलानि तैः। अनेन नगरतरुणानां विलाससंपत्तिः गिरिग्रावमयमन्दिरैरुद्गिरणक्रियासामर्थ्यादनेकैर्मुखैर्व्याख्यातेति गम्यते तस्मिञ्जनतास्वस्थ्यानि वासनिर्वृत्तिश्चोक्ता। अत्रोत्प्रेक्षा नामालंकृतिः। तथा च। अन्यथैव स्थिता वृत्तिः चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां प्रचक्षते[4] ॥ (दण्डी, २,२२१.)

---

1. Ms. °दि°. 2. Ms. °स्वै°. 3. Ms. °त्या°. 4. Edn. विदुर्यथा.

कामलाभानुविद्धमध्वानमुपदेष्टुमाह ।

विश्रान्तः सन्व्रज नवनदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २६ ॥

(a)वननदी V. J. D. M. तीरजानां निषिञ्चन् J. D.

[विश्रान्तः सन्, नवनद्याः तीरेषु जातानि उद्यानानां यूथिकाजालकानि नवजलस्य कणैः सिञ्चन्, गण्डयोः स्वेदः तस्य अपनयनेन या रुजा तया क्लान्तानि कर्णोत्पलानि येषां तादृशानां पुष्पलावीनां मुखानां छायायाः दानात् क्षणं परिचितः, व्रज.

Having rested yourself, go forth sprinkling the yūthikā-thickets of the gardens growing on the banks of the Navanadī with a spray of your fresh showers, having made, by shading them from the sun, a momentary acquaintance with the faces of the flower-girls, with their ear-lotuses fading by the friction caused by wiping the perspiration on their cheeks.]

विश्रान्तःसन्नित्यादि। विश्रान्तः कृताध्वखेदापनोदः सन् व्रज यायाः। किं कुर्वन्। सिञ्चन् उक्षन् नवजलकणैः प्रथमोदबिन्दुभिः यूथिकाजालकानि मल्लिकालतानिकुरम्बाणि। उद्यानानां आरामाणाम्। किंभूतानि। नवनदीतीरजातानि नवनदीनाम्न्याः सरितस्तटसंभूतानि। अमुना संभोगयोग्यस्थानकथनम्। कीदृशस्त्वम्। क्षणपरिचितः क्षणे तस्मिन् समये क्षणं मुहूर्ते च परिचितः प्रणयीभवन्। पुष्पलावीमुखानां पुष्पाणि लुनन्ति पुष्पलाव्यः। कर्मण्यण्। तदन्तात् ङीप्। तन्मुखानां आननानाम्। कुतः। छायादानात् आतपप्रतिषेधात्। तास्त्वामुन्मुख्यः साभिलाषमालोकयिष्यन्ति। कीदृशामेषाम्। क्लान्तकर्णोत्पलानां म्लानश्रवणावतसेन्दीवराणाम्। केन कारणेन। गण्डस्वेदापनयनरुजा पुष्पावचयप्रयासजनितकपोलश्रमजलप्रोञ्छनपीडया। अत्र

मालिकलीलावतीनां ललितत्वं तथा कर्णाभ्यर्णलोचनाञ्चलरुचा म्लानिमानीतान्यधःकृतानि कर्णोत्पलानि इति प्रतीयते। अत्रानुमानम्।

विशेषविषयानुप्रसिद्धये मार्गान्तरं निरूपयन्नाह।

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २७ ॥

(a) तत्र भवतु च प्र° D. (b) मा च भूः D. (d) वञ्चितः स्याः J.D.

[यदपि उत्तरां आशां प्रस्थितस्य भवतः वक्रः पन्थाः (स्यात्), (तथापि) उज्जयिन्याः सौधानां उत्सङ्गेषु प्रणयस्य विमुखः मा स्म भूः. तत्र विद्युद्दाम्नां स्फुरितेन चकितैः पौराणां अङ्गनानां, लोलाः अपाङ्गाः येषां तादृशैः लोचनैः यदि न रमसे, वञ्चितः असि.

Although they would be out of the way, as your destination lies in a northerly directions, do not please be averse to making friends with the laps (terraces) of the mansions of Ujjayinī. If you are not delighted there with the city damsels' eyes, frightened by your continuous flashes of lightning and casting tremulous side-glances, surely you will have lost (a life's opportunity).]

वक्रःपन्थेत्यादि। पयोद यदपि यद्यपि भवतः तव उत्तरस्यां प्रस्थितस्य उदीचीमञ्चतः किल वक्रः पन्थाः कुटिलो मार्गः। तथापि मा स्म भूः मा स्म भवः। कीदृशः। सौधोत्सङ्गप्रणयविमुखः सौधानां सुधाधवलितसद्मनां उत्सङ्गः क्रोडः तस्य प्रणयः परिचयः तस्माद् विमुखः पराङ्मुखः। उज्जयिन्याः अवन्त्याः। एतेन तत्संबन्धिसौधाभिधानेन पयोधर(!)त्वं उत्सङ्गपदेनोज्जयिन्या अङ्गनात्वम्। एनामनासाद्य मा गा इत्यभिहितं भवति। तस्याः संगमाभावे भवत् संभववैफल्यं प्रदर्शयति। त्वं यदि न रमसे न क्रीडसि। तत्र तस्यां पुरि पौराङ्गनानां नगरनारीणां विलोचनैर्नेत्रैः। कीदृशैः।

विद्युद्दामस्फुरितचकितैः अचिररुचिगुणप्रेङ्खितत्रस्तैः। पुनः कीदृग्भिः। लोलापाङ्गैः चटुलप्रान्तैः। भीतिविलोकितं च विलोचनानां कामिनो हरति स्वभावसुन्दरत्वात्। अनेन वक्रविलोकितविलासोपन्यासेन तासामनुरक्तिरुक्ता। तदा त्वं वञ्चितोसि व्यर्थजन्मफलो भवसीत्यर्थः। अत्र प्रेयस्वदलंकरणम्। तथा च। रत्यादिकानां भावानामनुभावादिसूचनैः। यत्काव्यं बध्यते सद्भिः तत्प्रेयस्वदुदाहृतम्॥ (उद्भट, ४३)

उज्जयिनीमार्गोपदेशापदेशेनास्य शृङ्गाराङ्गनासंगममाह।

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥ २८॥

[पथि, वीचीनां क्षोभेण स्तनितानां विहगानां श्रेणिरेव काञ्चीगुणः यस्याः, स्खलितेन सुभगं संसर्पन्त्याः, दर्शिता आवर्तः एव नाभिः यया, तादृश्याः निर्विन्ध्यायाः संनिपत्य रसस्य अभ्यन्तरः भव. विभ्रमः हि स्त्रीणां प्रियेषु आद्यं प्रणयस्य वचनम्.

You will meet Nirvindhya on your way, moving briskly with a beautiful faltering gait, showing her navel of eddies, flights of birds, screaming over her agitated waves, constituting her girdle. Have an intimate taste of her love (water); for sportive movements form women's first expression of love to their lovers.]

वीचिक्षोभेत्यादि। निर्विन्ध्याया निर्विन्ध्याभिधानायाः नद्याः। पुरन्ध्र्याश्च तत्साधर्म्यमपि चास्या विवक्षितम्। तथाविधविशेषणोपादानात्। तदेव दर्शयति। वीचीत्यादि। वीचिक्षोभेण कल्लोलचलनेन स्तनितविहगश्रेणिः वासितशकुन्तपङ्क्तिः सैव काञ्चीगुणः मेखलादाम यस्याः सा तथोक्ता तस्याः। स्त्रीपक्षे श्रेणिवद्रूपमद अनेन विग्रहः। संसर्पन्त्याः प्रयान्त्याः। स्खलितसुभगं स्खलितेन शिलादिप्रतिबन्धेन सुभगं सुन्दरम्। कामिन्याश्च कमनीयकामुक

विलोकनाद्भ्रमनं विलासोऽस्ति ... प्रकाशिता आवर्तः पयसां भ्रमः स एव नाभिर्यया सा तथाविधा तस्याः । किं कृत्वा । रसाभ्यन्तरं संनिपत्य अम्भोगर्भमाभिसंश्लिष्य पयः पिबेति यावत् । कामिन्याश्च पथि भव तन्मार्गमनुसर तां भजेथा इत्यर्थः । रसः शृङ्गारः तस्याभ्यन्तरं संनिपत्य तन्मयतां उपेत्य । यदि वा रामानुराग आस्वादो वा तदभ्यन्तरं मध्यं अनुभूय भूयः पथि भव मार्गं गच्छ गमनमनुतिष्ठ तत्रासक्तिं मा कृथा इति । ननु तदभिलाषमजानता कथं प्रवर्त्यते । तदर्थमाह स्त्रीणामित्यादि । स्त्रीणां योषितां प्रियेषु वल्लभेषु विभ्रमविलासप्रकारानमेव हि यस्माद् आद्यं प्रथमं प्रणयवचनं प्रीतिसंभाषणं प्रार्थनावचो वा । इदमुक्तं भवति । युवतयस्तदनुरक्तान्तःकरणवृत्तयोऽपि कान्तेषु रत्यभिप्रायं स्वविभ्रमैरेव आविर्भावयन्ति । न च याच्ञां विरचयन्ति लाघवभयादेव । नाभ्यादिप्रकटनेन स्पष्टीकृतम् (!) । तथा चोक्तम् । आकारैरिङ्गितैर्गत्या चेष्टया भाषणैरथ । नेत्रवक्त्रविकारैस्तु गृह्यतेऽन्तर्गतं मनः ॥ अत्र रूपकश्लेषार्थान्तरन्यासरसवत्तासंकरः । तथा च । यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा । अविवक्षितसामान्या कल्प्यत इति रूपकं प्राहुः ॥ (रुद्रट, ८, ३८) । रसवद्दर्शितस्पष्टशृङ्गारादिरसोदयम् । स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम् ॥ (उद्भट, ४४) । अलंकारकलापोऽयं स्फुरत्संकीर्णतां गतः । वाक्ये वाक्यैकदेशे वा संकरः स निरुच्यते ॥

मार्गोपदेशद्वारेण पयोदस्य वनितात्वेनाभिधीयमाननदीद्वयविरहावस्थाकथनेन तन्नाथतां निरूपयितुमाह ।

वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥

(a) J. like S. °सलिलां तामतीतस्य सिन्धुं V. सा त्वतीतस्य D.
(b) पाण्डुच्छायां V. (c) व्यञ्जयन्तीं V.

[सुभग, तां अतीतस्य ते सौभाग्यं विरहावस्थया व्यञ्जयन्ती, वेणीभूतं प्रतनु च सलिलं यस्याः, तटे रोहद्भ्यः तरुभ्यः भ्रंशिभिः जीर्णैः

पर्णैः पाण्डुः छाया: यस्याः तादृशी सिन्धुः येन विधिना का
त्यजति सः त्वया एव उपपाद्यः

After having gone past her, there would be the riv Sindhu, whose watery body would be slender, formi just a tiny streak of a pale appearance, with t withered leaves dropping from the trees on the ban disclosing by her love-sick condition your luck i love. Well-favoured cloud, it is only you, who ca devise means by which she would abandon he emaciation.]

वेणीभूतेत्यादि । वेणीभूतप्रतनुसलिला । वेणी त्रिगुणा ग्रथिता केशरचना प्रायं । वेणीभूतं अवेणी वेणीभूतम् प्रतनु स्तोकप्रवाहं सलिलं उदकं यस्या सा तादृक् । वेणीबन्धो विरहिणीधर्मः । तां निर्विन्ध्यां अतीतस्य अतिक्रान्त स्य अग्रे सिन्धुनामधेया नदी । कीदृशी । पाण्डुच्छाया सितकान्तिः । कैः शीर्णपत्रैः परिणतपर्णैः । कीदृशैः । तटरुहतरुभ्रंशिभिः कूलजकुञ्जभ्रंशिभिः किंभूता वर्तते । व्यञ्जयन्ती प्रकटयन्ती सौभाग्यं सुभगत्वं ते तव । सुभग भामिनीवल्लभ विरहावस्थया वियोगदशया । प्रियावियुक्तवनितानां तनुः पाण्डुः कृशा च भवति । ततः कार्श्यं कृशिमानं येन विधिना प्रकारेण त्यजति जहाति स विधिः त्वयैव नापरेण उपपाद्यः उत्पादनीयः । स्ववृष्ट्या पुष्टेयं कर्तव्येत्यर्थः । केचित् सिन्धुमिति कर्मपदं पठन्ति । तदा कार्श्यं कर्तृ तां त्यजतीति । न स सदन्वयः । अथेदमुक्तं भवति । यथा कामिनीनां वियोगदशाकृशिम्नः प्रियतरसंभोगव्यतिरेकेण नापरः प्रतीकारः तथा वारिद वर्षाद्दते तरङ्गिणीनां नान्यस्तन्निमानमपनेतुमीष्टे । अत्र रसवत् ।

मार्गगमनक्रमकथनव्याजेनोज्जयिनीरामणीयविलोकनाय प्रवर्तयितुमाह ।

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-
न्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३० ॥

(b) उपसर for अनुसर J. (3) ... for हृत J.

[उदनयस्य कथायाः कोविदाः ग्रामवृद्धाः येषु तान् अवन्तीन् प्राप्य, पूर्वं उद्दिष्टां, श्रिया विशालां विशालां पुरीं, सुचरितस्य फले स्वल्पीभूते (सति) गां गतानां स्वर्गिणां शेषैः पुण्यैः हृतं, दिवः एकं कान्तिमत् खण्डमिव, अनुसर.

When you go to the Avanti country where each town boasts of elders versed in the Udayana legend, go along to the city of Vis'ālā (Ujjayinī), referred to already, which is great by her opulence, which appears to be a shining piece of heaven brought down to the earth with the remnant of their merit by the inmates of heaven returning to the earth, the fruit of their good deeds having undergone a diminution.]

प्राप्यावन्तीत्यादि । तोयद त्वं प्रतिपादितवर्त्मना अवन्तीन् मालविकाभिधानाञ्जनपदान् प्राप्य आसाद्य । कीदृशान् । उदयनकथाकोविदग्रामवृद्धान् उदयनस्य वत्सराजस्य कथा चिरंतनचरितं तत्र कोविदाः पण्डिताः ग्रामाणां वृद्धाः प्रवयसः येषु तान् । ते हि तत्रत्याः पुरातनाः सुरपतिसुताहरणप्रवीणवेणिवत्सराजविजयवेदिनः सदैव सुखसंकथया आस्थानीषु समयं गमयन्तीति तद्विशेषणम् । पूर्वोद्दिष्टां पुरीं नाममात्रसूचितां तां अनुसर गच्छ पुरीं नगरीम् । किमभिधानाम् । विशालां । विशालेत्युज्जयिन्या नाम । यदि वा विशिष्टाः शालाः प्राकारा भवनविशेषा वा यस्यां ताम् । कीदृशीम् । श्रीविशालां श्रिया लक्ष्म्या विशालां विस्तीर्णाम् । तामेव वर्णयति । स्वल्पीभूते उपभोगादपचितपरिमाणे सुचरितफले श्रेयःकर्मोपार्जिते स्वर्गोपभोगलक्षणे स्वर्गिणां नाकिनां गां गतानां अवनिमागतानाम् । शेषैः पुण्यैः अवशिष्टैः अदृष्टविशेषैः हृतं आनीतं । इव शब्दः पादान्तरेण संबन्ध्यते । दिवः स्वर्गात् तत्संबन्धि वा । खण्डमिव एकदेश इव कान्तिमत् श्रीमत् एकमद्वितीयम् सकलस्पर्धिलोकस्य मध्यान्मनोहरम् । इदमत्र तात्पर्यम् । तान् तादृग्विधसमृद्धिमतीमवलोकयन्तो लोका भूलोकपुरीयं न भवति स्वर्गविभाग एवास्मद्भाग्यैर्भुवमभ्यानीत इत्युत्प्रेक्षन्ते । अत्रोत्प्रेक्षा ॥

उज्जयिन्या विलासिनीवासोचितत्वं सूचयन्नाह ।

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥

(a) शिप्रा॰ M.

[यत्र प्रत्यूषेषु मदेन कलं सारसानां कूजितं दीर्घीकुर्वन्, स्फुटितानि कमलानि तेषां आमोदेन मैत्री तया कषायः, अङ्गानां अनुकूलः, प्रियतमः इव प्रार्थनायां चाटु करोत्यसौ तादृशः सिप्रावातः स्त्रीणां सुरतस्य ग्लानिं हरति.

—To that city, where the breeze that wafts from Siprā, prolonging the sonorous warblings of the Lakṣmaṇa birds, sweetly indistinct by love, rendered astringent by its association with the fragrance of the full-blown lotuses in the early mornings and coaxing in entreaty like a lover removes, by its grateful touch, the fatigue of amorous sport.]

दीर्घीकुर्वन्नित्यादि । यत्र यस्यामुज्जयिन्यां स्त्रीणामङ्गनानां सुरतग्लानिं संभोगजश्रान्तिं हरति अपनयति सिप्रावातः । सिप्रा तन्निकटतटिनी तस्या मरुत् । अनेन अस्य शैत्यं प्रतिपादितम् । कीदृग् । अङ्गानुकूलः स्पर्शसुखदः । एतेन मान्द्यमुक्तम् । स्फुटितकमलामोदमैत्रीकषायः स्फुटितानि विकसितानि कमलानि कोकनदानि तेषामामोदः परिमलः तस्य मैत्री संपर्कः तया कषायः प्राप्तवासः सुगन्धिः । अमुना सौरभ्यमभिहितम् । कस्मिन् समये । प्रत्यूषेषु प्रभातेषु । बहुवचनेन कालाभिव्याप्तिः । प्रातः प्रातरित्यर्थः । किं विदधत् । दीर्घीकुर्वन् प्रसारयन् कूजितं विरुतं सारसानां लक्ष्मणाख्यपक्षिणाम् । कीदृग् । पटुः उत्कटः मदश्चेतोविकारकारी गुणः तेन कलं मधुरं अथवा पटुस्फुटं मदकलं वा । स कीदृशः । प्रियतम इव वल्लभ इव प्रार्थनाचाटुकारः ।

यथा प्रेयान् प्रार्थनया चाटुं प्रियं करोति तथा सोऽपि इति प्रियतमेनोपमितः। अत्र उपमा ।

वक्ष्यमाणं युगलकम् । कामोपभोगलाभेन तं प्रलोभयन्नाह ।

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
नीत्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३२ ॥

(a) °संस्कारधूमैः V.; (b) दत्तनृत्तो॰ V. J. D.; (c) अध्वखेदं नयेथाः D. M.; (d) पश्यन् लक्ष्मीं D. लक्ष्मीं पश्यन्. M. नीत्वा रात्रीं V.

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ॥

(a) दृश्यमानः V. (b) चण्डेश्वरस्य V. D.

[जालेभ्यः उद्गीर्णैः केशानां संस्कारार्थैः धूपैः उपचितं वपुः यस्य, भवनसंबन्धिभिः शिखिभिः बन्धुप्रीत्या दत्तः नृत्यरूपः उपहारः यस्मै, अध्वना खिन्नः अन्तरात्मा यस्य, (एवंविधः त्वम्) अस्याः कुसुमैः सुरभिषु, ललितानां वनितानां पादरागैः अङ्कितेषु हर्म्येषु खेदं नीत्वा,—भर्तुः कण्ठस्य इव च्छविः यस्य इति (हेतोः) गणैः सादरं वीक्ष्यमाणः कुवलयानां रजसां गन्धिभिः, गन्धवत्याः तोये क्रीडायां निरतानां युवतीनां स्नानेन तिक्तैः मरुद्भिः धूतं उद्यानं यस्य एवंविधं, त्रिभुवनस्य गुरोः चण्ड्याः ईश्वरस्य पुण्यं धाम यायाः.

Fatigued by your journey as you would be, pass the night on her flowered mansions, marked with the red dye on the feet of lovely women, your body recouped with the fumes of hair-toilet, issuing from

lattice windows, regaled by the domestic peacocks to a dancing party out of friendly love, looked on with respect by the attendants of S'iva as matching the lustre of their master's throat, go to the sacred temple of the lord of the three worlds, of the consort of Caṇḍī, the gardens of which would be shaken by the breezes of the Gandhavatī, fragrant with pollens of blue lotuses and astringent by the ablutions of young ladies fond of water-sports.]

जालोद्गीर्णैरित्यादि । भर्तुःकण्ठेत्यादि । युग्मम् । जालोद्गीर्णैः वातायनोद्वान्तैः उपचितवपुः पीवरशरीरः । कैः । केशसंस्कारधूपैः केशानां पौरजनमूर्धजानां धूपधूमैरिति गम्यते । धूमस्य पयोदाप्यायकत्वात् । अमुना नागराणां भोगित्ववर्णनम् । भवान्कीदृग् । दत्तनृत्योपहारः दत्तः वितीर्णः नृत्तं ताण्डवं तदेवोपहारः सपर्या यस्मै स तादृशः । कैः । भवनशिखिभिः मन्दिरमयूरैः । केन कारणेन । बन्धुप्रीत्या सुहृत्स्नेहेन । त्वामालोक्य प्रमुदिताः नर्तिष्यन्ति । हर्म्येषु गृहेषु अस्या उज्जयिन्याः कुसुमसुरभिषु पुष्पप्रकरसुगन्धिषु । त्वं अध्वखिन्नान्तरात्मा अध्वना मार्गगमनेन खिन्नः श्रान्तः अन्तरात्मा मनो यस्य स तादृग् । नीत्वा अतिवाह्य खेदं अध्वश्रमम् । कीदृशेषु । ललितवनितापादरागाङ्कितेषु चिह्नितेषु । एतेन विशेषणयुगेन गृहाणां रत्युपकरणत्वमुक्तम् । अत्र विश्रम्य यायाः प्रयाहि । त्वं कीदृशः । वीक्ष्यमाणः विलोक्यमानः गणैः प्रमथैः सादरं प्रयत्नेन । कुतः इति हेतोः । भर्तुः प्रभोः शितिकण्ठस्य कण्ठच्छविः गलकालकान्तिः । जीमूतस्य नीलवर्णत्वात् । किम् । आयतनं । चण्डीश्वरस्य भवानीपतेः भगवतो महाकालस्य । कीदृग् । पुण्यं पावनम् । पुनः किंभूतम् । धूतोद्यानं कम्पितोपवनम् । अमुना मरुतामपरुषत्वमुक्तम् । कैः । गन्धवत्याः मरुद्भिः गन्धवती तरङ्गिणी तस्याः समीरणैः । अनेन शिशिरत्वमुक्तम् । कुवलयरजोगन्धिभिः कुवलयानां उत्पलानां संबन्धिनां रजसां रेणूनां मकरन्दानां गन्धः आमोदः स विद्यते येषां इत्यधिकपदात् इन् तैः । तोयक्रीडानिरतयुवतिस्नानतिक्तैः तोयक्रीडा जलकेलिः तत्र निरताः आसक्ताः युवतयः पौरवनिताः तासां कुङ्कुमाद्युपलेपभाजां स्नानं मज्जनं तेन तिक्तैः तिक्तरसामोदिभिः । सुरभिद्रव्याणि प्राय

तिक्तरसानि भवन्ति । अनेन विशेषणद्वयेन तयोः सौगन्ध्यमुदितम् । एव-मुद्दीपनविभावभूयस्त्वेन शृङ्गारपरिपोषे रतिरत्र भविष्यतीति भावः । एतयो-रुदात्तं नामालंकरणम् । तथा च । आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तरम् । उदात्तं नाम तं प्राहुरलंकारं मनीषिणः ॥ (दण्डी, २. ३००)

नगरीरामणीयकत्वं दर्शयितुमाह ।

*हारांस्तारांस्तरलगुलिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥

(a) घटिका, वुटिका, J. गुटिका. M.

[यस्यां कोटिशः विपणिषु रचितान्, हारान्, तारान् तरलान् गुलिकान्, कोटिशः शङ्खशुक्तीः, उद्गताः मयूखाः येभ्यः ईदृशाः प्ररोहाः येषां तादृशान्, शष्पवत्श्यामान् मरकतमणीन्, विद्रुमाणां च भङ्गान् दृष्ट्वा सलिलानां निधयः तोयमात्रं अवशेषो येषां एवं-विधा संलक्ष्यन्ते.

Where, after one sees crores of necklaces, brilliant pendants of spherical form, conches and shells, emeralds green like grass and sending forth jets of lustre, and pieces of coral, arranged in the (jewellers') stalls, the seas appear to have nothing but water left in them.]

हारांस्तारानित्यादि । यत्र यस्यां पुरि दृष्ट्वा विलोक्य हारान् मुक्ता-सरान् तारान् निर्मलान् तरलगुलिकान् कोटिशः अनेकशः शङ्खशुक्तीः शङ्खाश्च शुक्तयश्च ताः । मरकरतमणीन् गारुडरत्नविशेषान् । कीदृशान् । शष्प-श्यामान् हरितः उन्मयूखप्ररोहान् उद्गतकान्तिपल्लवान् । न केवलमेतान्येव । विद्रुमाणां च भङ्गान् प्रवालानां विच्छेदान् । चकारः समुच्चये । किंभूतान् ।

* The stanza is not genuine and hence is not printed in thick type. See Appendix.

विपणिरचितान् पण्यवीथीस्थापितान् वीक्ष्य । किम् । संलक्ष्यन्ते संकल्प्यन्ते सलिलनिधयः तोयमात्रावशेषाः तोयमात्रं अवशिष्टं येषु ते तथोक्ताः । अस्याय मर्थः । पृथुतरवणिक्सार्थप्रसारितानेकरत्ननिकरं आलोकयन्त एवमुत्प्रेक्षन्ते नूनमत्रानीतरत्नसर्वस्वतया तेषु रत्नाकरेषु तोयमात्रमेवावशिष्टम् । केचित् प्रक्षेपकमिदमिति वदन्ति । अत्रोदात्तोत्प्रेक्षयोः संसृष्टिरिति ।

विशिष्टदेवतादर्शनेन श्रेयःसिद्धिमभिधातुमाह ।

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदभ्येति भानुः ।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३४ ॥

(b) अत्येति J. D. M.

[जलधर, अन्यस्मिन् अपि काले महाकालं आसाद्य यावद् भानुः ते नयनविषयं अभ्येति (तावत्) स्थातव्यम्. शूलिनः सन्ध्यासम्बन्धिनः बलेः श्लाघनीयां पटहतां कुर्वन् आमन्द्राणां गर्जितानां अविकलं फलं लप्स्यसे.

Pay another visit also, oh cloud, to the Mahākāla and, remaining their until the sun is visible, play the honourable rôle of a drum sounded at twilight worship, and you will have completely realised the fruit of your deep rumbling.]

अप्यन्यस्मिन्नित्यादि । हे जलधर । तस्यां पुरि परमेश्वरं श्रीमहाकालं आसाद्य गत्वा अन्यस्मिन्नपि काले समये स्थातव्यं आसितव्यं ते त्वया । कृत्यानां कर्तरि वा षष्ठी । कियन्तं कालम् । नयनविषयं यावत् अभ्येति भानुः भास्वान् विलोचनगोचरे चरति वा अस्तमयते इत्यर्थः । स्थितौ फलमाह । कुर्वन् संध्याबलिपटहतां कुर्वन् विदधानः संध्याः दिनादिमध्यांतलक्षणाः तासु बलयः पूजाः तत्र पटहतां आनकताम् । किंभूताम् । श्लाघनीयां प्रशंसनीयाम् । कस्य संबन्धिनीम् । शूलिनः तस्यैव महाकालाभिधानस्य धूर्जटेः । अत एव श्लाघ्यां

अनर्घ्यां गुणसंबद्धां । त्वं लप्स्यसे प्राप्स्यसि फलमुपभोगलक्षणं श्रेयोरूपं वा अविकलं समग्रं गर्जितानां स्तनितानां । किंभूतानाम् । आमन्द्राणां अतिशयगम्भीराणाम् । अत्रेदमुक्तं भवति । भगवन्महाकालनिलये संध्याबलिवेलासु वादित्राणि वाद्यन्ते । तत्रातोद्यतां प्रतिपद्य तद्ध्वनिप्रतिनिधीन् निजध्वनीन् विधाय तानुपयोगिनः कुरु । अत्र रूपकम् ।

दृष्टादृष्टफललाभमाह ।

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥ ३५ ॥

(d) आमोक्ष्यन्ति V. D.

[तत्र पादानां न्यासैः क्वणिताः रशनाः यासां तादृश्यः, रत्नानां छायाभिः खचिताः वलयः येषां तादृशैः, लीलया अवधूतैः, चामरैः क्लान्ताः हस्ताः यासां तादृश्यः वेश्याः त्वत्तः नखानां पदानां सुखान् वर्षस्य अग्रबिन्दून् प्राप्य त्वयि मधुकराणां श्रेणिवत् दीर्घान् कटाक्षान् आमोक्ष्यन्ते.

The courtezans there, getting the first drops of rain, agreeable to the nail-marks on their bodies, their girdles sounding at each step, their hands weary with the *chowries*, brandished gracefully, and filling the folds of the skin on the belly with the lustre of their jewels, will cast side-long glances at you, long like rows of bees.]

पादन्यासेत्यादि । तत्र शिवविलासवेश्मनि वेश्याः देवद्वारवनिताः । वेश्यापदेन तासां रतिपाण्डित्यं गम्यत्वं चोक्तम् । आमोक्ष्यन्ते प्रक्षेप्स्यन्ति । त्वयीति निमित्तसप्तमीयम् । कटाक्षान् ईक्षणप्रेङ्खदक्षिप्रसरान् । कीदृशान् । मधुकरश्रेणिदीर्घान् मधुपपङ्क्तिवत्सायतान् । एतेन नयनकमनीयत्वं आदरविलो-

कनं च पण्यवनितानां प्रतिपादितम् । कुतः । त्वत्तः भवत्तः प्राप्य लब्ध्वा वर्षाग्रबिन्दून् वृष्टिप्रथमपयःकणान् । अमुना सव्यायामत्वं अत एव सस्पृहा- लोकनोपपत्तिः । कथंभूतान् । नखपदसुखान् नखानां कररुहाणां पदानि क्षतानि तेषु सुखहेतुत्वात् सुखाः तान् । नखपदोपादानेन तासां सकामतोक्ता। किंभूतास्ताः । पादन्यासक्वणितरसनाः पादन्यासेन चरणक्षेपेण क्वणिता रसना मेखला यासां तास्तथोक्ताः । एतेन सालंकारगतित्वम् । पुनः कीदृश्यः । क्लान्तहस्ताः श्रान्तकरतलाः । अनेन सौकुमार्यनिरूपणम् । चामरैः वालव्यजनैः । कीदृशैः । लीलावधूतैः हेलान्दोलितैः । तथा रत्नच्छायाख- चितवलिभिः रत्नानां मणीनां छायाः कान्तयस्ताभिः खचिताः संबद्धा वलयः तद्दण्डमण्डलीभूतपर्वविच्छित्तयो येषां तैः । अथवा खचिताः छुरिताः वलयः तासामेव चामरग्राहिणीनां उदररेखा यैस्ते तयोक्तास्तैः । इदम- भिहितं भवति । तव देवतायतनगमनेन धर्मोऽपि कामानुबन्धः सेत्स्यतीति। अत्रानुमानम् ।

चण्डीपतिताण्डवोपकरणत्वेन अम्भोदस्य शोभां संभावयन्नाह ।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ॥

(c) नृत्तारम्भे V. J. D.

[पश्चात्, भुजाः एव तरवः तेषां वनं मण्डलेन उच्चैः अभिलीनः, प्रतिनवं जपापुष्पं तद्वत् रक्तं सान्ध्यं तेजः दधानः, शान्तः उद्वेगः तेन स्तिमिते नयने यस्मिन् कर्मणि तद् यथा स्यात् तथा भवान्या दृष्टा भक्तिः यस्य सः (त्वं), पशुपतेः नृत्यारम्भे आर्द्रस्य नागाजि- नस्य इच्छां हर.

After this, when S'iva begins to dance, fulfil his longing for an elephant's blood-dripping hide, dis- appearing in a spiral movement above the forest of his

arms, with the twilight lustre red like a fresh japa-flower reflected on you, your devotion admired by Pārvatī with gazing eyes that bespeak a pacified tremor.]

पश्चादुच्चैरित्यादि । पश्चात् भवानीपतिभवनगमनानन्तरम् । उच्चैरिति भुज-पदेन समासः भिन्नं वा पदम् । उच्चैर्भुजतरुवनं दोर्द्रुमखण्डम् । मण्डलेनाभिलीनः तिर्यग्भागेन संस्थितः । सांध्यं तेजः संध्यायां भवं महः । प्रतिनव-जपापुष्परक्तं अभिनवौड्रपुष्पारुणम् । दधानो धारयन् । पशुपतेः शूलिनः । नृत्यारम्भे नान्द्युपक्रमे हर अपनय आर्द्रनागाजिनेच्छां कीलालक्लिन्नकरि-कृत्तिकाङ्क्षाम् । यतः स हि भगवान् संध्यासु रुधिरद्रवार्द्रगजाजिनमुपरि करैः प्रसार्य किल नृत्यति । ततस्त्वं तत्संनिहितश्च तदभिलाषं पूरयेरित्यर्थः । कीदृक् । दृष्टभक्तिः विलोकितैवंविधविच्छित्तिः । संख्यायां भक्तिशब्देन पूरण्यादिपठितेऽपि गणकृतमनित्यमिति पुंवद्भावः । भवान्या भववल्लभया । कथम् । शान्तोद्वेगस्तिमितनयनं शान्तो व्यपगतः तडिदुन्मेषाद्यभावात् स्त्री-स्वभावसुलभ उद्वेगः त्रासः तेन स्तिमिते निश्चले नयने विलोचने यत्र दर्श-नेन तत्तथाविधम् । अथवा बीभत्साकारिकरिकृत्तिदर्शनाद् उद्वेगः प्राप्तो यः प्रशान्तः तेन स्तिमिते निष्कम्पे प्रीतिप्रकर्षात् नेत्रे यत्र इति वा । अत्रोपमा ।

परोपकारित्वेन प्रोत्साहयन्नाह ।

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥ ३७ ॥

(c) सौदाम° J. D. M. (d) मा च भूः J. D.

[तत्र नक्तं सूच्या भेद्यैः तमोभिः नरपतेः पथि रुद्धः आलोकः यस्य एवंविधे (सति), रमणस्य वसतिं गच्छन्तीनां योषितां कनकस्य निकषवत् स्निग्धया सौदामिन्या उर्वीं दर्शय. तोयस्य उत्सर्गे स्तनितेन मुखरः मा स्म भूः; ताः विक्लवाः.

There, at night, when all light is shut out from the royal road by darkness penetrable by a needle, show by lightning flashes, brilliant like streaks of gold on the touch-stone, the way to women going to their lover's homes, but pray do not make noise with your thunder and discharge of showers; for they are liable to be terrified.]

गच्छन्तीनामित्यादि । तत्र उज्जयिन्यां अभिसारिकाणां स्त्रीणां गच्छन्तीनां व्रजन्तीनां रमणवसतिं वल्लभभवनं । कस्मिन् काले । नक्तं रात्रौ । दर्शय[1] काशय उर्वीं पृथिवीं नरपतिपथे राजमार्गे । कीदृशे । रुद्धालोके अवष्टब्ध-प्रकाशे तमोभिः अन्धकारैः । कीदृशैः । सूचिभेद्यैः सूचीविदार्यैः । औपचारिकोऽयं धर्मः । संहतैरित्यर्थः । सौदामिन्या विद्युता । कीदृश्या । कनक-निकषस्निग्धया सुवर्णघर्षवद् अरूक्षया । एतेन अस्या स्नेहवाह्यदीपिकात्व-मुक्तम् । तोयोत्सर्गाद् उदकत्यागात् स्तनितमुखरः स्तनितेन गर्जितेन मुखरो वाचालस्त्वं मा स्म भूः मा भूः । श्रुतिपथपरुषध्वनिं मा कृथाः । यतस्ताः स्त्रियः स्वभावभीरवस्तथाविधं ध्वनिमाकर्ण्य विक्लवाः त्रस्ताः भविष्यन्तीति तत्त्रासमर्पणेन तव निष्कृपत्वं स्यादिति निषिध्यसे । अत्राक्षेपातिशययोः संसृष्टिः । तथा च । यत्रार्थधर्मनियमः प्रसिद्धबाधाद्विपर्ययं याति । काश्चित्क्वचि-[2]दतिलोकं स स्यादित्यतिशयस्तस्य ॥ (रुद्रट, ९.१) । प्रतिषेधोक्तिराक्षेपस्त्रै-[3]कालापेक्षया त्रिधा । अथान्यैः[4] पुनराक्षेपैस्तदानन्त्यादनन्तता ॥ (दण्डी २.१२०) ।

लब्धकामोपभोगं गमने तं प्रवर्तयन्नाह ।

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३८ ॥

1. Edn. द्वि. 2. Ms. स्यादति. 3. Edn. त्रैकाल्या. 4. Edn. स्य. 5. °ध्यसेद्दा°

[सुप्ताः पारावताः यस्यां एवंविधायां कस्यांचित् भवनस्य वलभौ तां रात्रिं नीत्वा चिरविलसनात् खिन्नं विद्युत् एव कलत्रं यस्य एतादृशः भवान् सूर्ये दृष्टे (सति) अध्वनः शेषं पुनरपि वाहयेत्. सुहृदां अभ्युपेते अर्थश्च कृत्यं च यैः ते न खलु मन्दायन्ते.

Pass the night on the terrace of some house where the pigeons are sleeping, Lightning, your wife, being fatigued by constant flashing. With sun-rise you may please go on with the remainder of the journey. Men who have accepted a mission and a task for their friends never relax their efforts.]

तां कस्यांचिदित्यादि। तोयद तामुक्तां रात्रिं त्रियामिनीं नीत्वा अतिवाह्य। क्व। भवनवलभौ भवनानां वेश्मनां वलभिः उपरितनभूमिः तस्यां कस्यांचिदेकस्याम्। अनेन सर्वासां समरायणीयक(त्व)कथनम्। किंभूतायाम्। सुतपारावतायां अजागरूककलरवायाम्। ते हि तत्रत्याः पारावताः पक्षिणः कामिनीकण्ठकूजितेन जागृवयो भवन्ति। एतेन तस्याः संनिहितोद्दीपनविभावत्वेन रतिगृहत्वमुक्तम्। त्वं कीदृशः। खिन्नविद्युत्कलत्रः खिन्नं श्रान्तं विद्युदेव कलत्रं दारा यस्य स तथोक्तः। कुतः। चिरविलसनाद् बहुकालवनक्रीडनात्। सुचिरेण भोगादङ्गनानामङ्गग्लानिर्भवति। दृष्टे सूर्ये चक्षुर्गोचरचारिणि रवौ पुनरपि भूयोऽपि भवान् वाहयेत् समापयेद् अध्वशेषं अवशिष्टं पन्थानम्। केन कारणेन। यतः खलु निश्चयेन न मन्दायन्ते अलसा न भवन्ति सुहृदां मित्राणां अभ्युपेतार्थकृत्याः अभ्युपेतं अङ्गीकृतं अर्थः प्रयोजनं कृत्यं करणीयं अर्थश्चासौ कृत्यं च तद् यैस्ते तथोक्ताः। अर्थान्तरन्यासः।

सौहार्देनास्य हितोपदेशमुपदेष्टुमाह।

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलनयनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥ ३९॥

(c) कमलवदनात् V. J. D. M.

[तस्मिन् काले खण्डितानां योषितां नयनसलिलं प्रणयिभिः शान्तिं नेयं, अतः भानोः वर्त्म आशु त्यज. सः अपि नलिन्याः कमलनयनात् प्रालेयं एव अस्रं हर्तुं प्रत्यावृत्तः, त्वयि कररुधि (सति), न अल्पा अभ्यसूया यस्य एवंविधः स्यात्.

This time of the morning is one when lovers have to wipe off the tears of their mistresses, suffering from a sense of being slighted and, therefore, leave the way clear immediately for the sun. As for himself, returning to remove the tears of dew from the lotus-eye of the lotus-plant, he would be mightily angry if you were to obstruct his hands (rays).]

तस्मिन् काले इत्यादि। हे जलधर अभिधीयसे। तस्मिन् काले प्रभातसमये भानोः वर्त्म भास्वतः पन्थानं आशु शीघ्रं त्यज परिहर। रवेराच्छादनको मा भूः। किंनिमित्तम्। अतः कारणात्। तदा योषितां स्त्रीणां खण्डितानां विप्रलब्धानां नयनसलिलं विलोचनाम्भः प्रणयिभिः प्रियतमैः आगत्य शान्तिं नेयं उपशमं नेतव्यम्। सोऽपि भानुरपि नलिन्या पद्मिनीनायिकायाः कमलनयनात् कमलमेव नयनं ततः प्रालेयास्रं प्रालेयं अवश्यायजलं तदेव अस्रं अश्रु हर्तुं अपनेतुं प्रत्यावृत्तः प्रत्यागतः। तेनापि स्वप्रियायाः सरोरुहिण्या आप्यायना कर्तव्या। त्वयि कररुधि भवति रश्मिरोधके। प्रकाशाभावान्निशेति शङ्कया प्रत्यागमनमकुर्वन्। स्यादनल्पाभ्यसूयः अनल्पा प्रचुरा अभ्यसूया अक्षमा यस्य तथाविधः स्याद् भवेत्। इदमभिहितं भवति। यः कोऽपि प्रियां प्रति प्रियकरणाय प्रसारितं करं रुणद्धि तत्र निस्तेजसोऽपि कोपः पदं करोति किं पुनश्चण्डमहसो न विधास्यन्ति। अत्राक्षेपः।

अम्भोधरस्याधुना धीराङ्गनासंगमेन गमनसाफल्यं निरूपयन्नाह।

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।

तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४० ॥

(c) तस्मात्तस्याः V.

[गम्भीरायाः सरितः, चेतसि इव, प्रसन्ने पयसि प्रकृत्या सुभगः ते छायारूपः आत्मा अपि प्रवेशं लप्स्यते. तस्मात् अस्याः कुमुदैः विशदानि चटुलानां शफराणां उद्वर्तनानि एव प्रेक्षितानि धैर्यात् मोघीकर्तुं न अर्हसि.

Even your reflected self, lovable by nature as it is, would get access to the clear water of the Gambhīra river, as to a serene (propitiated) heart, and, therefore, please do not, in a fit of seriousness, render futile those glances of hers, consisting of gambols of flitting fish, shining with night lotuses.]

गम्भीराया इत्यादि। गम्भीरायाः गम्भीराभिधानायाः सरितो नद्याः पयसि पानीये मनस्विन्याः कामिन्याश्चेतसि मनसीव प्रसन्ने निर्मले। छायात्मापि प्रतिबिम्बस्वरूपम् अपि संभावनायाम्। साक्षात् त्वदीयरूपं तावदास्ताम्। तत्प्रातिकृतिरपि लप्स्यते प्राप्स्यति प्रवेशं अन्तरवस्थानम्। कुतः। यतः प्रकृतिसुभगः स्वभावसुन्दरः कारणगर्भं विशेषणम्। यस्मादियं अनुरक्तकामिनीव कामुकं हृदि निधास्यति। तस्मादस्याः नदीनायिकायाः चटुलशफरोद्वर्तनप्रेक्षितानि चटुलाः चञ्चलाः शफराः मत्स्याःतेषां उद्वर्तनानि उद्वेल्लितानि तान्येव प्रेक्षितानि। स्त्रीपक्षे तद्वदिति समासः। इदमेव कामिनीनामनुरागचिह्नं यदेवंविधं विलोकितम्। कीदृशानि तानि। कुमुदविशदानि कैरवावदातानि। एतेन तेषां प्रीतिविकासकथनम्। मोघीकर्तुं वन्ध्यानि विधातुं एतानि नार्हसि योग्यो न भवसि धैर्याद् धीरत्वलक्षणान्नायकगुणात्। इदमत्र तात्पर्यम्। अङ्गनानां प्रणयिषु प्रेमानुबन्धस्तत्संभोगादेव सफलतामनुभवति। ततस्त्वमपि प्रेक्षितानि तस्याः प्रीतितरलविलोकितानि संगमं विधाय सफलय। एनां परिहृत्य मा गाः। अत्र रसवदलंकरणम्।

सिन्धुवधूसक्ताम्बुदाविलम्बकथनार्थमाह ।

> तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
> हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
> प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
> ज्ञातास्वादः पुलिनजघनां को विहातुं समर्थः ॥ ४१ ॥

(d) Su. and many mss. विपुलजघनां; विवृतजघनां J. D. M.

[सखे, प्राप्ताः वानीराणां शाखाः येन तादृशं, करेण धृतमिव मुक्तः रोधः एव नितम्बः येन तादृशं, तस्याः नीलं सलिलमेव वसनं किंचित् हृत्वा लम्बमानस्य ते प्रस्थानं कथमपि भावि. पुलिनवत् (पुलिनमेव) जघनं यस्याः तां ज्ञातः आस्वादः येन सः कः विहातुं समर्थः.

When you have slightly taken off her watery garment, which (thereby) is displaced from her bank-hips, which, being in close contact with the branching canes, is as though held fast by her with the hand, and while you are hanging over, I am afraid, your departure would be a difficult matter. Who can leave one with beech-hips after having come to relish her ?]

तस्याः किंचिदित्यादि । तस्याः गम्भीरायाः सरितः स्त्रीत्वेनोपात्तायाः सलिलवसनं सलिलं जलं तदेव वसनं वासः । कीदृशम् । प्राप्तवानीरशाखं प्राप्ता लब्धा वानीरस्य वेतसस्य शाखा लता येनेति बहुव्रीहिः । प्राप्तं वानीरशाखया । प्राप्तापन्नेत्यादिना द्वितीयासमासो वा । तटनिकटवानीरविटप-संसृष्टमित्यर्थः । तदुत्प्रेक्षते । किंचित् मनाक् करधृतमिव हस्तावष्टब्धमिव । कामिनः परिधानमपहरतः करं स्वपाणिना निरुणद्धि । हृत्वा पानवशादपास्य । कीदृक् । नीलं नीलवर्णं ग्रीष्मान्ते तुच्छत्वेन स्वच्छं अत एव मुक्तरोधोनितम्बं मुक्तः त्यक्तः रोधः तीरं एव नितम्बो येन तत्तादृशम् । (समाकृष्टमम्बरं नितम्बं चित्यं?) अहमेवं तर्कयामि पाथोद प्रस्थानगमनं ते तव सखे कि...

अम्भोधर लम्बमानस्य मधुरत्वेन तत्रासक्तस्य कथमपि महता प्रयासेन भावि भविष्यति । भुवश्चेति णिनिः । कुतः इदम् । अर्थान्तरन्यासेन दर्शयति । ज्ञातास्वाद इत्यादि । ज्ञातास्वादः अनुभूतरसः पुलिनजघनां पुलिनमेव जघनं यस्याः सा तादृक् ताम् । अर्थान्तरे च पुलिनमिव जघनं (यस्याः) पुलिनजघनामित्यर्थः । तथाविधां वधूं विहातुं त्यक्तुं कः समर्थः प्रभुः । न कोऽपीत्यर्थः । अत्र रूपकोत्प्रेक्षार्थान्तरन्यासानां संकरः ॥

जलधरस्य समीरबाधाशङ्कानिरासार्थमाह ।

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४२ ॥

[देवपूर्वं गिरिं उपजिगमिषोः ते, काननसंबन्धिनां उदुम्बराणां परिणमयिता, तव निष्यन्देन उच्छ्वसितायाः वसुधायाः गन्धस्य संपर्केण रम्यः, स्रोतसः रन्ध्रे ध्वनितेन सुभगं (यथा स्यात् तथा) दन्तिभिः पीयमानः, शीतो वायुः नीचैः वास्यति.

When you are about to approach Devagiri, there will blow gently a cool wind, the ripener of the Udambara fruit in the forest, agreeable on account of its contact with the aroma of the earth, whom your rain has revived, drunk by elephants with a beautiful sound in the hollow of their trunks.]

त्वन्निष्यन्दोच्छ्वसितेत्यादि । अम्भोधर गम्भीरामतीत्य तव उपजिगमिषोः उपययियासोः देवपूर्वं गिरिं देवशब्दः पूर्वो यस्माद्गिरेः स देवपूर्वो गिरिरित्यर्थः । वायुः प्रभञ्जनः प्राञ्जलो भविष्यतीति शङ्कां मा कृथाः । स यतः नीचैर्वास्यति शनैः संचरिष्यति । कस्मात् । दन्तिभिः पीयमानः स्वैरविहारिभिः गिरिवरकरिभिः अभ्यवाह्रियमाणः सन् अपचितसामर्थ्यः पथि

1. Ms. मिश्र लम्बमानस्य अम्भोभरमम्बुरत्वेन तत्रा°.

पारिपन्थिकत्वं न प्रतिपत्स्यते । तेऽपि कुतस्तं पास्यन्ति तद्विशेषणद्वारेण तमु-पन्यस्यति । त्वन्निष्यन्देत्यादि । तव निष्यन्दः तोयकणस्रवणं तेन उच्छ्वसिता विकसिता वसुधा वसुंधरा तस्याः गन्धसंपर्कः परिमलपरिचयः तेन रम्यः मनोज्ञः । पाथोदमुक्तप्रथमोदबिन्दुभिः सिक्तायाः सौरभ्यं भुवः संभवतीति स्वभावः । पुनः कीदृशः । शीतः शिशिरस्पर्शः शीतवतः संपर्कात् । कथम् । स्रोतोरन्ध्रध्वनितसुभगं स्रोतोरन्ध्रं करविवरं तस्य ध्वनितं स्वनितं तेन सुभगं सुन्दरं इति क्रियाविशेषणम् । रन्ध्रात्पवनप्रवेशादधिको ध्वनिरुच्चरति । स्रोतः करिकरस्य पर्यायः । प्रासप्रोतःस्रोतसान्तःक्षतेनेति माघप्रयोगः[1] । कथं पुनः पानक्रियां रसनेन्द्रियविषयिणीं श्रोत्रेन्द्रियः शब्दो विशिनष्टि । नैव दोषः । तथा दृष्टत्वात् । तथा पर्पटचिर्भिटद्रव्यचर्वणकटत्कारवो रसनेन्द्रिये पुष्टिमावहति एवमत्रापि । कियत्या मालया वास्यतीति कथयति । परिणमयिता पाचयिता काननोदुम्बराणां आरण्यकफलानाम् । इति प्रत्यनीकपवनबाधानिषेधमभिधाय जलार्द्रमेदिनीगन्धसंबन्धेन सौगन्ध्यमत एव च शैत्यं दन्तिपीत्या मन्दत्वं चाभिहितम्[2] । इति समीरणगुणस्तुत्या तोयदं वर्त्मनि प्रवर्तयतीत्यभिप्रायः । अत्रानुमानम् ।

वारिवाहस्य विशिष्टदेवतापरीष्टया इष्टफलप्राप्त्यर्थमाह ।

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४३ ॥

[तत्र नियता वसतिः यस्य एतादृशं स्कन्दं, पुष्पमेघीकृतः आत्मा येन एवंविधः भवान् व्योमगङ्गायाः जलेन आर्द्रैः पुष्पाणां आसारैः स्नपयतु. अतिगतं आदित्यं एतादृशं तत्तेजः हि वासवीनां चमूनां रक्षाहेतोः नवं शशिं बिभर्ति असौ तेन हुतवहस्य मुखे संभृतम्.

1. शिशु० १८.४३. 2. Ms. मन्दत्वमभिधानम्.

There (on the Devagiri) assume the form of a flowery cloud and besprinkle Skanda, who is always there, with heavy showers of flowers, moist with the water of the heavenly Ganges; for, he represents a lustre excelling the sun, laid in the mouth of fire by S'iva (the wearer of the cresent-moon) for the protection of the armies of Indra.]

तत्र स्कन्दमित्यादि । तत्र देवगिरौ स्कन्दं कुमारं नियतवसतिं निश्चितनिवासम् । सदा संनिहितमित्यर्थः । स्नपयतु भवान् त्वं अभिषिञ्चेः पुष्पासारैः कुसुमवर्षैः । कीदृशैः । व्योमगङ्गाजलार्द्रैः द्युमन्दाकिनीनीरसरसैः । अनेन पुष्पाणां पवित्रताधिक्यमस्य च तदुत्पन्नत्वेन प्रीत्यतिशयश्च प्रकाश्यते । किंभूतो भवान् । पुष्पमेघीकृतात्मा कामरूपत्वाद् अपुष्पमेघः पुष्पमेघीकृतः आत्मा स्वरूपं येन स तथोक्तः । कस्मादयमुपास्यत इति तन्माहात्म्यं निरूपयति । हि यस्माद् रक्षाहेतोः रक्षानिमित्तं नवशशिभृता नूतनेन्दुकलालंकारेण दैत्यैरुपद्दुतानां वासवीनां ऐन्द्रीणां चमूनां सेनानाम् - वासवीनामित्यणं बाधित्वा वृद्धाच्छः प्राप्नोति । तत्र तु वसवो देवता आसामित्यस्मिन्नर्थेऽण् । प्रत्ययस्तु संबन्धे विधीयते । संबन्धश्चात्र न विवक्षितः । विवक्षातः कृत्तद्धितसमासाः । अत्यादित्यं आदित्यमतिक्रान्तम् । हुतवहमुखे हव्यवाहवदने संभृतं यत्तेजो निजवीर्यं तदसौ शरवणभवो भगवान् । अस्यायमर्थः । तारकासुरसंहरणार्थं हरेण हैमवत्यां पुत्रमुत्पादयता तदतिशयिततिग्मधाम तद्धाम भर्तुमशक्नुवत्यां तस्यां शिखिमुखे निहितं अतस्तं शिखिवाहनं अग्निभूरित्यामनन्ति । तदेवमसाधारणशक्तिधरं कुमारमाराध्यमाराधयतः शिवास्ते पन्थानो भविष्यन्ति । अत्रोर्जस्वदलंकरणम् । यदुत्कर्षवतार्थेन रसभावैश्च संयुतम् । यदूर्जस्विनहंकारं (?) तमलंकारं विदुर्बुधाः ॥

पाथोदमद्रिसुताप्रसादलाभसंभावनया प्रोत्साहयन्नाह ।

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।

धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४४ ॥

(b) पुत्रप्रीत्या V. कुवलयपदप्रापि V. कुवलयदलक्षेपि D.

[पश्चात्, ज्योतिषां लेखया वलयि यस्य गलितं बर्हं पुत्रस्य प्रेम्णा भवानी, कुवलयदलं प्राप्नोति असौ तादृशे कर्णे करोति, तं हरस्य शशेः रुचा धौतं अपाङ्गं यस्य एवंविधं पावकेः मयूरं अद्रेः ग्रहणेन गुरुभिः गर्जितैः नर्तयेथाः.

After that, with your thunder intensified by the mountain echoes, make the famous peacock of Skanda (the son of Agni) to dance, the corners of whose eyes have bathed in the lustre of the moon on S'iva's head, and whose feather, encircled by lustrous lines, when one is shed, is placed by Pārvatī out of her parental affection for him on her ear, where ordinarily a blue lotus stands.]

ज्योतिर्लेखेत्यादि । पाथोद स्कन्दमभ्यर्च्य पश्चादनन्तरं पावकेः अग्निजन्मनः कुमारस्य मयूरं बर्हिणं तद्वाहनीभूतं धौतापाङ्गं क्षालितनेत्रान्तं हरशशिरुचा हरस्य महेश्वरस्य शशि(रुक्) चूडाचन्द्रचन्द्रिका तया । अनेनास्य गुहवाहनत्वेन महेश्वरस्य संनिहितिप्रतिपादनम् । त्वं नर्तयेथाः नाटयेथाः। अत्रेनन्तादुभयपदद्वारेणात्मनेपदम् । गर्जितैः स्तनितैः । कीदृशैः। अद्रिग्रहणगुरुभिः भूधररन्ध्रधारणधीरैः। निसर्गादेव जलधरध्वनिनिशमनैः शिखण्डिनस्ताण्डवमारभन्ते । तमेव मयूरं सुपवर्णयति । यस्य बर्हं पिच्छं ज्योतिर्लेखावलयि तेजोमण्डलवत् । एतेन सच्छायविशेषरामणीयकं वर्णितम् । गलितं स्वयमेव च्युतं भवानी भववल्लभा । पुत्रप्रेम्णा सुतस्नेहेन कर्णे करोति । श्रवणकुवलयदलानुकारि । कर्णविशेषणं वा । कुवलयदलं प्राप्नोतीति क्विप् तस्मिन् कुवलयदलालंकारयोग्य इत्यभिहितं भवति । त्वमेवं (पार्वतीप्रियपुत्रपत्रप्रचलाकिनाद्य चाटुकुर्वन् ?) शर्वाण्याः प्रसादभाग् भविष्यसि । अत्रोदात्तम् ।

श्रेयोविशेषाधिगमकथनेन पथि पाथोदं प्रोत्साहयन्नाह ।

आराध्यैनं प्रथमकथितं देवमुल्लङ्घिताध्वा
सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४५ ॥

(a) आराध्यैवं शरवणभुवं V. अराध्यैनं शरवणभवं J. D. M., probably as v. l. by S.

[एनं प्रथमं कथितं देवं आराध्य उल्लङ्घितः अध्वा येन एवंविधः (त्वं) जलकणानां भयात् वीणिभिः सिद्धानां द्वंद्वैः मुक्तः मार्गः यस्य सः, सुरभितनयानां आलम्भेभ्यः (जायते इति) जां, स्रोतसः मूर्त्या भुवि परिणतां, रन्तिदेवस्य कीर्तिं मानयिष्यन् व्यालम्बेथाः.

Having worshipped Skanda, referred to already, and having traversed your way a little farther, the Siddha pairs holding Viṇās leaving your path in fear of particles of rain, hang reverently on that river, the embodiment in river form on this earth of the name of Rantideva, acquired by the immolation of cows.]

आराध्यैनमित्यादि । हे पाथोद एनं प्रथमं कथितं देवं अमरं आराध्य । तं शरवणभवं आचक्षते । त्वं कीदृक् । उल्लंघिताध्वा किंचिदतिक्रान्तमार्गः सिद्धद्वंद्वैः देवदंपतीभिः । कीदृग्भिः । वीणिभिः वीणा वल्लकी सा विद्यते येषां तैः । वीणापाणिभिरित्यर्थः । मुक्तमार्गः त्यक्तपथः । कुतः । जलकणभयात् उदकबिन्दुत्रासात् । यतस्तोयकणार्द्रा तन्त्रीर्न क्वणति । व्यालम्बेथाः प्रतीक्षेथाः । किमर्थं मानयिष्यन् पूजयितुं कीर्तिं। कस्य। रन्तिदेवस्य रन्तिदेवनाम्नः पृथिवीपतेः । किंभूताम् । सुरभितनयालम्भजां सुरभितनयाः गावः तासां आलम्भः क्रतुषु मन्त्रपूर्वं व्यापादः तस्माज्जाता ताम् । पुनः कीदृशीम् । स्रोतोमूर्त्या प्रवाहरूपेण परिणतां आत्मरूपपरित्यागेन रूपान्तरमापन्नां भुवि मेदिन्याम् । इदमुक्तं भवति । तेन दि राज्ञा यज्ञेषु भूरयः सुरभितनयाः किलालब्धाः । तच्चर्मचयच्युतरसनिस्यन्दो-

पचयाच्चर्मण्वतीति सरिदुदियाय। ततस्तामेवंविधिनाध्वरमध्यजन्मानं निम्नगां मानयंस्त्वमनन्यलभ्यं श्रेयो लब्ध्वाध्वनि प्रयायाः। अत्र रूपकम्।

अम्भोधरमभिनवभूमिभूषालाभसंभावनया अभिप्रुवन्नाह।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।
प्रेक्षिष्यन्ते गगनगतयो दूरमावर्ज्य दृष्टी–
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥ ४६॥

(c) नूनमावर्ज्य J. D. M.

[तस्याः सिन्धोः पृथुमपि दूरभावात् तनुं प्रवाहं, शार्ङ्गिणः वर्णस्य चौरे त्वयि जलं पातुं अवनते (सति), गगने गतिः येषां ते, दृष्टीः दूरं आवर्ज्य, स्थूलः मध्यसम्बन्धी इन्द्रनीलः यस्य एवंविधं भुवः एकं मुक्तागुणं इव प्रेक्षिष्यन्ते.

When you descend to drink water to the stream of this river, which will look tiny from a distance although broad (in reality), you having appropriated the dark colour of the wielder of the S'ārṅga (Kṛṣṇa), the sky-goers will cast their glances far and wide to see a single string of pearls, as it were, serving as an ornament of the earth with a big central sapphire.]

त्वय्यादातुमित्यादि। तोयद त्वयि भवति जलं तोयं आदातुं ग्रहीतुं अवनते अवलम्बमाने। कीदृशे। शार्ङ्गिणो वर्णचौरे कृष्णस्य कान्तिमुषि। अमुना नीलत्वप्रीतिः। तस्याः चर्मण्वत्याः सिन्धोः सरितः प्रवाहं स्रोतः पृथुमपि विस्तृतमपि तनुं अल्पम्। अनेन गुणसारूप्यम्। तदपि कुतः। दूरभावाद् विप्रकर्षात्। यतो महदपि दवीयोदेशवर्ति वस्तु स्तोकमेव प्रतिभाति। प्रेक्षिष्यन्ते द्रक्ष्यन्ति गगनगतयः खेचराः। दूरं इति क्रियाविशेषणम्। आवर्ज्य अवनम्य दृष्टीः दृशः। प्रवाहं एकं अद्वितीयं अवदातत्वात्। मुक्तागुणमिव मौक्तिकैकसरमिव भुवः पृथिव्याः। किंभूतम्। स्थूलमध्येन्द्रनीलम् (?) नीलद्युतिरत्नं यस्य स तथोक्तः तम्। एतेन वसुमतीमाल्यलंकारोपमलम्। चर्मण्वत्यपि

त्वया इन्द्रनीलत्विषाश्लिष्टा विशिष्टभूषणाङ्गं प्राप्स्यति यतो भूषणस्यापि भूषणान्तरं संभवति। तथा चोक्तम्। अलंकारस्य कवयो यत्रालंकरणान्तरम्। असंतुष्टा निबध्नन्ति हारादिमणिबन्धवत्॥ ततो विशेषभूषासंभावनया नभश्चरलोचनाश्चर्यकारिणी सा भविष्यति। तन्नयनयोः स्तुतिः प्रस्तुता। अत्रोपमा।

दशपुरगमनेन कुतुहलिचतुरतरुणीलोचनगोचरकारितयाम्भोधरस्य सुभगताभिमानमारोपयन्नाह।

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम्॥ ४७॥

(b) °कृष्णशार° V. D. M.

[तां उत्तीर्य, परिचिताः भ्रूलतानां विभ्रमा येषां, पक्ष्मणां उत्क्षेपात् उपरि विलसन्ती कृष्णसारा प्रभा येषां, कुन्दानां क्षेपाणां अनुगाः मधुकराः तेषां श्रियं मुष्णन्ति अमी तादृशां, दशपुरवधूनां नेत्रकौतूहलानां आत्मबिम्बं पात्रीकुर्वन् व्रज.

Going beyond her, make your form a worthy object of the joy of the eyes of Das'apura damsels, skilful in the sport of eye-brows, whose lustre of mingling black and white will flash up now when the eye-lashes are raised up and will resemble in beauty bees following Kunda-bunches, thrown up (in sport).]

तामुत्तीर्येत्यादि। तां चर्मण्वतीं उत्तीर्य· अतीत्य व्रज प्रयाहि। पात्रीकुर्वन् विषयतां नयन् आत्मबिम्बं आत्मीयं रूपं (दशपुरवधूनेत्रकौतूहलानाम्) दशपुराभिधाननगरनारीलोचनाश्चर्यालोकनानाम्। एतेन दशपुरस्योपरि प्रयाया इत्युक्तं भवति। किंभूतानाम्। तेषां परिचितभ्रूलताविभ्रमाणां परिचिताः नागरिकत्वादभ्यस्ताः भ्रूलतानां चिल्लीवल्लीनां विभ्रमाः विलासाः यैस्तेषाम्। पुनः कीदृशानाम्। उपरिविलसत्कृष्णसारप्रभाणां उपरि उपरिष्टाद् विलसन्ती

कृष्णसारा कालधवला अथवा कृष्णेन सारासिता श्यामत्वेन कर्बुरा (प्रभा) येषां तेषाम्। कीदृग्विधानाम्। कुन्दक्षेपानुगमधुकरश्रीमुषां कुन्दं कुन्दकुसुमं तस्य क्षेपः प्रेरणं तस्यानुगाः अनुगामिनो मधुकराः मधुलिहः तेषां श्रीः शोभा तां मुष्णन्ति हरन्ति ये तेषां। प्रेर्यमाणकुन्दकुसुमानुसारिभ्रमरविभ्रमभृतामित्यर्थः। ननु कुन्दानामवदातत्वादलीनां च नीलत्वाल्लोचनानामिदं त्वं संभवति कथममूर्तानां तद्विलोकनानाम्। गुणक्रियावतामभेदोपचाराद्विभ्रमविधानेन तद्वन्ति नेत्राणि गम्यन्ते। अत्रोपमा।

पयोमुचः पवित्रदेशस्पर्शनेन श्रेयोलाभमुपदिशन्नाह।

ब्रह्मावर्तं जनपदमधश्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ४८ ॥

(a) °मथ च्छायया. D. M. J (d) अभ्यपिञ्चत् V.

[ब्रह्मावर्तं जानपदं छायया अधः गाहमानः क्षत्रस्य प्रधनस्य पिशुनं तत् कौरवं क्षेत्रं भजेथाः, यत्र गाण्डीवं धनुः यस्य सः शितानां शराणां शतैः राजन्यानां मुखानि, धाराणां पातैः त्वं कमलानि इव, अभ्यवर्षत्.

Plunging into the country of Brahmāvarta, with your shadow cast below, repair to that famous Kurukṣetra, which still bears traces of the battle of the Kṣatriyas,-that Kurukṣetra, where Arjuna, armed with the Gaṇḍīva, bestrewed the faces of kings with showers of sharp arrows as you the lotuses with showers of rain.]

ब्रह्मावर्तमित्यादि। ब्रह्मावर्तं सरस्वतीदृषद्वत्योः सरितोरन्तरालवर्तिनं जनपदं देशं अधः अधस्ताद्व्यवस्थितम्। छायया प्रतिबिम्बेन गाहमानः व्याप्नुवन्। कौरवं कुरूणामिदं कौरवं क्षेत्रं तत् प्रसिद्धं त्वं भजेथाः श्रयेथाः। कीदृशम्। क्षत्रप्रधनपिशुनं क्षत्राणां क्षत्रियाणां प्रधनं आयोधनं तस्य पिशुनं सूचकम्।

कथम्। यदद्यापि प्रचुरचिरंतननाराचादिशस्त्रशकलानि विलोक्यन्ते। यत्र यस्मिन् राजन्यानां राज्ञां गाण्डीवधन्वा धनंजयः शितशरशतैः शितसायकनिकरैः मुखानि वदनानि अभ्यवर्षत् अभ्यषिञ्चत् पूरयामास त्वामिव कमलानि। यथा त्वं जलधर धारापातैः स्थूलजलबिन्दुवर्षैः कमलानि अम्भोजानि अभिवर्षसि तथा स मुखानि। अत्र क्षत्रियमुखानां कमलोपमया छायाविकासप्रकाशनम्। पार्थिवसार्थप्रशमप्रथितसामर्थ्ये पार्थोपमानेन च घनाघनस्य श्लाघ्यतोक्ता। अत्रोपमा।

अम्भोधरस्य सिद्धये प्रसिद्धतीर्थप्रस्थानं कथयन्नाह।

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥ ४९॥

(b) बन्धुस्नेहात् J. D. (d) अन्तः स्वच्छ° V.; स्त्वमसि J. D. M.

[सौम्य, बन्धूनां प्रीत्या समराद् विमुखः लाङ्गली, अभिमतो रसः यस्याः तां, रेवत्याः लोचने अङ्कः यस्याः तां हालां हित्वा याः सिषेवे, तासां सारस्वतीनां अपां अभिगमं कृत्वा त्वं अपि अन्तः शुद्धः, वर्णमात्रेण कृष्णः, भविता.

O gentle one, when you approach the waters of the Sarasvatī, to which Balarāma resorted because he was averse to fighting out of his love for his kinsmen, abandoning the dearly-loved wine where the eyes of Revatī were reflected, you also would be pure from inside, remaining black only in complexion.]

हित्वा हालामित्यादि। हे सौम्य सोम्य एव सौम्य। सुखादिभ्यः स्वार्थेयण्। त्वं तासां पवित्रतया प्रसिद्धानामपां पाथसां सारस्वतीनां सरस्वतीसंबन्धिनीनां कृत्वा विधाय अभिगमं अभिसंबन्धं अन्तः मध्ये शुद्धः कल्मषरहितः भविता भविष्यसि। वर्णमात्रेण कृष्णः केवलं बहिःकान्त्यैव कालः। स्वभावश्चायं सजलजलदः कालिमालंकृतो भवति। किंभूतास्ताः। लाङ्गली

याः सिषेवे । लाङ्गली हली याः अपः सिषेवे भेजे । कीदृशः । समरविमुखः संग्रामपराङ्मुखः । केन कारणेन । बन्धुप्रीत्या कुरुपाण्डवानां स्नेहेन । द्वये मम सुहृदस्तेषां कतमे योधनीयाः कतमे न भवन्तीति विचिन्त्य सरस्वतीतीर्थयात्रया प्रसृतः । किं कृत्वा । (हित्वा) परित्यज्य हालां मदिराम् । किंभूताम् । अभिमतरसां मद्यत्वादभीष्टस्वादाम् । पुनः कीदृशीम् । रेवतीलोचनाङ्कां रेवती तत्प्रिया तस्याः लोचने नयने तयोः प्रतिफलनवशाद् अङ्कः चिह्नं यस्याः ताम् । एतेन सुरायाः सहचरीसामीप्याद् दुस्त्यजायास्त्यागात्तीर्थप्रस्थानिनः शितिवाससो नियमपरिग्रहः प्रतिपादितः । ततस्त्वमपि परित्यक्ताशेषविषयः सरस्वतीमनुगम्य सम्यक्फलं लप्स्यसे । अत्रानुमानम् ।

तोयदस्य त्रिदशापगागमनेन अगण्यपुण्यप्राप्तिं प्रकाशयन्नाह ।

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५० ॥

(c) गौरीं वक्त्रेभ्रकुटिरचनां D.

[तस्मात् कनखलस्य समीपे शैलानां राज्ञः अवतीर्णां, सगराणां तनयानां स्वर्गार्थां सोपानपङ्क्ति इव जह्नोः तनयां गच्छेः, या गौर्याः वक्त्रस्य भ्रुकुटेः रचनां फेनैः विहस्य इव, इन्दौ लग्ना ऊर्मयः एव हस्ताः यस्याः तादृशी शंभोः केशग्रहणं अकरोत्.

From that spot proceed to meet, in the neighbourhood of Kanakhala, the Ganges, Jahnus' daughter, who has descended from the Himalaya as a veritable flight of stairs leading the sons of Sagara to heaven, and who has, as it were, seized S'iva by the hair, her wavy hand planted on the moon (in S'iva's hair), laughing with her foam at the frown on Pārvatī's face.]

तस्माद्गच्छेरित्यादि । तस्मात् सरस्वतीविलासवसतेर्देशाद् अनुकनखलं(कनखलं)प्रथितं तीर्थं अनु लक्षीकृत्य गच्छेः त्वं व्रजेः। जह्नोः कन्यां जाह्नवीं शैलराजा-

वतीर्णां हिमवतः प्रवृत्ताम्। किंविशिष्टाम्। सगरतनयस्वर्गसोपानपङ्क्तिम्। सगरो नाम भूपतिः प्रसिद्धः (तस्य) तनयानां सुतानां षष्टिसहस्रसंख्यानां स्वर्गाय सोपानपङ्क्तिः आरोहणश्रेणिः तत्प्राप्त्युपायभूतत्वात्। ते हि किल कपिलकोपानलेन्धनीभूतमूर्तयः पाताले भस्मसात्संपन्नाः प्रसन्नभगवद्भगीरथानीतत्रिपथगापयःप्लावितभस्मानः पुनर्जीवितास्ततस्त्रिदिवमारुरुहुः। या च गङ्गा गौरीवक्त्रभ्रुकुटिरचनां विहस्य गौरी गिरिराजपुत्री तस्या वक्त्रे वदने भ्रुकुटिः कोपाविष्टभ्रुकुटिलता तस्याः रचना घटना तामुपहस्य इव। फेनैर्डिण्डीरपिण्डैः। पाण्डुरत्वेन हसितस्य समानत्वात्। स्वपतिसंनिहितसपत्नीसमालोकनात् क्रुद्धाया धराधरराजदुहितुर्भ्रुकुटिबन्धोपपत्तिः। स्त्रीभावसुलभेर्ष्यानिर्भरत्वात् शंभोः भवानीपतेः केशग्रहणं चिकुरधारणं अकरोत् अकार्षीत्। अत्र त्रिविष्टपात्परिभ्रष्टा धूर्जटिना जटाजूटे धृतेत्यागमः। सा कीदृक्। इन्दुलग्नोर्मिहस्ता इन्दौ चूडाचन्द्रमसि लग्ना संबद्धा ऊर्मयः तरङ्गा ये त एव हस्ताः कराः यस्याः सा तादृक्। एतेन केशग्रहणोपपत्तिः। अमृतकरसंपर्कात् तत्पयसः सुधासाधर्म्यं बोद्धव्यमिति। अत्रोत्प्रेक्षा।

भागीरथीप्रस्थानकथनेन पाथोदं पवित्रशोभालाभाय प्रोत्साहयन्नाह।

> तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी
> त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।
> संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया सा
> स्यादस्थानोपगतयमुनासंगमेनाभिरामा ॥ ५१ ॥

(a) पश्चार्धलम्बी J. D. M. (c) °यासौ D. M. (d) °पनत° V.; संगमेव V. J. D. M., also v. l. noted in S.

[सुरगज इव व्योम्नि, पूर्वेण अर्धेन लम्बतेऽसौ एवंविधः त्वं तस्याः अच्छस्फटिकवत् विशदं अम्भः तिर्यक् पातुं तर्कयेः चेत्, भवतः स्रोतसि सपदि संसर्पन्त्या छायया सा अस्थाने उपगतः यमुनया संगमः तेन अभिरामा स्यात्.

If you have a mind to drink in a slanting manner her water, clear like a pure crystal, hanging down in the sky by the fore-part of the body, looking like a heavenly

elephant, then immediately, with your shadow flitting over its stream, she would look lovely as though she had a confluence with the Jumna at a wrong place.]

तस्याः पातुमित्यादि। तस्याः सुरसिन्धोः अम्भः पयः पातुं आदातुं तर्कै अभिलषेः चेद् यदि। कीदृशम्। अच्छस्फटिकविशदं अवदाताकोंपलविम तिर्यक् तिरश्चीनम्। कीदृशः। सुरगज इव देवद्विप इव। अत्रावदातस्य पदार्थस्य प्रतिच्छाया मलिनैव। अच्छस्वच्छतरे पयसि प्रतिबिम्बितं वस्त्व न्यवर्णमेव प्रतिभासते। तदा एष नवाहनाञ्जनाभिधानदिग्गजवत्। स कालकान्तिरेव न पुनरैरावणवत्। तस्य कुन्ददलावदातद्युतित्वेन प्रसिद्धिः व्योम्नि वियति पूर्वार्धेन अग्रिमभागेन लम्बते यः स पूर्वार्धलम्बी। तद्धर्मं णिनि पूर्वकायावनत इत्यर्थः। बिम्बेन यमुनाश्यामलत्वात्। ततः सा गङ्गा स्व भवेद् अभिरामा रमणीया। केन। अस्थानोपगतयमुनासंगमेन अस्थाने प्रयाग व्यतिरिक्ते प्रदेशे उपगतः उपहित यमुनासंगमः संपर्कः तेन। प्रदेशान्तरप्रा कालिन्दीसंयोगेनेत्यर्थः। अथ संगमोऽनया इति बहुव्रीहिः। प्रयागादन्य यमुनायाः गङ्गायाः संयोगो न संगच्छत इति भावः। अत्रोपमा।

वारिवाहं हिमाचलचूडारोहणार्थं सरणिश्रमापनोदोपदेशेन प्रमोदयन्नाह

> आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
> तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
> वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
> शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्॥ ५२॥

(d) शुभ्रां शोभां D.; शोभां रम्यां V.

[आसीनानां मृगाणां नाभिगन्धैः सुरभिताः शिलाः यस्य एवंभूतं तस्या एव प्रभवं, तुषारैः गौरं अचलं प्राप्य, अध्वनः श्रमस्य विन यने तस्य शृङ्गे निषण्णः, शुभ्रेण त्रिनयनस्य वृषेण उत्खातः पङ्क तेन उपमेयां शोभां वक्ष्यसि.

Approaching the mountain which is the source of this same river Ganges, which is white with snow and of which the rocks have been rendered fragrant with

the perfume in the navels of the deer seated there, you will take your seat on a peak, capable of banishing the fatigue of journey, and then you would look as beautiful as the mud dug up by the white bull of S'iva.]

आसीनानामित्यादि । तोयद तस्या एव नद्याः प्रभवं । प्रभवत्यस्मादिति प्रभवः कारणं । अचलं अद्रिं प्राप्य आसाद्य । कीदृशम् । गौरं अवदातं तुषारैः नीहारैः । पुनः किंभूतम् । सुरभितशिलं आमोदितदृषदं नाभिगन्धैः नाभिप्रदेशपरिमलैः मृगाणां कस्तूरिकैणानाम् । तेषां कस्तूरीसंभवत्वेन सुरभयो नाभयो भवन्ति । कीदृशानाम् । आसीनानां उपविष्टानाम् । तथा सति पर्वतभूतलनाभिसंबन्धसिद्धिः । तस्य हिमवतः शृङ्गे शिखरे निषण्णः आसीनः । कीदृशि । अध्वश्रमविनयने मार्गखेदापनोदिनि । सुरभिशिशिरत्वात् । त्वं वक्ष्यसि धारयिष्यसि शोभां श्रियम् । कीदृशीम् । शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां शुभ्रः श्वेतः त्रिनयनवृषः त्र्यक्षोक्षा तेनोत्खातः स चासौ पङ्कश्च तेनोपमीयते ताम् । अत्र हिमगिरिनीहार(स्य) सैरिकत्वेन हरगवत्वं मेघस्य च नूतनत्वेन पङ्ककालत्वमिति सादृश्यादुपमा । अत्रोपमा ।

बलाहकं महापुरुषनिषेवितवर्त्मना प्रवर्तयन्नाह ।

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५३ ॥

[वायौ सरति, सरलानां स्कन्धानां संघट्टात् जन्म यस्य, उल्काभिः क्षपितः चमरीणां वालानां भारः येन एवंविधः दवाग्निः तं बाधेत चेत्, एनं वारीणां धाराणां सहस्रैः अलं शमयितुं अर्हसि. उत्तमानां संपदः हि आपन्नानां आर्तेः प्रशमनं एव फलं यासां तथाविधाः.

If (by chance) the forest conflagration, arising on account of the concussion of the trunks of sarala trees when the wind begins to blow, troubles the mountain,

destroying the huge tails of the chamarīs by tongues of fire, please pour forth a thousand showers and completely extinguish it. The wealth of the noble attains its fruit by alleviating the sufferings of the distressed.]

तं चेद्वायावित्यादि । अनोकहानां स्कन्धाः शाखाबन्धाः तेषां संघट्टः संघर्षः तस्माज्जन्म यस्य स तादृक् । उल्काक्षपितचमरीवालभारो दवाग्निः । उल्काभिः अग्निकणच्छटाभिः क्षपितः दग्धः चमरीणां अरण्यगवीनां वालभारः पुच्छकचप्रचयो येन स तादृशः । कस्मिन् । वायौ समीरणे सरति वहति सति । निमित्तसप्तमीयम् । यतः समीरणसमीरितस्तनूनपादधिकं ज्वलति । तोयद त्वमर्हसि समर्थो भवसि शमयितुं निर्वापयितुं अलं अत्यर्थं वारिधारासहस्रैः वर्षोदबिन्दुसंदोहैः । कस्य हेतोः । अर्थान्तरन्यासेन कारणमाह । हि यस्मात्कारणात् उत्तमानां महतां संपदः संपत्तयः आपन्नार्तिप्रशमनफलाः आपन्नानां आपद्गतानां आर्तिः पीडा तस्याः प्रशमनं तदेव फलं यासां तास्तथोक्ताः । यद्यार्तेषु नोपकुर्वन्ति तदा किमेताभिः प्रयोजनम् । जाता अपि निष्फला इत्यभिप्रायः । अर्थान्तरन्यासोऽत्र ।

अध्वनि बाधाविधायकध्वंसाभिधानेनाम्भोधरं संबोधयन्नाह ।

ये त्वां मुक्तध्वनिमसहनाः स्वाङ्गभङ्गाय तस्मि-
न्दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५४ ॥

(a) संरम्भोत्पतनरभसाः स्वाङ्ग° J.D.M. (b) लङ्घयेयुर्भवन्तं J.D.M. ; S. not clear (b) मुक्ताध्वानं सपदि J.D.M. (c) वृष्टिपाता° J.D.M. (d) °केषां J.

[तस्मिन् असहनाः ये शरभाः दर्पस्य उत्सेकात् मुक्तः ध्वनिः येन तादृशं, अलङ्घ्यं त्वां उपरि स्वाङ्गभङ्गाय लङ्घयिष्यन्ति, तान्, तुमुलाः करकाणां वृष्टयः, ताः एव हासः, तेन अवकीर्णान् कुर्वीथाः. निष्फलेषु आरम्भेषु यत्नो येषां ते के वा परिभवस्य पदं न स्युः ?

If the S'arabhas there want to attack you from

above,—only to break their own limbs,— out of their excessive arrogance, intolerant of you, inviolable as you are, uttering your voice of thunder, rout them by a laughter of hail-storm. Who would not treat with contempt those that put forth efforts in futile undertakings ?]

ये संरभोत्पतनेत्यादि (?)। अम्भोधर ये शरभाः अष्टापदाः त्वां भवन्तं मुक्तध्वनिं गर्जन्तं असहनाः अमर्षणाः। दर्पोत्सेकाद् मदोद्रेकाद् उपरि ऊर्ध्वं लङ्घयेयुः (?) अभिलङ्घयिष्यन्ति अतिक्रामितुमिच्छां करिष्यन्तीत्यर्थः। तस्मिन् पर्वते नूनं निश्चितं (?) गर्तपातादिना स्वाङ्गभङ्गाय स्वशरीरनाशाय। कीदृशम्। अलङ्घ्यम्। उन्नतत्वादनतिक्रमणीयम्। तान् कुर्वीथाः विदधीथाः त्वं प्रतिबाधितुम्। किंभूतान्। तुमुलकरकावृष्टिहासावकीर्णान् प्रचलजलशिलावर्षोल्लासावक्षितान्। तेषां वृथोत्पतिष्यतां विधुरापायः संपत्स्यते। न पुनर्भवन्तमभिभवितुम्। तदेवार्थान्तरन्यासेन निरूपयति। न केवलं त एव। के वा न स्युः न भवेयुः परिभवपदं पराभवास्पदं। कीदृशाः सन्तः। निष्फलारम्भयत्नाः निष्फलः अशक्यत्वान्निष्प्रयोजनोऽसौ आरम्भ उपक्रमः। तत्र प्रयत्नः आग्रहो येषां ते तथाभूताः। शरभाः रभसवशात्त्वामुत्पत्य जिघृक्षन्ति तव ग्रहीतुमशक्यत्वाद् व्यर्थप्रयासाः क्लेशमनुभवन्ति। अर्थान्तरन्यासः।

सातिशयश्रेयःसिद्ध्याम्भोधरं प्रलोभयन्नाह।

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५५ ॥

(b) °पचितबलिं D. M. (d) कल्पिष्यन्ते J. D. M.

[तत्र सिद्धैः शश्वत् उपहृतः बलिः यस्मै एवंविधं, अर्धेन्दुः मौलौ यस्य तस्य, दृषदि व्यक्तं, चरणन्यासं भक्तिनम्रः परीयाः, यस्मिन् दृष्टे (सति) श्रद्दधानाः करणानां विगमात् ऊर्ध्वं उद्धूतं पापं येषां ते (एवंविधाः सन्तः) अस्य स्थिरं गणपदं तस्य प्राप्तये कल्पन्ते.

There reverently go round the Foot-print of S'iva,

clearly impressed on a rock, to which the Siddhas daily offer worship, which being seen, the faithful have their sins washed clean after the cessation of their senses and eventually attain to the abiding position of a Gaṇa (follower) of S'iva.]

तत्र व्यक्तमित्यादि । तत्र तुहिनाचले चरणन्यासं पादमुद्राम् । कस्य संबन्धिनं अर्धेन्दुमौलेः खण्डेन्दुचूडामणेः । कीदृशम् । व्यक्तं स्पष्टम् । क । दृषदि शिलायाम् । पुनः किंभूतम् । उपहृतबलिं निवेदितापचितिं सिद्धैर्देवविशेषैः शश्वद् अनवरतं । तोयद त्वं भक्तिनम्रः सेवाप्रह्वः तं परीयाः प्रदक्षिणीकुर्याः । तस्य माहात्म्यमाह । दृष्टे विलोकिते यस्मिन् उद्धूतपापाः प्रणष्टपाप्मानः करणविगमात्करणानि इन्द्रियाणि तानि विद्यन्ते यस्य तत्करणं शरीरं तस्य विगमो वियोगः । यदि वा करणप्रणाश एव वपुरपायः । तस्मादूर्ध्वं अनन्तरम् । स्थिरगणपदप्राप्तये । स्थिरं अविनश्वरं गणानां यत्प्रमथानां पदं स्थानं तस्य प्राप्तिः लब्धिः तस्यै कल्पन्ते संपद्यन्ते अस्य परमेश्वरस्य श्रद्दधानाः श्रद्धायुक्ताः । इदमुक्तं भवति । अम्भोद मदर्थे प्रस्थितस्य तव तथा प्रथिततीर्थदर्शनादनन्यसदृशी श्रेयःसिद्धिः संपत्स्यत इति अम्भोधरं प्रति प्रलोभना। अत्रावसरो नामालंकारः । तथा च । अर्थान्तरमुत्कृष्टं सदृशं यदि दोषलक्षणं क्रियते । अर्थस्य तदभिधानं प्रसङ्गतो यत्र सोऽवसरः ॥ (रु० ७.१०३)

परमेश्वरप्रसादलाभसंभावनया पयोधरं प्रलोभयन्नाह ।

> शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
> संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
> निर्ह्रादी ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
> त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ५६ ॥

(b) संसक्ता° D. M. (c) °निह्रादं ते M.; मुरव इव J. D.; कन्दरासु V. (d) समस्तः V. J., नृत्यतस्तत्र पूर्णः D.

[अनिलैः पूर्यमाणाः कीचकाः मधुरं शब्दायन्ते; संरक्ताभिः किन्नरीभिः त्रिपुरविजयः गीयते; कन्दरेषु निर्ह्रादी ते ध्वनिः मुरजः इव स्यात् चेत्, ननु पशुपतेः संगीतार्थः तत्र समग्रः भावी.

The Kicaka reeds, being filled with the winds, are producing soft notes. The sweet-throated Kinnara damsels are chanting the song of the victory over Tripura. If your voice resounding in the valleys were to serve as a drum, the musical equipment of S'iva would certainly be complete.]

शब्दायन्त इत्यादि । शब्दायन्ते शब्दं कुर्वन्ति तत्र पर्वते कीचकाः सच्छिद्रा वेणवः । कथम् । मधुरं सुस्वरमिति क्रियाविशेषणम् । अनिलैः पवनैः पूर्यमाणाः भ्रियमाणरन्ध्रभागाः । इति गीताङ्गवाद्यमुदितम् । संरक्ताभिरिति संरक्तकण्ठीभिः । स्वभावादेव पुरंध्रीध्वनिषु माधुर्यमनिवार्यं भवतीति । भाविताभिर्वा । त्रिपुरविजयः त्रिपुरदाहाख्यः (गीयते) गीतेन उपस्तूयते किंनरनारीभिः । तोयद तव चेत् यदि ध्वनिर्नादः कन्दरेषु गुहागर्भेषु । प्रतिफल(न)वशात् । निर्ह्रादी गम्भीरः मुरज इव । मुरजस्त्रिपुष्करो वाद्यविशेषः । मुरजोऽस्य ध्वनिः उपचारान्मुरजेत्युच्यते यथा मञ्चाः क्रोशन्तीत्युक्ते । मुरजध्वनिसमानस्तावकीनो ध्वनिः स्याद्भवेत् तदा संगीतार्थः संगीतस्य गीतवाद्यनृत्यसमुदायोऽर्थः । स पशुपतेः शंभोः संध्याताण्डविनः चण्डीपतेः आतोद्यमानभवद्गम्भीरगर्जितलाभेन समग्रः भावी भविष्यति । वाद्याङ्गत्वान्नृत्तस्यार्थः संपूर्ण एव भविष्यतीति भावः । अत्र परमेश्वरस्य प्रियं कुर्वतस्तव ततः प्रसादलाभः संभाव्यत इति वारिमुचः प्ररोचना । अत्रोपमा ।

उत्तराशां प्रति त्वरितगमनोपायं पयोदस्योपदिशन्नाह ।

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥ ५७ ॥

(c) दिशमभि° V. °मनुसृतः J.

[प्रालेयस्य अद्रेः उपतटं तान् तान् विशेषान् अतिक्रम्य, भृगुपतेः यशसः वर्त्म, हंसानां द्वारं यत् क्रौञ्चरन्ध्रं, तेन, तिरश्चा आयामेन शोभते असौ तादृशः, बलेः नियमने अभ्युद्यतस्य विष्णोः श्यामः पादः इव, उदीचीं दिशं अनुसरेः.

Having gone over all the various sights in the vicinity of the ridge of the Himālayas, pass through the Hole of the Krauñca, the entrance of the swans, the path of Paras'urāma's glory, and go northwards by that route stretching yourself horizontally, looking like a second dark-skinned foot of Viṣṇu, bent on punishing Bali.]

प्रालेयाद्रेरित्यादि । प्रालेयाद्रेः तुषारगिरेः उपतटं तटसमीपे इत्यव्ययीभावः । तांस्तान् विशेषान् । भूतपतिपादन्यासप्रभृतीन् अतिक्रम्य उल्लङ्घ्य यत् क्रौञ्चरन्ध्रं विवरम् । कीदृशम् । हंसद्वारं हंसानां मानसं सरः अनुगच्छतां तद्द्वारं निर्गमोपायः । पुनः कीदृशम् । भृगुपतियशोवर्त्म भृगुपरशुरामस्य यशःप्रसरणसरणिः । पुरा किल तेन स गिरिः शरैर्दारित इति तेन वर्त्मना त्वं उदीचीं दिशं अनुसरेः अनुगच्छेः । तिर्यगायामशोभी तिर्यक् तिरश्चीनः आयामः विस्तारः तेन शोभते इति धर्मो यस्य स तथोक्तः । तथा सन् अधिकं आकाशदेशं व्याप्नुवानः सन् कीदृशः प्रतिभासिष्यसे । पादः इव चरणः इव श्यामः कृष्णः । कस्य । विष्णोः त्रिविक्रमस्य । कीदृशस्य । बलिनियमनाभ्युद्यतस्य बलेः दनुजराजस्य नियमनं नियन्त्रणं तत्र अभ्युद्यतस्य कृतोद्यमस्य । अत्र निखिलजगद्वन्दनीयनारायणचरणोपमानेन मनोभिमानमम्भोधरस्याध्यारोपयति । अत्रोपमा ।

नूतनकौतुककारिदेशदर्शनापदेशेनाम्भोधरस्यालकाधारभूधराधिगममुपदिशन्नाह—

> गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
> कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
> शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
> राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ५८ ॥

(d) प्रतिनिशमिव V. प्रतिदिनमिव J. D. M.

[ऊर्ध्वं गत्वा च दशमुखस्य भुजैः उच्छ्वासिताः प्रस्थानां संधयः यस्य तादृशस्य, त्रिदशानां वनिताः तासां दर्पणस्य कैलासस्य, अतिथिः

स्याः, यः कुमुदवत् विशदैः शृङ्गाणां उच्छ्रायैः खं वितत्य प्रतिदिशं राशीभूतः त्र्यम्बकस्य अट्टहासः इव स्थितः.

And going upwards be a guest of that Kailāsa, the joints of whose peaks were loosened by the arms of Rāvaṇa and which serves as a mirror to the heavenly damsels. Stretching out in the sky with his tall peaks, white like the night lotuses, he appears to be the laughter of S'iva piled up in each quarter.]

गत्वा चोर्ध्वमित्यादि। हे पयोद प्रागवष्टब्धान्तरिक्षात् ऊर्ध्वं उपरि गत्वा। गन्तव्यस्याथवा ऊर्ध्वं अनन्तरम्। चकारोपि गत्यानन्तर्यसमुच्चये। कैलासस्य स्फटिकगिरेः अतिथिः स्याः अभ्यागतो भवेः तं गच्छेः इत्यर्थः। कीदृशस्य। दशमुखभुजोच्छ्वासितप्रस्थसन्धेः दशवदनदोःपटलविघटिततटबन्धस्य। पुरा किल कैलासशिखरी निजभुजबलदर्पोद्रेकाद् दशकन्धरेणोद्धृतः। पुनः कीदृशस्य। त्रिदशवनितादर्पणस्य अमरनारीमुकुरस्य। तस्यावदातकान्तेः उपरि विहरमाणानां अनिमिषयोषितां वपुःप्रतिबिम्बत्वेन दर्पणत्वमुचितमिति। अस्य विशेषणद्वयमपि रमणीयत्वकथनार्थम्। स कीदृशः। (यः) शृङ्गोच्छ्रायैः शिखरप्राग्भारैः। कीदृग्भूतैः। कुमुदविशदैः कुमुदवद् विशदाः तैः शिखरैः खं आकाशं वितत्य व्याप्य स्थितः कृतावस्थानः। स कीदृशः प्रतिभाति। राशीभूतः पुञ्जीभूतः प्रतिदिशं दिशं दिशं प्रति त्र्यम्बकस्य धूर्जटेः अट्टहासः इव उद्भटहास इव। अमुनास्य गिरेर्गिरिशविलासवसतित्वमुक्तम्। अत्रोत्प्रेक्षा।

स्फटिकगिरिगमनादम्बुदस्यातिशयशोभाविर्भावं प्रकाशयन्नाह।

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ५९ ॥

(b) °द्विरदरदन° J. D. (c) °लीलामद्रेः V.

[स्निग्धं च तत् भिन्नं च अञ्जनं तस्य आभेव आभा यस्य

तस्मिन् त्वयि तटं गते (सति), सद्यः कृत्तस्य द्विरददशनस्य छेदवत् गौरस्य तस्य अद्रेः, मेचके वाससि अंसयोः न्यस्ते सति हलभृतः इव (शोभां), स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां भवित्रीं शोभां उत्पश्यामि,

With you on its ridge, black like glossy, pounded collyrium, while it would be as white as a section of the elephant's tusk newly cut, I can well imagine the resulting beauty of the mountain, worthy of being gazed on with unwinking eyes, resembling that of Balarāma with a dark mantle flung on his shoulder.]

उत्पश्यामीत्यादि। उत्पश्यामि अहं उत्प्रेक्षे त्वयि तटगते भवति सानु अधिरूढे। कीदृशे। स्निग्धभिन्नाञ्जनाभे स्निग्धं अरूक्षं भिन्नं विदारितं यदञ्जनं कज्जलं तद्वद् आभा प्रभा यस्य तस्मिन्। तस्य स्फटिकगिरेः। कीदृशस्य। सद्यःकृत्तद्विरददशनच्छेदगौरस्य। सद्यः तत्क्षणं कृत्तः छिन्नः स चासौ द्विरददशनः दन्तिदन्तः तस्य छेदः कलितप्रदेशः तद्वद्गौरः अवदातः तस्य। शोभां श्रियं लोचनालोकनीयां भवित्रीं भविष्यन्तीम्। किंभूताम्। स्तिमितनयनप्रेक्षणीयां अतिरमणीयत्वात् निश्चललोचनालोकनीयां भवित्रीं भविष्यन्तीम्। अंसन्यस्ते स्कन्धारोपिते सति हलभृतो बलभद्रस्य मेचके सितेतरे वाससि इव वस्त्रे इव। या शोभा संभवति तां त्वं लप्स्यसे इत्यभिहितं भवति। अत्र रेवतीरमणरमणीयवसनोपमानकथनेन पाथोदं प्रमोदयन् निजप्रयोजननिष्पत्तये त्रिपुरहरगिरिशिखरारोहणे नियुक्तम् (? °क्तवान्)। अत्रोपमा।

कैलासमाश्रितवतः पयोदस्य दाक्षायणीचरणसेवामुपदिशन्नाह।

हित्वा नीलं भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं व्रज मणिशिलारोहणायाग्रयायी ॥ ६० ॥

(a) हित्वा तस्मिन् D. M. तस्मिन् हित्वा J. (b) विहरेत् J. V. D. (c) भङ्गीं भक्त्या D. °जलोऽस्याः V. (d) सोपानं त्वं D., मणितटारो° D. M. °रोहणायाग्रचारी J. सुखपदस्पर्शमारोहणेषु V.

[तस्मिन् क्रीडार्थे शैले च शंभुना भुजगवलयं हित्वा दत्तः हस्तः यस्याः सा तादृशी गौरी यदि पादचारेण विचरेत्, (तर्हि) अग्रयायी, स्तम्भितः अन्तर्हितः जलस्य ओघः यस्य सः, भङ्गीनां भक्त्या विरचितं वपुः येन तथाविधः (सन्), मणिमयीनां शिलानां आरोहणाय सोपानत्वं व्रज.

On that pleasure-mountain, moreover, if Parvati chances to walk about on foot, S'iva offering his arm to her after removing the coils of snakes round it, be the first to serve as a flight of stairs for her to climb the jewelled cliffs, arranging your form in a series of graded levels and paralysing all movement of the water within.]

हित्वा तस्मिन्नित्यादि(?)। हे जलद तत्र क्रीडाशैले कैलासे भूभृति गौरी गिरिराजपुत्री यदि कथंचित् पादचारेण पादाभ्यां चरणाभ्यां चारश्चलनं तेन विचरेत् विहरेत् पादाभ्यां च परिभ्रमेदित्यर्थः चकारः संभावनासमुच्चये। कीदृशी सा। शंभुना भवेन दत्तहस्ता अवलम्बनायार्पितकरा। किं कृत्वा। हित्वा परित्यज्य भुजगवलयं फणिकङ्कणं। केन कारणेन। अस्याः किल भुजङ्गाङ्गसङ्गेन भयं भवान्या भवतीति। किंभूतम्। नीलं गरलगर्भत्वात्कालकान्ति। तदा त्वं सोपानत्वं पदिकात्वं व्रज गच्छ। किमर्थम्। मणिशिलारोहणाय यथा क्रीडन्ती मृडानी महापरिमाणमणिशिलाः सुखेनारोहति। किंभूतो भवान्। भङ्गीभक्त्या विरचितवपुः भङ्गानां इयं भङ्गी तस्या भक्तिः विच्छित्तिः तया तरङ्गपङ्क्तिनिम्नोन्नताकारेण विरचितवपुः कृतशरीरः। पुनः कीदृग्भूतः। स्तम्भितान्तर्जलौघः स्तम्भितो निश्चलीकृतो अन्तर्जलस्य ओघः प्रवाहो येन स तथोक्तः। अन्यथा तस्याः पदे सादः स्यात्। कीदृशस्त्वम्। अग्रयायी अग्रे यातीति अग्रयायी। तत्साधुकारिण्यर्थे णिनिः। अनेन केलिविहारे हरवल्लभाया भवाननुकूलमाचरन् अचिरात् तत्प्रसादमासादयिष्यसि इति तोयदः प्रमोद्यते। अत्र रूपकम्।

रुद्राद्रिप्रणयिनः पयोदस्य देवाङ्गनासंगमं संभावयन्नाह।

तत्रावश्यं कुलिशवलयोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भापयेस्ताः ॥ ६१ ॥

(a) वलयकुलिशो° J. D. M. जनितसलिलोद्गारमन्तःप्रवेशात् V. (c) ताभ्यो मोक्षो यदि तव J. (d) °तैर्भीषयेस्ताः J. तैर्भाययेस्ताः V. D. M.

[तत्र अवश्यं कुलिशं एव वलयं तस्य उद्घट्टनेन उद्गीर्णं तो[यं] येन एवंविधं त्वां सुरयुवतयः यन्त्रधारागृहत्वं नेष्यन्ति. सखे, [घर्म]लब्धस्य तव ताभ्यः यदि मोक्षः न स्यात् (तर्हि) क्रीडायां लोल[ाः] ताः श्रवणयोः परुषैः गर्जितैः भापयेः.

Heavenly damsels are sure to turn you into a s[ort] of mechanical fountain, making you give out water [by] striking the round thunderbolt on you. Being a go[d]send in the sultry weather, if you cannot escape fro[m] their hands, frighten them with rumblings of thunde[r] harsh to the ear, while they are intent on their play.

तत्रावश्यमित्यादि । तत्र स्फटिककटकिनि तटगुहागृहप्रविष्टं त्वां सुरयुवत[यः] त्रिदशतरुण्यो नेष्यन्ति प्रापयिष्यन्ति । अवश्यं निश्चितं यन्त्रधारागृहत्वं यन्त्रा[दि] शालिभञ्जिकाप्रभृतीनि तत्करतलादिप्रवृत्ततोयधाराभिः अभिवर्षद् ग्रीष्[मो]ष्मनिषेधकं धनिनां धा(? ध्र)मयन्त्रधारागृहं तस्य भावः तं त्वां आहितार[ः] कीदृशं भवन्तम् । कुलिशवलयोद्घट्टनोद्गीर्णतोयं कुलिशानां वज्राणां वलया[नि] कङ्कणानि तेषां उद्घट्टनेन घर्षणेन उद्गीर्णं तोयं वारि येन स तथोक्तः तम्[।] तत एव धाराधरस्य धारागृहायमाणत्वं उपपन्नम् । ताभ्यः सुरसुन्दरीभ्[यो] मोक्षो मोचनं तव यदि चेत् न स्यात् न भवेत् । कीदृशः । घर्मलब्ध[स्य] निदाघप्राप्तस्य । क्रीडालोलाः लीलालम्पटाः ता यदि भवन्तं न मुञ्चेयुः त[दा] सखे मित्र भापयेः त्रासयेः ताः । केनोपायेन । गर्जितैः निजध्वनिभिः[।] किंभूतैः । श्रवणपरुषैः कर्णकटोरैः । यथा एताः त्वां उद्विज्य त्यजन्ति । अ[त्र] रूपकवस्तुनोः संसृष्टिः ।

भवभूधरागमसुलभदिव्यभावानुभावभावणेन अम्भोद प्रलोभयन्नाह ।

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानि स्ववातै-
श्छायाभिन्नः स्फटिकविशदं निर्विशेस्तं नगेन्द्रम् ॥६२॥

(b) कुर्वन्कामात् V. D.; S. not clear. ऐरावणस्य V. (c) धुन्वन्वातैः सजलपृषतैः कल्पवृक्षांशुकानि V. °न्यंशुकानीव वातैः D. M. (d) नानाचेष्टैर्जलद ललितैः J. D. M. निर्विशेः पर्वतं तं V.

जलद, हेमाम्भोजानां प्रसवि, मानसस्य सलिलं आददानः, ऐरावतस्य क्षणं मुखार्थेन पटेन कामं प्रीतिं कुर्वन्, कल्पद्रुमाणां किसलयानि अंशुकानि स्ववातैः धुन्वन्, छायया भिन्नः तं स्फटिकमिव विशदं नगेन्द्रं निर्विशेः.

Enjoy the great mountain, clear like crystal: duplicating yourself by your reflection there, taking in water of the Mānasa, where the golden lotuses grow, humouring the Airāvata to his heart's content by serving as a temporary covering for his trunk, or shaking with your breezes the tender leaves of the heavenly trees like so many fine garments.]

हेमाम्भोजेत्यादि। हे जलद निर्विशेः उपभुञ्जीथाः तं नगेन्द्रं अद्रिराजम्। कीदृशम्। अमलं (?) निर्मलं अत एवात्र प्रतिबिम्बनोपपत्तिः। किं भूतस्त्वं। छायाभिन्नः छायया प्रतिबिम्बेन भिन्नो द्विधाभूतः। तस्योपभोगप्रकारं निरूपयति। आददानो गृह्णन् सलिलं उदकं मानसस्य देवसरसः। कीदृशम्। हेमाम्भोजप्रसवि हेम्नः सुवर्णस्य अम्भोजानि सरोजानि तेषां प्रसवः प्रभवः स विद्यते यस्य तं तथोक्तम्। कनककोकनदोत्पादकम्। एतेन तदुदकस्य शक्तिविशेषप्रतिपादनं कुर्वन्नाह। क्षणं मुहूर्तं मुखपटप्रीतिं मुखपटः करिणां वदनाच्छादनं वासः तत्र तेन वा प्रीतिः तुष्टिः तां ऐरावतस्य त्रिदशकरिणः। कुञ्जराः किल मुखपटेन प्रावार्यन्ते। यदि वा वियद्विहारिणः सुरसिन्धुरस्य मुखे

लम्बमानः पट इव। पश्चात्तां रुचिमुत्पादयन् तथा। धुन्वन् कम्पयन् कल्पद्रुमकिसलयानि कल्पद्रुमाणां अमरतरूणां किसलयानि पल्लवानि। किंभूतानि। अंशुकानि वस्त्राणि। स्ववातैः निजानिलैः। अमुना अम्भोधर भवतो भवभूधरमधिवसतः स्वर्गसङ्गविभवानुभावो भविष्यति इत्यभिहितं भवति। अत्रोदात्तम्।

कामिनीकमनीयकुवलयशोभालाभापदेशेन जलधरं धनाधिपपुरीं अधिगमयितुमाह।

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै-
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६३ ॥

(a) °दुगूलां V. (c) °माना J. V. M.

[हे कामचारिन्, प्रणयिनः (उत्सङ्गे) इव तस्य उत्सङ्गे स्रस्तं गङ्गा एव दुकूलं यस्याः तथाविधां अलकां दृष्ट्वा न त्वं ज्ञास्यसे इति न, या उच्चैः विमानैः वः काले, कामिनी मुक्ताजालेन ग्रथितं अलकं इव, सलिलस्य उद्गारः यस्मात् तादृशं अभ्राणां वृन्दं बिभर्ति.

When you see her on the lap of Kailasa, as of a lover, the Ganges lying disorderly by her side like (a discarded) garment, O cloud who can go wherever you like, you cannot fail to recognise her as Alakā, who, in your season, wears with her lofty buildings water-discharging clouds as a lady her tresses of hair decked with strings of pearls.]

तस्योत्सङ्गे इत्यादि। तस्योत्सङ्गे तस्य प्रागुक्तस्य कैलासगिरेः उत्सङ्गे। प्रणयिन इव प्रियतमस्येव। स्रस्तगङ्गादुकूलां स्रस्तं भ्रष्टं गङ्गा गगननदी सैव दुकूलं वसनं यस्याः सा तथोक्ता ताम्। प्रमदापि प्रियतमोत्सङ्गसङ्गिनी स्रस्तवस्त्रा भवति। तां अलकापुरीं अलकां समीपवहज्जाह्नवीचिह्नां दृष्ट्वा विलोक्य। पुनः संभावनायां। अम्भोद न त्वं न ज्ञास्यसे अपि तु ज्ञास्यसि निःसंदिग्धं अवगमिष्यसि इत्यर्थः। कामचारिन् अप्रतिहतगते। पुनरभिज्ञानान्तरमाह।

या पुरी वः युष्माकं काले समये। जलदकाले इति यावत्। वहति धारयति अभ्रवृन्दं वारिवाहनिवहम्। कीदृशम्। सलिलोद्गारं सलिलं उदकं तमुद्गिरति तत्। उच्चैर्विमानैः प्रांशुप्रासादैः कामिनीव भूषाभिलाषिणी योषिदिव अलकं कबरीकलापम्। कीदृशम्। मुक्ताजालग्रथितं मौक्तिकदामदृढम्। अत्र अलकायाः कामिनीत्वं तद्विमानानां उत्तमाङ्गत्वं तोयदस्य तत्केशत्वं तद्वारिधाराणां मुक्तापङ्क्तित्वम्। उपमितेन जलदमलकां प्रापयितुं प्रलोभयति। अत्रोपमा।

सदृशवस्तूपन्यासेन अम्बुदस्य अलकाविलोकनकौतुकं उत्पादयितुमाह।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६४ ॥

(b) प्रहतमुरवाः स्निग्धपर्जन्यघोषम् J. D.

[यत्र, ललिताः वनिताः येषु, सचित्राः, संगीताय प्रहताः मुरजाः येषु, मणिमयी भूः येषां, अभ्रंलिहानि अग्राणि येषां, तादृशाः प्रासादाः, विद्युत्वन्तं, इन्द्रचापेन सहितं, स्निग्धः गम्भीरः घोषः यस्य तं, अन्तः तोयं यस्य तं, तुङ्गं त्वां तैः तैः विशेषैः तुलयितुं अलम्।

The palatial buildings of this Alakā will be able to stand a comparison with you in every detail: if you are accompanied by lightning, they have beautiful ladies inside, if you have the rainbow, they have paintings; if your sound is soft and deep, so are the drums which are struck there for music, if you are filled with water, they have crystal-pavements, if you are lofty, there are sky-kissing terraces.]

विद्युत्वन्तामित्यादि। यत्र यस्यां प्रासादाः हर्म्याणि त्वां तुलयितुं अनुकर्तुं तैस्तैः विशेषैः अभिधीयमानैः धर्मैः अलं समर्था भवन्ति। किंभूतं भवन्तम्। विद्युत्वन्तं विद्युत् तडित् सा विद्यते यस्य स विद्युत्वान् तम्। तसोस्तसौ

1. Ms. अलं. प्रा०

मत्वर्थीये इति तकारस्य तकारः। ते च कीदृशाः। ललितवनिताः सुकुमारनारीकाः। सेन्द्रचापं सह इन्द्रचापेन नानावर्णेन धनुषा वर्तते इति वः तम्। सचित्राः सह चित्रेण आलेख्येन वर्तन्ते। तदप्यनेकवर्णं भवति। संगीताय प्रेक्षणकाय प्रहतमुरजाः ताडितातोद्यविशेषाः स्निग्धगम्भीरघोषं मधुरधीरध्वनिम्। अन्तस्तोयं अन्तर्मध्ये तोयमुदकं यस्य स तादृक् तं। मणिमयमुशे मणिः स्फटिकः तेन निर्वृत्ता भुवो भूमयो येषां ते तथोक्ताः। तुङ्गं उन्नतं। अभ्रंलिहाग्राः घनस्पृशानि अग्राणि प्रान्ताः येषां ते तथा कथिताः। अस्यायमर्थः। पाथोद त्वं आत्मीयधर्मसाधारणगुणाधारां तां कुवेरनगरीं विजानीयाः। अत्रोपमा।

तस्याः चिह्नान्तरं निरूपयन्नाह।

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता रोध्रप्रसवरजसा पाण्डुतामाननश्रीः।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥ ६५॥

(a) °मलके J. D. M. °नुवेधः D. (b) लोध्र° J. D. M.; °मानने श्रीः D. M.

[यत्र वधूनां हस्ते लीलार्थं कमलं, अलकं बालकुन्दैः अनुविद्धं, रोध्रस्य प्रसवानां रजसा पाण्डुतां नीता आननस्य श्रीः, चूडापाशे नवं कुरबकं, कर्णे चारु शिरीषं, सीमन्ते च तव उपगमात् जातं नीपं (अस्ति).

In this Alakā the ladies hold the lotus in hand for sport, their hair are strewn with the Kunda buds, the beauty of their face is heightened with the powder of Lodhra flowers, the fresh Kurabaka is in their braided hair, the lovely S'irīṣa is on their ear, and the Nipa that blooms at your approach is to be seen in the middle of their parted hair.]

हस्ते लीला इत्यादि। यत्र यस्यां पुरि वधूनां पुरन्ध्रीणां कुसुमाभरणं कीदृगाह। हस्ते पाणौ लीलाकमलं लीलायै कमलं सरोजं। अलकं कुलिककुटिल-

केशविन्यासं। बालकुन्दानुविद्धं बालं मुकुलावस्थं कुन्दं कुन्दकुसुमं तेन अनुविद्धं मिश्रम्। नीता प्रापिता रोध्रप्रसवरजसा रोध्रपुष्पपरागः तेन पाण्डुतां गौरत्वम्। आननश्रीः आस्यशोभा। चूडापाशे केशपाशे नवकुरबकं कुरबकलताग्रजं चारु शोभनं। कर्णे श्रवणे शिरीषप्रसूनं। सीमन्ते च केशमध्ये चः समुच्चये (नीपं) पुष्पम्। कीदृशम्। त्वदुपगमजं त्वदागमसमुद्भवम्। अत्र कनकाद्याभरणभापरिहारेण कुसुमालंकारधारणं नारीणां नागरिकत्वं प्रतिपादयति। धनाधिपतेः दिव्यानुभावितया तत्संनिधौ सर्वदा निखिलर्तुसंभवात् एकस्मिन्काले कमलादिसकलकुसुमप्रसाधनं वधूनामुपपन्नमेव। अमुना लक्षणेन यक्षेश्वरपुरीं तां तोयद त्वं अवगच्छेः। अत्रोदात्तम्।

स्वातिशयविभवोपभोगिवर्णनव्याजेन जलदस्य पुण्यजननगरीं जिगमिषातुरां कारयितुमाह।

> यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
> ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः।
> आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
> त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ६६ ॥

(b) °रचिता° D. M. (d) °ध्वनिषु मधुरं J.

[यस्यां सितमणिमयानि स्थलानि ज्योतिषां छायाः एव कुसुमानां रचनाः येषु तानि हर्म्याणि एत्य, उत्तमाः स्त्रियः सहायाः येषां ते तादृशाः यक्षाः, तव गम्भीरध्वनिः इव ध्वनिः येषां तेषु पुष्करेषु शनैः आहतेषु सत्सु, कल्पवृक्षात् प्रसूतं, रतिः फलं यस्य तादृशं मधु आसेवन्ते.

Yakṣas here, accompanied by excellent damsels, go to mansions of white crystal, with floral decorations made with reflections of stars (of different hues), and there, while the drums are slowly playing with notes deep like yours, they enjoy the wine made from heavenly trees, which serves as a herald to amorous sport.]

---

1. Ms. °प्रसवस्य.

यस्यां यक्षा इत्यादि। यस्यां पुरि यक्षाः पुण्यजनाः एत्य आगत्य हर्म्यस्थलानि हर्म्याणि धवलगृहाणि तेषां स्थलानि उपरितनभूमीः। किंभूतानि। सितमणिमयानि सितमणिः स्फटिकः तेन निर्वृत्तानि। अत एव तानि ज्योतिश्छायाकुसुमरचनानि ज्योतिषां तारकाणां छायाः प्रतिमाः प्रतिकृतयः त एव रचितानि प्रकटीकृतानि कुसुमानि येषु तानि तथाभूतानि। ते च कीदृशाः। उत्तमस्त्रीसहायाः उत्तमस्त्रियः कमनीयकामिन्यः ता एव सहायाः सख्यो येषां ते तादृग्भूताः। आसेवन्ते समन्ताद् आस्वादयन्ति मधु सीधु रतिफलं सुरतकेलिकार्यम्। न तु कलहादिजनकम्। कीदृशम्। कल्पवृक्षप्रसूतं कल्पवृक्षेषु सुरतरुषु प्रसूतं जातम्। पुष्करेषु मृदङ्गेषु वाद्यविशेषेषु आहतेषु ताडितेषु सत्सु। कीदृशेषु। त्वद्गम्भीरध्वनिषु तव गम्भीरो धीरो ध्वनिः ध्वानो येषां ते। कथं। शनकैः मन्दं मन्दं इति क्रियाविशेषणम्। शृङ्गाराङ्गत्वात् पानगोष्ठ्यां कठोररवं वादित्रं अत्र नोपयुज्यते इति भावः। एतेन तां एवंविधसाधारणोपभोगभाग्यभाजं यक्षराजधानीं अम्भोधर बुध्यस्व इत्यर्थतः कथितं भवति। अत्रोपमा।

तामेव अलकां प्रकारान्तरेण ज्ञापयन्नाह।

यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानामङ्गग्लानिं सुरतजनितां यन्त्रजालावलम्बाः।

त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे

व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ६७ ॥

(a) °भुजोच्छ्वासितालिङ्गितानां J. D. M. (b) तन्तुजाल° J. V. D. M. (c) °विशदे श्चोतिताश्चन्द्रपादैः V., °विशदैरिन्दुपादैर्निशीथे J.

[यत्र निशीथे त्वत्संरोधस्य अपगमेन विशदैः चन्द्रस्य पादैः स्फुटं जललवं स्यन्दन्ते तादृशाः, यन्त्रमयाणि जालानि अवलम्बः येषां तादृशाः चन्द्रकान्ताः, प्रियतमानां भुजालिङ्गनेन उच्छ्वसितानां स्त्रीणां सुरतेन जनितां अङ्गानां ग्लानिं व्यालुम्पन्ति.

1. Ms. °धां साधारणोपभोगभागिभाजं.

The moon-crystals, hanging from machine-adjusted windows and oozing out at midnight palpable drops of water on account of the moon's rays shiniug bright, there being no obstruction offered by you, remove there the languor, caused by amorous sport, of women who are oppresed by the close embraces of their darlings.]

यत्र स्त्रीणामित्यादि। यत्र यस्यां पुरि स्त्रीणां अङ्गनानां। कीदृग्विधानां। प्रियतमभुजालिङ्गनोच्छ्वासितानां प्रियतमस्य वल्लभस्य भुजालिङ्गनं बाहुपरिरम्भणम्। आलिङ्गनस्य भुजाविशेषणं स्वास्तिकाभुजाश्लेषव्यावर्तकम्। तेन उच्छ्वासितानां पीडितानाम्। अङ्गग्लानिं गात्रपरिश्रान्तिं सुरतजनितां मोहनोत्पादितां व्यालुम्पन्ति अपनयन्ति। के। चन्द्रकान्ताः इन्दुमणयः। कीदृशाः। यन्त्रजालावलम्बा यन्त्राणि पुत्रिकाप्रभृतीनि तद्युक्तेषु जालेषु वातायनेषु अवलम्बन्ते ते तथोक्ताः स्फुटजललवस्यान्दिनः प्रकटोदबिन्दुस्राविणः अत एव तदङ्गग्लानिग्लापकाः। कैः कृत्वा। चन्द्रपादैः कृत्वा इन्दुरश्मिभिः। कीदृशैः। त्वत्संरोधापगमविशदैः त्वत्संरोधः तवावतरणं तस्यापगमोऽपायः तेन विशदैः अवदातैः। त्वदवतरणनिवृत्तिनिर्मलैः इत्यर्थः। कदा निशीथे अर्धरात्रे तवेन्दुद्युतीनां अधिकोल्लासात्। एतेन इदमुक्तं भवति। यत्र प्रतिरजनि रजनीकरकरसंपर्कतः तुहिनतरपयोबिन्दुस्यन्दिसद्मानि दम्पतिरतिकेलिश्रमहारित्वमनोहरविहाराणि सा पुण्यजनपुरी इति पयोद वेदितव्या। अत्रोदात्तम्।

अभिज्ञानान्तरं तस्या एव पुरा निरूपयन्नाह।

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ६८ ॥

(b) नवजलकणैर्दोष° V., स्वजलकणिका° J. (c) त्वादृशा यन्त्रजालैः J. D. त्वादृशो जालमार्गैः M. (d) °निपुणं V.

[यत्र नेत्रा सततगतिना यस्याः विमानानां अग्रभूमीः नीताः त्वादृशः जलमुचः आलेख्यानां सलिलस्य कणिकाभिः दोषं उत्पाद्य

सद्यः शङ्कया स्पृष्टाः इव धूमस्य उद्गारस्य अनुकृतौ निपुणाः जालैः जर्जराः निपतन्ति.

To the terraces of the lofty buildings of this Alakā, clouds like you are taken by the driving wind, and after spoiling the paintings with particles of water, they come out broken-bodied from the lattice-windows as if terror-stricken (by cunning tricks), cleverly imitating the rising smoke, beiug seized as it were with terror.]

नेत्रा नीता इत्यादि। यत्र यस्यां पुरि नेत्रा नयतीति नेता तेन नेत्रा प्रापकेण नीताः प्रापिताः सततगतिना वायुना यद्विमानाग्रभूमीः यस्याः विमानानि हर्म्याणि तेषामग्रभूमीः उपरितनावनीः। आलेख्यानां तत्रत्यचित्राणां सलिलकणिकादोषं सलिलकणिकाः वर्षतोयविप्रुषः ताभिः दोषः प्रणाशलक्षणः। पयःसंपर्केण हि चित्रं विप्लवते। तं दोषमुत्पाद्य कृत्वा सद्यो झगिति। जलमुचः पयोदाः त्वादृशाः भवादृशाः। कीदृग्विधाः। धूमोद्गारानुकृतिनिपुणाः दक्षाः तद्रूपविभ्रमभाज इत्यर्थः। यस्यां नगर्यां जालैः गवाक्षमार्गैः जर्जराः तत्संघट्टतः स्फुटिताः निष्पतन्ति निर्गच्छन्ति। ते चोत्प्रेक्ष्यन्ते। शङ्कास्पृष्टा इव। अस्माभिरभिवर्षद्भिः अत्र चित्रं विसूत्रितभिति कृतापराधाः विसंस्थुलाः पलायन्ते। सा त्वया तोयधर धनपतेः पुरीति मन्तव्या। अत्रोपमोत्प्रेक्षयोः संसृष्टिः॥

तामेव यक्षेश्वरपुरीं लक्षणान्तरेण बोधयन्नाह।

नीवीबन्धोच्छ्वसितशिथिलं यत्र यक्षाङ्गनानां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलप्रेरणश्चूर्णमुष्टिः॥ ६९॥

(a) °च्छ्रसन° V.; बिम्बाधराणां for यक्षाङ्गनानां J. D. M. (b) वासः कामादनि° V. (d) °प्रेरणा J. D. M.

[यत्र अनिभृतः करः येषां तादृशेषु प्रियेषु नीवीबन्धस्य उच्छ्वसितेन शिथिलं क्षौमं रागात् आक्षिपत्सु (सत्सु), ह्रिया मूढानां

यक्षाङ्गनानां चूर्णस्य मुष्टिः अर्चिर्भिः तुङ्गान् रत्नमयान् प्रदीपान् अभिमुखं (यथा तथा) प्राप्य अपि विफलं प्रेरणं यस्य एवंविधः भवति.

There, while the darlings of Yakṣa damsels are snatching with an immodest hand their linen garment, loosened by the relaxation of the front knot, the handful of powder, thrown by them in the confusion of shame, even when it reaches the jewel-lamps of high-flaming lustre full in the face. becomes useless.]

नीवीबन्धोच्छ्वसितेत्यादि। यत्र यस्यां नगर्यां यक्षाङ्गनानां पुण्यजनपुरन्ध्रीणां क्षौमं पट्टांशुकं। कीदृशं। नीवीबन्धोच्छ्वसितशिथिलं नीवीबन्धः परिधानवसनन्यासविशेषः तस्य उच्छ्वसनं विकासः तेन शिथिलं अगाढं। आक्षिपत्सु प्रियेषु रागाद् उद्गाढरिरंसारसाद् अनिभृतकरेषु मुहुस्तदाक्षेपव्याप्ृतपाणिषु। तासां ह्रीमूढानां लज्जामुग्धबुद्धीनां प्रकाशप्रशमोपायमपश्यन्तीनाम्। चूर्णमुष्टिः। चूर्णं पटवासाद्युपकल्पितः चन्दनादिद्रव्यक्षोदः तेन विशिष्टो मुष्टिः संकोचिताखिलाङ्गुलीकः करः पावकप्रदीपबुद्ध्या पिधापनाय प्रहितः सन् विफलप्रेरणो विफलं प्रद्योतप्रशमात् निरर्थकं प्रेरणं क्षेपो यस्य स तथोक्तः भवति संपद्यते। कदाचिदसौ अन्यतोऽपि पतति। तदर्थमभिमुखमपि प्राप्य आसाद्य रत्नप्रदीपान् मणिमयदीपान् अर्चिस्तुङ्गान् अर्चिषा महसा तुङ्गान् महीयसः शाश्वततेजसः। तोयधर तामेवंविधसमृद्धिभाजं पुण्यजनवसतिं विजानीयाः। अत्र रसवदुदात्तभ्रान्तीनां संकरो नामालंकारः॥

धर्मान्तरोपन्यासेन तामेव नगरीं निवेदयन्नाह।

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेद्यैः कनककमलैः कर्णविभ्रंशिभिश्च।
मुक्तालम्बस्तनपरिसलैश्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥ ७०॥

(b) पत्रच्छेदैः D. omits; prob. not genuine; see Appendix. (c) मुक्ताजालैः स्तनपरिसरच्छिन्न° M., J. M.; also S. कुसच्छेदैः V. मुक्ताजालस्तनपरिसरच्छि° v. l. in S. मुक्ताजालैः स्तनपरिचितच्छि° J.

[यत्र कामिनीनां नैशः मार्गः, सवितुः उदये, गत्याः उत्कम्पात् अलकेभ्यः पतितैः मन्दारपुष्पैः, छेद्यानि पत्राणि येषां तैः, कर्णेभ्यः विभ्रश्यद्भिः कनकस्य कमलैः, मुक्तासु लग्नः स्तनपरिमलः येषां, छिन्नानि सूत्राणि येषां एवंविधैः हारैः च सूच्यते.

There the nocturnal path of the love-smitten damsels is indicated at sun-rise by Mandāra flowers, fallen from their hair in their nervous movements, by gold-lotuses, dropped from their ears, of which the leaves remain still to be detached, by necklaces of which the thread has snapped and the pearls of which have been perfumed with the fragrant substances applied to the bosom.]

गत्युत्कम्पादिति। यत्र यस्यां पुरि कामिनीनां अभिसारिकाणां गत्युत्कम्पात् अलघुजघनभाराक्रान्ततनूनां सरभसाभिसरणेन गतेः उत्कम्पः स्खलनं तस्मात् अलकपतितैः अलकेभ्यः पतितैः प्रच्युतैः मन्दारपुष्पैः देवद्रुमकुसुमैः। पत्रच्छेद्यैः छेद्यं छेदनीयं पत्रं लतादि (येषां) तादृशैः कनककमलैः काञ्चनकोकनदैः कर्णविस्रंसिभिः कर्णाभ्यां विस्रंसन्ते भ्रश्यन्ति तैः। पत्रच्छेदैरिति पाठान्तरे नागवल्लीदलकिशलयैः। (हारैः) चः समुच्चये। कीदृशैः। छिन्नसूत्रैः छिन्नानि द्विधाभूतानि सूत्राणि गुणाः येषां तैः। पुनः किंभूतैः। मुक्तालग्नस्तनपरिमलैः मुक्तासु मौक्तिकेषु लग्नः संबद्धः स्तनयोः परिमलो मलयजादीनां आमोदो येषां तैः। मुक्ताजालस्तनपरिसरच्छिन्नसूत्रैश्च हारैः यदि पाठः तदा मुक्ताजालैः उत्तमाङ्गालंकारैः तथा स्तनौ परिसरन्ति स्तनपरिसराः पूर्वं पश्चात् छिन्नसूत्राश्च ये हाराः तैः। पीनस्तनतटसंघट्टत्रुटिततनुभिः इत्यर्थः। पथिपतिताभरणाग्रहणात् तत्रत्यानां ऐश्वर्यमुक्तम्। नैशो निशि भवो मार्गः पन्थाः सवितुः उदये आदित्यस्य उद्गमे। सूच्यते कथ्यते। इदमुक्तं भवति। निपतितमुक्ताद्यलंकारदर्शनेन कामिनीजनः कान्तकेतनममुना पथा निशि प्रयात इति प्रातः अनुमीयते। तोयधर तामेवंविधविलासिजनकृतनिवासां ऐलविलभुजपालितां पुरीं अवेहि। अत्रानुमानम्।

चिह्नान्तरेण तामेव पुरीं प्रस्तुवन्नाह।

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७१ ॥

(b) भयात्त्वामपि प्रेक्ष्य कामः D. (c) सभ्रूभङ्गं प्रहित° J.

[यत्र साक्षाद् वसन्तं धनपतेः सखायं देवं मत्वा भयात् मन्मथः षट्पदाः एव ज्या यस्य तत् चापं प्रायः न वहति. तस्य आरम्भः, भ्रूभङ्गेण सह प्रहितानि नयनानि येषु तैः, कामिषु एव लक्ष्येषु अमोघैः, चतुराणां वनितानां विभ्रमैः एव सिद्धः.

Cupid there ordinarily does not carry his bow with its string of bees, knowing that S'iva, the friend of Kubera, dwells there in person, his desired purpose, however, being fulfilled by the sportive gestures of clever girls in which glances are shot with knitted eye-brows and which prove unfailing on the targets offered by lovers.]

मत्वा देवमित्यादि । मत्वा ज्ञात्वा देवं धनपतिसखं धनपतेः सखा धनपतिसखो महेश्वरः तं यत्र यस्यां पुरि साक्षात् वसन्तं प्रत्यक्षं तिष्ठन्तं प्रायो बाहुल्येन चापं धनुः न वहति न धारयति । स्वकृत्ये न प्रवर्तते । भयात् त्रासात् । मन्मथः कामः । कीदृशं तत् । षट्पदज्यं षट्पदाः भ्रमरा एव ज्या इव उत्प्रेक्षते । जीवा यस्य तत्ताहग् । एवं तर्हि तत्रत्यतरुणजनस्य कन्दर्पचापव्यापारव्यतिरेकेण कथं रागप्ररोहः । कामः किल कामुकलोकं मधुकरमौर्विकेण कार्मुकेण वशी-करोति । तदर्थमाह । तस्यारम्भः चतुरवनिताविभ्रमैरेव सिद्धः । तस्य स्मरस्य आरम्भः उद्यमः सरसहृदयभेदलक्षणः स चतुरवनिताविभ्रमैः विदग्धवधूविलासैः एव सिद्धो निष्पन्नः । कीदृशैः । सभ्रूभङ्गप्रहितनयनैः सभ्रू-भङ्गानि प्रहितानि प्रेषितानि नयनानि विलोचनानि येषु । तत्र भ्रूभङ्गयाः कार्मुकत्वं असितचललोचनानां चञ्चरीकगुणत्वं विलोचनविमोक्षानां सायकत्वं प्रतीयते । कामिलक्ष्येषु कामिन एव लक्ष्याणि शरव्याणि तेषु

अमोघैः कृतकार्यत्वात्सफलैः। एतेन तद्वासिविलासिनीनां प्रावीण्यमुक्तम्। अत्रोत्प्रेक्षाप्रतीयमानरूपकयोः संसृष्टिः।

स्वभवनाभिज्ञानं ज्ञापयन्नाह।

> तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
> दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
> यस्योद्याने कृतकतनयः कान्तया वर्धितो मे
> हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः॥ ७२॥

(a) °गृहानु° V. D. M. (b) त्वदमरधनु° D. J. तदमरधनु° V. (c) यस्योपान्ते V. D. M. °तनयो वर्धितः कान्तया J.

[तत्र धनपतेर्गृहाद् उत्तरेण अस्मदीयं अगारं सुरपतेः धनुः तद्वत् चारुणा तोरणेन दूरात् लक्ष्यम्. तस्य उद्याने मे कान्तया वर्धितः, कृतकः तनयः, हस्तेन प्राप्यैः स्तबकैः नमितः, बालः मन्दारवृक्षः.

There, our house is to the north of the palace of Kubera, observable from a distance by an arching gate-way which is as charming as the rain-bow. In its garden there is a young Mandara tree, nurtured by my wife as an adopted son and laden with bunches of flowers which can be reached by the hand.]

तत्रागारमित्यादि। तत्र तस्यां अलकायां अगारं गृहं धनपतिगृहात् धनदमन्दिरात् उत्तरेण उत्तरदिग्विभागेन विशेषितम्। इत्थंभूतलक्षणा तृतीया। धनपतिगृहात् अत्र एनप्रत्ययाभावात् न द्वितीया। अस्मदीयं मदीयं दूरात् दवीयोदेशात् लक्ष्यं ज्ञेयं तोरणेन वन्दनमालया। किंभूतेन। सुरपतिधनुश्चारुणा सुरपतेः इन्द्रस्य धनुः अनेकवर्णं चापं। नानारत्नरचितत्वात्। तदपि तद्वत् चारु मनोहरं तेन। यस्य भवनस्य उद्याने प्रमदवने कृतकतनयः कृत्रिमपुत्रः प्रीतिपुत्रत्वात् कान्तया दयितया मे मम वर्धितः उदकसेकादिना वृद्धिं नीतः। कीदृशः। हस्तप्राप्यस्तवकनमितः हस्तेन पाणिना प्राप्याः ग्राह्याश्च

1. Ms. तद्वा.

ते स्तबकाः गुच्छाश्च तैर्विनतो बालमन्दारवृक्षः बालः प्रत्यग्रो मन्दारवृक्षः देवद्रुमविशेषः । एतेन परगृहव्यावर्तकं असाधारणं धर्मं स्वधाम्नोऽभिधत्ते । अत्र स्वभावोक्तिः ।

तस्यैव पुनश्चिह्नान्तरं निवेदयन्नाह ।

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैडूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ ७३ ॥

(b) स्फीता for छन्ना J. D.; कमलमुकुलैः for विकचकमलैः V. D. दीर्घ° for स्निग्ध J. D., वैदूर्य° for वैडूर्य D. M. (d) नाध्या° D. M.

[अस्मिन् मरकतशिलाभिः बद्धः सोपानस्य मार्गः यस्याः सा तथोक्ता, स्निग्धानि वैडूर्यमयानि नालानि येषां तैः, हैमैः विकच-कमलैः छन्ना वापी च (अस्ति); यस्याः तोये कृता वसतिः यैः ते हंसाः त्वां प्रेक्ष्य अपि व्यपगता शुक् येषां एवंविधाः (सन्तः) संनिकृष्टं मानसं न ध्यास्यन्ति.

And in this house there is a well, with stairs leading on to it constructed of emerald slabs and covered up with blooming golden lotuses with shining stalks of lapis lazuli. The swans who have made their home in its waters know of no sorrow and hence will not think of the Manasa, which is near, even after sight of you.]

वापी चास्मिन्नित्यादि । अस्मिन् अस्मद्भवनोद्याने न केवलं मन्दारद्रुम एव वापी च दीर्घिका च । चः समुच्चये । कीदृशी । मरकतशिलाबद्धसोपान-मार्गा मरकतशिलाभिः गारुत्मतरत्नदृषद्भिः बद्धः खचितः सोपानानां पदिकानां मार्गः पन्थाः यस्याः सा तथोक्ता । छन्ना आच्छादिता विकचकमलैः विक-सितसरोजैः । कीदृशैः । हैमैः हेम्नः इमानि तैः । स्निग्धवैडूर्यनालैः स्निग्धानि कान्तिमन्ति वैडूर्याणि विडूररत्नानि तन्मयानि नालानि काण्डानि येषां तैः ।

यस्या वाप्याः तोये जले कृतवसतयः विहितावासाः मरालाः मानसं सुरसरः। कीदृशं। संनिकृष्टं निकटं। कस्मात्। तद्धर्माध्यासितत्वात्। न ध्यास्यन्ति न स्मरिष्यन्ति। तत्र गमनाय नोत्कण्ठयिष्यन्ते इत्यर्थः। किंभूतास्ते। व्यपगतशुचः प्रयातशोकाः त्वामपि भवन्तमपि प्रेक्ष्य विलोक्य। ते हि किल जलदविलोकनेन मानसं सरः स्पृहयन्ति। अत्रोदात्तम्।

विशेषणान्तरेण तामेव वापीं निरूपयन्नाह।

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि॥ ७४॥

(a) यस्यास्तो° V.; विहितशि° J. D.; निचितशि° V. (d) °स्फुटित° J.

[तस्याः तीरे पेशलैः इन्द्रनीलैः रचितं शिखरं यस्य, कनककदलीनां वेष्टनेन प्रेक्षणीयः क्रीडाशैलः (अस्ति). सखे, उपान्तेषु स्फुरिता तडित् यस्य तादृशं त्वां प्रेक्ष्य मम गेहिन्याः प्रियः इति कातरेण चेतसा तं एव स्मरामि.

On its bank there is the pleasure-mountain, with peaks made of beautiful sapphires and lovely with the golden plantain-trees that surround it. It is a favourite with my wife and hence it is with a heart filled with tremor that, when I see you, my friend, lightning playing by your side, I am reminded of just this pleasure-mountain.]

तस्यास्तीरे इत्यादि। तस्याः वाप्या तीरे तटे क्रीडाशैलः केलिशिलोच्चयः। कीदृग्। रचितशिखरः छादितशृङ्गः इन्द्रनीलैः शक्रोपलमणिभिः। किंभूतैः। पेशलैः मनोज्ञैः। कनककदलीवेष्टनप्रेक्षणीयः कनककदल्यः शातकुम्भीयाः रम्भाः तासां वेष्टनं परिक्षेपः तेन प्रेक्षणीयो दृश्यः। मद्गेहिन्याः मम भार्यायाः प्रियः वल्लभः इति हेतोः सखे मित्र चेतसा मनसा कातरेण विरहविसंस्थुलत्वात् अधीरेण प्रेक्ष्य दृष्ट्वा त्वां भवन्तम्। किंभूतम्। उपान्तस्फुरिततडितं उपान्ते

समीपे स्फुरिता प्रेङ्खिता तडिद् विद्युद् यस्य स तादृक् तम् । तमेवाहं अम्भो-धर भूधरं तव सदृशं स्मरामि ध्यायामि । सादृश्यध्यानचिन्तायाः स्मृतिवज्रस्य बोधका इति । सादृश्यं चात्र तमालमलिनत्विषः तडिल्लतापिशङ्गितवपुषः पयोदस्य दृश्यमानमरकतमणिमहःश्यामलिम्ना संघट्टमानकनककदलीकपिशाका-तिरेखेण शिखरिणा साकं प्रतीयते एव । अत्र स्मरणं नामालंकरणम् । तथा च तल्लक्षणम् । वस्तुविशेषं दृष्ट्वा प्रतिपत्ता स्मरति यत्र तत्सदृशम् । कालान्तरा-नभुतं वस्त्वन्तरमित्यदः स्मरणम् ॥ (रुद्रट, ८.१०९)

तदेव गृहोद्यानं चिह्नान्तरेण निवेदयन्नाह ।

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ ७५ ॥

(d) °मदिरा° J[1].; दोहद° J.

[अत्र कुरबकाः एव वृतिः यस्य तस्य माधव्याः मण्डपस्य प्रत्या-सन्नौ, चलः किसलयः यस्य एवंविधः रक्ताशोकः, कान्तः केसरः च. एकः मया सह तव सख्याः वामपादस्य अभिलाषी, अन्यः दोह-दस्य छद्मना अस्याः वदनमदिरां काङ्क्षति.

Here (in our house) is the red As'oka and the lovely Bakula, both close to the Madhavī bower, hedged with Kurabakas. Along with myself, one of them longs for a touch of your friend's (my wife's) left foot and the other, of a mouthful of wine from her, under the pretext of (arboreal) cravings.]

रक्ताशोक इत्यादि । रक्तश्चासौ अशोकश्च रक्ताशोकः कङ्केल्लिपादपः तस्य रक्तपदविशेषणं स्थानान्तरव्यावर्तकम् । स कीदृशः । चलकिसलयः चपल-पल्लवः । केसरश्च बकुलः कान्तः कमनीयः । अत्रोद्यानेऽस्तीति संदर्भः । प्रत्या-

1. Ms. प्रतिवृत्त्या

सन्नौ निकटौ माधवीमण्डपस्य वासन्तीजनाश्रयस्य । कीदृशस्य । कुरवक-वृतेः कुरबकाणां बाणवीरुधां वृतिः आवरणं यस्य । एकः प्रतिपादितो नः आद्यः । पयोद तव सख्याः भवद्वयस्यायाः वामपादाभिलाषी वामं अदक्षिणं चरणं अभिलषतीत्येवंशीलः । सह मया यथाहं कृतापराधः तस्याः पादप्रसादमभिलषामि तथा सोऽपि अशोकः किल स्त्रीपादप्रहारेणोल्लसति । अन्यः द्वितीयः केसरो वाञ्छति इच्छति तद्वदनमदिरां वक्त्रासवं । यथा अहं प्रीतः तथा अयमपि । दोहदच्छद्मना दोहदव्याजेन । अस्याः भवत्सख्या एव बकुलः किल प्रमदावदनासवसेकेन कोरकभरभिन्नो भवति । अत्र सहोक्ति-नामालंकारः । तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रिते । पादेनैकेन कथ्येते सा सहोक्तिर्मता सताम् ॥ (उद्भट, ६६) दण्डी तु (२.३५१) सहोक्तिः सहभावस्य कथनं गुणकर्मणाम् ।

तदेवोद्यानं लक्षणान्तरेण लक्षयन्नाह ।

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः सिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ७६ ॥

(b) मूले नद्धा V. (c) शिञ्जद्वलय° V.; शिञ्जावलय° D. M.

[तयोः (वृक्षयोः) मध्ये च अनतिप्रौढानां वंशानां प्रकाशः इव प्रकाशः येषां तैः मणिभिः नद्धा, स्फटिकमयं फलकं यस्याः तादृशी, काञ्चनी वासार्था यष्टिः (अस्ति), यां, सिञ्जन्ति वलयानि तैः सुभगैः तालैः मे कान्तया नर्तितः वः सुहृद् नीलकण्ठः दिवसस्य विगमे अध्यास्ते.

And between them is a roosting perch of gold, with crystal boards, studded at the bottom with gems of the colour of a bamboo of not excessive growth, and there at the close of day lives the peacock, your friend, whom my wife urges to dance by beating time with her hands, beautiful with the tinkling bracelets.

तन्मध्ये चेत्यादि। तन्मध्ये तयोः रक्ताशोकबकुलयोः मध्यमन्तराले तस्मिन्। चः समुच्चये। वासयष्टिः निवासदण्डः। कीदृशी। काञ्चनी कनकमयी स्फटिकफलका स्फटिकस्य अर्कोपलस्य फलकं आसनपीठं यस्याः सा। कीदृशी। मूले बुध्ने बद्धा नद्धा मणिभिः। किंभूतैः। अनतिप्रौढवंशप्रकाशैः नातिप्रौढाः अनतिप्रौढास्तरुणाः ते च ते वंशाश्च वेणवः तद्वत्प्रकाशन्ते द्योतन्ते तैः मरकतैः इत्यर्थः। तालैः करतालस्फालनवाद्यैः। कीदृशैः। सिञ्जद्वलयसुभगैः सिञ्जन्ति शब्दायमानानि च तानि वलयानि च कटकानि तैः सुभगाः मनोहराः तैः। ननु सिञ्जतेरात्मनेपदित्वादानशा भाव्यम्। अतः सिञ्जत् इत्यसाधु पदम्। अत्र समाधीयते। सिञ्जिः सिञ्जः स इवाचरतीति आयिलोपे सति परस्मैपदं ततः शतृट्तया न दोषः। नर्तितः ताण्डवितः कान्तया दयितया मे मम। यां च वासयष्टिं अध्यास्ते अधिवसति दिवसविगमे वासरावसाने नीलकण्ठः कलापी सुहृन् मित्रं तोयद वो युष्माकम्। एतेन उत्तमविभ्रमभ्राजिष्णुभिः लक्षणैः यक्षान्तरमन्दिरात् अन्यादृशं अस्मद्वेश्म अम्भोद बुध्यस्वेत्यभिहितं भवति। अत्र स्वभावोक्तिः।

निजभवनस्य भूयः सविशेषं चिह्नमुपदिशन्नाह।

> एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
> द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
> क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
> सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्॥ ७७॥

(a) °लक्षणीयं V.

साधो, हृदये निहितैः एभिः लक्षणैः, द्वारोपान्ते लिखिते वपुषी ययोः तौ शङ्खपद्मौ दृष्ट्वा च लक्षयेथाः. नूनं अधुना मद्वियोगेन क्षामा छाया यस्य तादृशं भवनं. सूर्यस्य अपाये कमलं स्वां अभिख्यां न खलु पुष्यति.

Find out my house with these marks, inscribed on the heart, my good friend, and also after observing the S'ankha and Padma, whose forms are painted near the

door. My house is surely of an attenuated splendour now in my absence. For, the lotus does not reveal its charms when the sun is away.]

एभिः साधो हृदयेत्यादि। एभिः अभिहितैः साधो शुद्धाशय पयोद हृदये निहितैः चित्ते व्यवस्थापितैः लक्षणैः लक्ष्मभिः लक्षयेथाः जानीथाः भवनं अगारं। चकारः चिह्नसमुच्चये। न केवलं तैः उक्तप्रकारैः एव। द्वारोपान्ते द्वारसमीपे लिखितवपुषौ चित्रार्पितशरीरौ शङ्खपद्मौ च शङ्खपद्मनामानौ निधी च दृष्ट्वा विलोक्य। कदाचित् अभिहितभवनविभूतेरनुपलम्भे मां असौ असत्यं मंस्यते इत्याशङ्क्याह। (नूनं तस्या इत्यादि ?)। नूनं अहं उत्प्रेक्षे क्षामच्छायं क्षीणशोभं तद्धाम अधुना संप्रति मद्वियोगेन मम विरहेण भविष्यति। एतद् अर्थान्तरन्यासेन निरूपयति। सूर्यापाये रवेः अपगमे खलु निश्चयेन कमलं पद्मं न पुष्यति न पुष्णाति स्वां स्वकीयां अभिख्यां श्रीमत्तां म्लानकान्तित्वात्। अर्थान्तरन्यासः।

निजभुवनविलोकनप्रकारं निरूपयन्नाह।

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ७८ ॥

[शीघ्रः संपातः तस्य हेतोः सद्यः कलभस्य तनुरिव तनुर्यस्य तस्य भावं गत्वा, प्रथमं कथिते क्रीडाशैले निषण्णः, अल्पाल्पा भाः यस्याः तादृशीं, खद्योतानां आल्याः विलसितस्य निभेव निभा यस्याः तादृशीं, विद्युतः उन्मेषः एव दृष्टिः तां, भवनस्य अन्तः पतितां कर्तुं अर्हसि।

For quick access assume the smallness of an elephant's cub and, taking your seat on the aforesaid pleasure-mountain with its charming peak, please cast your glances of lightning-flashes inside the house with an exceedingly diminished lustre, appearing just like the flickerings of a swarm of glow-worms.]

गत्वा सद्यः कलभतनुतामित्यादि । गत्वा व्रजित्वा सद्यो झटिति कलभ-तनुतां करिपोततानवम् । किमर्थम् । शीघ्रसंपातहेतोः शीघ्रं सत्वरं संपातः त्वरणं तदर्थम् । अन्यथा स्थूलतनोस्तव गतिमन्थरता स्यादिति । क्रीडाशैले केलिशिखरिणि प्रथमकथिते पूर्वप्रतिपादिते रम्यसानौ रमणीयाः सानवः प्रस्थाः यस्य तस्मिन् । अमुना विशेषणेन तत्र स्थितियोग्यत्वमुक्तम् । निषण्णः आसीनः सन् अर्हसि योग्यो भवसि कर्तुं विधातुं । विद्युदुन्मेषदृष्टिं विद्युतः तडितः उन्मेषः उन्मीलनं प्रकाशकत्वात् सा एव दृष्टिः दृक् तां । अन्तर्भवनपतितां भवनस्य गृहस्य अन्तः मध्यं तत्र पतितां गताम् । कीदृग्भूतां । अल्पाल्पभासं अतिशयेन अल्पाल्पा भाः प्रभा यस्याः सा तां । अत एव सादृश्यात् खद्योताली-विलसितनिभां ज्योतिरङ्गिणः स्फुरितानुकारिणीम् । अज्ञातपरवेश्मप्रवेशः कथमहं आशङ्कनीयो न स्यां ततः स्वल्पप्रकाशया दृशा इव विद्युता तदुद्यान-स्वर्णभूधरमधिश्रित्य अम्भोधर तदावासमध्यासीनां अस्मद्वधूं उपलभेथाः इति कथितं भवति । अत्रोपमा ।

निजजायां इतरनारीभ्यः सातिशयरूपेण ज्ञापयन्नाह ।

> तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी
> मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
> श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
> या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ ७९ ॥

by way of young woman.

(a) शिखरि° J. D. M.; °धरोष्ठी V. not in Comm. (b) °णप्रेक्षणी V.

[तन्वी, श्यामा, शिखरवत् दशनाः यस्याः तादृशी, पक्वं बिम्बं इव अधरोष्ठः यस्याः तादृशी, मध्ये क्षामा, चकितहरिणीवत् प्रेक्षणानि यस्याः तादृशी, निम्ना नाभिः यस्याः तादृशी, श्रोणीभारात् अलसं गमनं यस्याः तादृशी, स्तनाभ्यां स्तोकं नम्रा, धातुः आद्या सृष्टिः इवः या तत्र स्यात्—

She whom you will see there, slim, dark, with well-arranged teeth, with a nether lip like a ripe *bimba*, with a slender waist, with glances like a frightened roe

with a deep navel, slow in gait with the weight of her hips, a little weighed down with her swelling bosom, (altogether) the premier creation as it were of the Creator by way of a young woman, —]

तन्वी श्यामेत्यादि। तन्वी कृशतनुः इत्याकारचारुता। श्यामा श्यामला इति वर्णाभिरामता। शिखरदशना शिखराः अप्रतीक्ष्णाः दशनाः दन्ता यस्याः सा तथा कथिता। अविषमदशनेत्यर्थः। अथवा शिखरं वज्रं तद्वद् दशना उज्ज्वलदन्ता इति सुदतीत्वम्। पक्वबिम्बाधरोष्ठी पक्वं परिणतं बिम्बं बिम्बीफलं तद्वत् अधरोष्ठो यस्याः सा तथाविधा। इत्यधरोष्ठरागित्वम्। मध्ये मध्यदेशे क्षामा क्षीणा इति शातोदरीत्वम्। चकितहरिणीप्रेक्षणा चकिता त्रस्ता हरिणी कुरङ्गी तद्वत् प्रेक्षणं प्रेक्षितं यस्याः सा तादृशी। इति विलोचनचञ्चलत्वम्। निम्ननाभिः निम्ना गम्भीरा नाभिः उदरैकदेशः यस्याः सा तादृग्भूता। इति प्रत्यङ्गभद्रत्वम्। श्रोणीभारात् नितम्बभरात् अलसगमना मन्थरगतिः इति जघनघनत्वम्। स्तोकनम्रा मनाक् नता स्तनाभ्यां कुचाभ्याम्। इति पयोधरगुरुत्वं तस्याः प्रतीयते। या योषिद् एवंविधरूपसंपदुपेता सा मद्दयिता इत्येवं मन्तव्यम्। अभिज्ञानार्थं प्रत्यङ्गशोभामभिधाय समुदायसौन्दर्यं वर्णयति। किं बहुना। तत्र अलकायां अहं एवं मन्ये युवतिविषये स्त्रीषु सृष्टिः सर्गः आद्या इव प्रथमेव स्याद् भवेत्। धातुः वेधसः। अस्यायमभिप्रायः। समानरूपेषु बहुषु क्रियमाणेषु यदादौ निर्माप्यते तद् अनुद्वेगानुकर्तृमनसो रम्यनिर्माणं भवति। अत्रोत्प्रेक्षा।

प्रतिपादितदयितारूपदर्शनादम्बुदस्य भाविनं संदेहमुपनाशयन्नाह।

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥ ८०॥

Changed

(a) जानीथाः M. (c) गाढोत्कण्ठागुरुषु V. also noted as v. l. by S., गाढोत्कण्ठा गु° J. D.; बाला J. D. (d) जाता, °मथिता, पद्मिनी वान्यरूपा J. D.

[परिमिता कथा यस्याः तादृशीं, मयि सहचरे दूरीभूते (सति) चक्र-
वाकीं इव एकां, एषु गुरुषु दिवसेषु गच्छत्सु गाढा उत्कण्ठा यस्याः
एवंविधां बालां, शिशिरेण मथितां पद्मिनीं वा, मन्ये अन्यरूपां जातां,
तां मे द्वितीयं जीवितं जानीयाः.

Know her to be my second life, her of measured
words and lonely like a solitary Cakravākī, I her mate
being far away, the poor girl, full of intense yearn-
ings while these heavy days are dragging on, changed
methinks (now), like a lotus-creeper blasted by frost.]

तां जानीया इत्यादि। तां उक्तलक्षणां जलद मजायां जानीयाः बुध्यस्व।
ईदृशीम्। परिमितकथां मितभाषिणीं जीवितं प्राणितं मे मम द्वितीयं अपरम्।
दूरीभूते व्यवहिते मयि सहचरे पत्यौ चक्रवाकीमिवैकां कोककामिनीमिव
एकां केवलाम्। गाढोत्कण्ठां प्रबलोत्कलिकां गुरुषु दुर्वहेषु दिवसेषु वासरेषु एषु
विरहेष्वेषु गच्छत्सु अतिक्रामत्सु सत्सु। गाढोत्कण्ठागुरुषु यदि पाठः तदा
उत्कण्ठागुरुषु दुःसहेषु इति व्याख्येयम्। बालां मुग्धां जातां भूतां एवमहं मन्ये
शिशिरमथितां हिमपतनकदर्थितां पद्मिनीमिव अन्यरूपां कमलिनीमिव स्वरूपपरि-
त्यागाद् रूपान्तरमापन्नां इत्यर्थः। ज्ञानक्रियया व्याप्तत्वात् सर्वत्र कर्म कारकम्।
अत्रोत्प्रेक्षा।

आत्मनोनुरागं विरहकृशतनुभावं च स्ववध्वा बोधयन्नाह।

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥ ८१ ॥

(a) °नेत्रं बहूनां V. J. (b) °धरौष्ठम् V., not supported by
Comm. (d) त्वदुपसरण° V.; त्वदुपगमन° D.

प्रबलेन रुदितेन उच्छूने नेत्रे यस्य, निःश्वासानां अशिशिरतया,
भिन्नो वर्णः यस्य एवंविधः अधरः ओष्ठः यस्य तादृशं, हस्ते न्यस्तं,

लम्बा अलकाः यस्य तस्य भावात् असकला व्यक्तिः यस्य एवं-विधं तस्याः प्रियायाः मुखं, तव अनुसरणेन क्लिष्टा कान्तिः यस्य तादृशस्य इन्दोः दैन्यं नूनं बिभर्ति.

I am afraid, the pallor of the moon, when its lustre has suffered by your traversing its track, has (now) come on the face of that darling of mine, which is pillowed on her hand, with eyes swollen by excessive weeping and nether lip blanched by hot sighs, its view being partially blocked by hair hanging loosely (over it).]

नूनं तस्या इत्यादि। नूनं निश्चितं अहमेवं मन्ये तस्या उक्तरूपायाः प्रियायाः प्रेयस्याः मुखं वदनं। कीदृशम्। प्रबलरुदितोच्छूननेत्रं प्रबलं आविच्छिन्नं रुदितं रोदनं तेन उच्छूने श्वयथुयुक्ते नेत्रे नयने यत्र तत्तादृग्। पुनः कथं-भूतम्। भिन्नवर्णाधरोष्ठं भिन्नवर्णो भ्रष्टरागो अधरोष्ठो यस्य तत्तादृशम्। केन कारणेन। अशिशिरतया उष्णत्वेन निःश्वासानां निःश्वसितानाम्। हस्तन्यस्तं पाणौ आरोपितम्। स्वभावः खल्वेष मनःखेदात् अङ्गनानां कपोलः करतलतल्पः संपद्यते। असकलव्यक्ति असकला अपरिपूर्णा व्यक्तिः आकारो यस्य तत्तथा-रूपम्। कुतः। लम्बालकत्वात् लम्बाः कर्तनासंस्काराभावात् प्रवृद्धाः अलका भालावलम्बिनः कुटिलाः केशाः तेषां भावः तत्त्वं। तस्मात्। इन्दोः चन्द्र-मसो दैन्यं दीनत्वम्। कीदृशस्य। त्वदनुसरणक्लिष्टकान्तेः तोयद त्वदनुसरणं तवानुगमनं तेन क्लिष्टा बाधिता कान्तिः प्रभा यस्य तस्य बिभर्ति भरिष्यति धारयिष्यति। वर्तमानसामीप्ये वर्तमानावद्वा इति भविष्यति काले वर्तमानः। संप्रति जलद त्वदाच्छादनच्छादितद्युतेः चन्द्रमसः सादृश्यं अनुभविष्यतीति भावः। अत्रोत्प्रेक्षोपमा।

स्ववल्लभायाः संभाव्यमानव्यापारं निरूपयन्नाह।

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ ८२ ॥

(c) शारिकां V. D. (d) निभृते V., गिरिके D.

[बलिना व्याकुला वा, विरहेण तनु, भावेन गम्यं, मम सादृश्यं लिख-
न्ती वा, मधुरं वचनं यस्याः तादृशीं पञ्जरस्थां सारिकां ' रसिके, भर्तुः
स्मरासि कच्चित् ? त्वं हि तस्य प्रिया ' इति पृच्छन्ती वा ते आलोके
पुरा निपतति.

(This is how) she will be seen by you: occupied
with worship (of gods); or painting a likeness of me,
emaciated by separation, pictured to herself by imag-
nation ; or asking the sweet-tongued S'arikā in the
cage : "Does your master's memory dwell in your mind,
Rasikā ? You were his favourite."—]

आलोके ते इत्यादि । आलोके दर्शनपथे पाथोद ते तव निपतति
निपतिष्यति यास्यतीत्यर्थः पुरा अग्रे । यावत्पुरानिपातयोर्लट् इति पुरायोगे
भविष्यन्तीति वर्तमाना । सा मदीया दयिता । कीदृशी सती । बलिव्याकुला
वा व्यग्रा वा विकल्पप्रतिपादकः । मत्सादृश्यं मदनुकारं वा विरहतनु
वियोगदुर्बलं भावगम्यं चित्तोल्लिखितं लिखन्ती चित्रफलकादौ विन्यस्यन्ती ।
पृच्छन्ती वा अनुयुज्यन्ती वा सारिकां सारीं पञ्जरस्थां पञ्जरगताम् । पञ्जराः
पक्षिरक्षणाय क्रियन्ते । कीदृशीं ताम् । मधुरवचनां मधुरं मञ्जु वचनं यस्याः
ताम् । कच्चिदिति इष्टप्रश्ने । हे रसिके करुणरसोपस्कृतचित्ते भर्तुः स्वामिनः
किं स्मरसि ध्यायसि न वा । त्वं हि यस्मात् तस्य स्वामिनः प्रिया प्रीतिपात्रं
इति स्मरणकारणम् । अत्र दीपकोलंकारः । जातिक्रियागुणद्रव्यवाचिनानैक-
वर्तिना । सैर्ववाक्योपचारश्चेत् तदाहुर्दीपकं बुधाः[3] ॥ (दण्डी, २.९७)

वियोगदाहदग्धहृदो निजवध्वाः शून्यहृदयतां निवेदयन्नाह ।

1. Edn. °चिनैकत्र° 2. Edn. °वयोपकार°. 3. Edn. यथा.

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥ ८३ ॥

(c) तन्त्रीरार्द्रां J. V.

[सौम्य, मलिनं वसनं यस्य एवंविधे उत्सङ्गे वीणां निक्षिप्य मम गोत्रं अङ्कः यस्मिन्, विरचितानि पदानि यस्य, तादृशं गेयं उद्गातुकामा, नयनसलिलैः आर्द्रां तन्त्रीं कथंचित् सारयित्वा स्वयं कृतां अपि मूर्च्छनां भूयोभूयः विस्मरन्ती (सा ते आलोके निपतति).

Or dropping her Vīṇa into her lap, on which the garment is not clean, with the idea of singing a song which is so worded that my name stands out as a distinctive mark, and playing on the string, wetted with her tears, constantly forgetting the tone-combinations, although they are of her own composition.—]

उत्सङ्गे वा इत्यादि। उत्सङ्गे अङ्के। कीदृशे। मलिनवसने मलीमसवाससीत्यनलंकृतिः अभिहिता। तस्याः पतिव्रतात्वप्रतिपादनम्। सौम्य दर्शनीय इति अम्भोधरसंबोधनम्। निक्षिप्य आसज्य वीणां विपञ्चीं। तन्त्रीं सिञ्जां आर्द्रां क्लिन्नां नयनसलिलैः उत्कलिकाजन्मभिः विलोलविलोचनजलैः सारयित्वा सज्जीकृत्य कथंचिद् कष्टेन दुःखनिर्भरहृदयत्वात्। गेयं गीतं उद्गातुकामा उद्गातुं उद्ग्रहीतुं कामः अभिलाषो यस्याः सा तादृशी। कीदृशं तत्। मद्गोत्राङ्कं मम गोत्रं नाम तदेव अङ्कः चिह्नं यस्य यत्र वा तादृग्। विरचितानि आरोहावरोहस्वरक्रमेण निवेशितानि पदानि सुप्तिङन्तानि यत्र तत्तथाभूतं। एतेन पदस्थस्वरसंख्यातो गेयं इत्यभिहितम्। भूयो भूयः पुनः पुनः स्वयं आत्मनापि कृतां आलप्य मूर्च्छनां स्वरसारणां विस्मरन्ती मनसः शून्यत्वात् अनवधारयन्ती। सा तवालोके निपतिष्यतीति संबन्धः। अत्र दीपकम्।

विरहिणीव्यापारनिरूपणोपदेशेन तस्याः प्रति प्रीतिं प्रकाशयन्नाह।

शेषान्मासान्गमनदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः ।
संयोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ८४ ॥

(a) °दिवसप्रस्तुतस्या° V. (b) देहलीदत्त° V. M. (c) मत्संयोगं D.; संभोगं वा M.; हृदयरचिता° J.

[गमनस्य दिवसात् स्थापितस्य अवधेः देहल्यां दत्तैः पुष्पैः शेषान् मासान् गणनया भुवि विन्यस्यन्ती वा, हृदये निहितः आरम्भः यस्य तादृशं संयोगं वा आस्वादयन्ती (आलोके ते निपतति);—रमणस्य विरहे प्रायेण अङ्गनानां एते विनोदाः.—

Or placing flowers on the threshold to represent months to calculate those that remain to go, reckoning them from the last day (of the period of the curse) arrived at (by calculation) from the day of my departure; or picturing to herself with relish her (future) union with me : the first moments of it being specially dear to her heart.—These are usually the diversions of women separated from their lovers.—]

शेषान्मासानित्यादि। अत्रापि तोयद तवालोके सा निपतिष्यतीति संबन्धः । किं कुर्वती। विन्यस्यन्ती वा स्थापयन्ती वा मासान् वर्षांशान्। किंभूतान्। शेषान् अवशिष्टान् अवधेः कालनियमस्य। कीदृशस्य । गमनदिवसस्थापितस्य गमनदिनादारभ्य यः स्थापितः संवत्सरपरिमाणः प्रतिष्ठितः तस्य गणनया एकद्वित्रिक्रमसंख्यया भुवि भूमौ देहलीमुक्तपुष्पैः देहल्यां द्वारदारुणि मुक्तानि तदधिष्ठातृदेवतापूजार्थं दत्तानि पुष्पाणि कुसुमानि तैः। संयोगं वा मया सह संभोगं च । कीदृशम् । हृदयनिहितारम्भं मनोरथानीतं तमास्वादयन्ती अनुभवन्ती। प्रायेण बाहुल्येन एते उक्तप्रकाराः रमणविरहेषु वल्लभविप्रलम्भेषु अङ्गनानां स्त्रीणां विनोदाः कालयापनकेलयो भवन्ति । अर्थान्तरन्यासदीपकयोः संसृष्टिः ।

स्ववल्लभाया भूयोपि अवस्थां कथयन्नाह ।

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा सा मयोद्वेष्टनीया ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ८५ ॥

(b) या मयोन्मोचनीया V.; तां मयोद्वेष्टनीयाम् J. D. M. (c) सारयन्ती J. V. D. M. (d) °विषमादेक° V.

[आद्ये विरहस्य दिवसे दाम हित्वा या शिखा बद्धा,—सा शापस्य अन्ते विगलिता शुक् यस्य एवंविधेन मया उद्वेष्टनीया,—स्पर्शेन क्लिष्टां, कठिनां च विषमां च एकवेणीं अयमितानि नखानि यस्य तादृशेन करेण गण्डस्य आभोगात् असकृत् सारयन्ती (आलोके ते &c.)

Pushing away from time to time from the expanse of her cheek, with her hand of unpaired nails, her tresses of hair, arranged in a single braid, rough and dishevelled, which were tied (into a knot) after discarding the wreath of flowers on the first day of (our) separation.—It is to be untied by me, my sorrows over, at the end of the curse.—]

आद्ये बद्धेत्यादि । आद्ये प्रथमे विरहदिवसे वियोगवासरे या शिखा वेणी बद्धा ग्रथिता दाम कुसुमस्रजं हित्वा विहाय । शापस्य कोपवचनस्य अन्ते अवसाने विगलितशुचा गतशोकेन सा किल मयैव नापरेण उद्वेष्टनीया उन्मोचनीया । इति तस्या महासतीत्वप्रतिपादनम् । गण्डाभोगात् कपोलफलकात् असकृत् मुहुर्मुहुः अवलोकनाय सारयन्ती अपास्यन्ती करेण पाणिना । कीदृशेन । अयमितनखेन अकल्पितकररुहेण । एकवेणीं एकसंख्याकां वेणीं कबरीरचनां । कीदृशीम् । कठिनविषमां कठोरपरुषां स्नेहादिसंस्काराभावात् । अत एव स्पर्शक्लिष्टां स्पर्शः त्वगिन्द्रियग्राह्यो गुणविशेषः तत्र क्लिष्टां त्वगिन्द्रियबाधिकां । क्लिश्नाति सा क्लिष्टा । अविवक्षितकर्मत्वात् कर्तरि क्तप्रत्ययः । अथवा स्पर्शक्लिष्टां वारंवारं करस्पर्शेन बाधितां ग्लानिमानीताम् ।

स्नानाद्यभावो वेणीबन्धश्च विरहिणीसमाचारः। अत्र जातिदीपकयोः संसृष्टिः। संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति। लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः॥ (रुद्रट, ७-३०)।

विरहकर्षितदयितादुःखं ख्यापयन्नाह।

आधिक्षामा विरहशयने संनिषण्णैकपार्श्वा
प्राचीमूले तनुरिव कलामात्रशेषा हिमांशोः।
नीता रात्रिः क्षणमिव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती॥ ८६॥

(a) °क्षामां J. V. D. M. °पार्श्वां J. V. D. M. संनिकर्णैक° V.
(b) तनुमिव, °शेषां, J. V. D. M. (c & d) For the second half of verse 86, V. substitutes that of verse 87. (c) क्षण इव V. D. M. °रहमहतीमश्रुभि° D.M.J., °रहशयनेष्वश्रुभि° V. °यन्तीं J.V.D.M.

[आधिना क्षामां, बिरहसंबन्धिनि शयने संनिषण्णं एकं पार्श्वं यस्याः तां, प्राच्यां मूले हिमांशोः कलामात्रं शेषो यस्याः एवंविधां तनुः इव, मया सार्धं इच्छारतैः या रात्रिः क्षणमिव नीता, तां एव विरहेण जनितैः उष्णैः अश्रुभिः यापयन्ती (आलोके ते &c.).

Emaciated by her mental suffering, lying on a side on her bed of loneliness, like the moon's form on the eastern horizon with a single digit left; passing, in tears born of the agony of separation, the self-same night that she passed with me like a moment in self-chosen amorous sport.—

आधिक्षामेत्यादि। आधिर्मनोव्याधिः तेन क्षामा क्षीणा। विरहशयने यादृशि शयनीये संनिषण्णैकपार्श्वा संनिषण्णं स्थितं एकं वामदक्षिणयोः अन्यतरत् पार्श्वं यस्याः सा। क्षीणाङ्गत्वात् परिवर्तितुमसमर्था। कीदृशी प्रतिभाति। प्राचीमूले पूर्वदिङ्मुखे तनुरिव मूर्तिरेव हिमांशोः शिशिररश्मेः। कीदृशी। कलामात्रशेषा कलामात्रं शेषो यस्याः सा तादृक्। एककलापरिमाणा इत्यर्थः। तस्या कृष्णदि-

नस्यान्त्यकलोपमानं निरतिशयकृशिमपाण्डिमानं च प्रतिपादयितुमुपादेयम् आगमदृशैव कविनोपनिबद्धं। यस्मात् अस्मदादीनां इन्दोः कला दर्शे दर्शनपथे भवति। नीता गमिता या रात्रिः क्षणदा क्षणमिव मुहूर्तमिव। यतः सुखानुभवेन भूयानपि कालः कलेव विलीयते। मया सार्धं सह। पूर्वमिच्छारतैः यथाभिलषितसुरतकेलिभिः। तामेव क्षणदाम्। इदानीं अश्रुभिः नयनजलैः विरहजनितैः वियोगदुःखोत्पादितैः अत एव सन्तापात् उष्णैः अशीतैः यापयन्ती अतिवाहयन्ती। सा तवालोके निपतिष्यतीति वाक्यशेषः। अत्र दीपकोपमयोः संसृष्टिः।

तस्याः दुःसहविरहोपतप्तचेतसो निद्रानाशं प्रकाशयन्नाह।

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्ती
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बि।
मत्संयोगः सुखसुपनयेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्ती नयनसलिलोत्पीडरुद्धावकाशाम्॥ ८७॥

(a) विक्षिपन्तीं J. V. D. M. (c & d) For the second half of verse 87, V. substitutes that of verse 86. (c) मत्संभोगः D. M.; कथमुपनये° J. कथमुपनमे° V. D. M. (d) आकाङ्क्षन्ती. J. V. D. M.

[अधर एव किसलयः तं क्लिश्नाति असौ तादृशेन निःश्वासेन, शुद्धात् स्नानात् परुषं, नूनं गण्डात् आलम्बते तादृशं अलकं, विक्षिपन्ती, स्वप्ने जायतेऽसौ तादृशोऽपि मम संयोगः सुखं उपनयेत् इति नयनसलीलस्य उत्पीडेन रुद्धः अवकाशः यस्याः तादृशीं निद्रां आकाङ्क्षन्ती (आलोके ते &c.).

Throwing up her hair, (now) surely hanging over her cheeks, rough on account of her plain ablutions, with her sighs that wither her tender nether lip longing for sleep, of which all possibility is shut out by flooding tears, in the hope that even a meeting in sleep may bring her comfort.—]

निःश्वासेन इत्यादि। निःश्वासेन निःश्वसितेन कीदृग्विधेन अधरकिसलयक्लेशिना अधरः ओष्ठः स एव किशलयं पल्लवः प्रतीयमानरागसौकुमार्यधर्मधरत्वात् क्लिश्नाति बाधते तेन तद्धर्मिणा विक्षिपन्ती विकिरन्ती। किं तद्। अलकं उक्तलक्षणम्। कीदृशम्। परुषं खरस्पर्शम्। कुतः शुद्धस्नानाद्धेतोः। यदि सा कदाचित् स्नानमाचरति तदा सुरभितैलामलकादिरहितं उदकमात्रनिर्मितं स्नानं मज्जनं तस्याः। तत्पुनः कीदृशम्। आगण्डलम्बि संस्काराभावात् आकपोलपाति। नूनं अहं एवं मन्ये मत्संयोगो मम समागमः स्वप्नजोऽपि स्वप्नज्ञाने जनितोऽपि यदि भवेत् स्यात् अतः सुखं आनन्दं उपनयेत् इत्यनेन हेतुना निद्रामाकाङ्क्षन्ती स्वापमभिलषन्ती। कीदृशी। नयनसलिलोत्पीडरुद्धावकाशा नयनसलिलं अश्रु तस्य उत्पीडः पूरः तेन रुद्धः आवृतः अवकाशः आश्रयो यस्याः सा तथोक्ता तां। एतेन तस्याः पतिविरहशोकप्रवर्तमाननयनपयःप्रवाहपूरितदृशोरवकाशं अलभमाना न कदाचिदपि निद्रा पदं आदधाति इतीदमुक्तं भवति। सा तवालोके निपतिष्यतीति अत्रापि अध्याहार्यते। अत्र सद्दीपकयो संसृष्टिः।

निजप्रियाविरहव्यवस्थां कथयन्नाह।

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।
चक्षुः खेदात्सजलगुरुभिः पक्ष्मभिश्छादयन्ती
साभ्रेऽह्नीव स्थलकमलिनी न प्रबुद्धा न सुप्ता ॥ ८८ ॥

(b) गतमभिमुखं D. (c) खेदाच्चक्षुः J.; सलिल° J. D. M. छादयन्तीं J. V. D. M. (d) °लिनीं, °द्धां, °प्तां J. V. D. M.

[जालस्य मार्गेण प्रविष्टान्, अमृतवत् शिशिरान्, इन्दोः पादान् पूर्वया प्रीत्या अभिमुखं गतं, तथैव संनिवृत्तं चक्षुः खेदात् सलिलैः गुरुभिः पक्ष्माभिः छादयन्ती, अभ्रेण सहिते अह्नि न प्रबुद्धा, न सुप्ता, स्थलकमलिनी इव (आलोके ते &c.).

Closing in dejection with her eye-lashes, heavy with tears, her eye that, out of its former (experience of)

joy, goes forth to greet the moon's rays, cool like nectar, which have entered through the window, and is averted the same moment; neither waking nor sleeping like a land-lotus on a cloudy day.]

पादानिन्दोः इत्यादि । पादान् रश्मीन् इन्दोः चन्द्रमसः । कीदृशान् । अमृतशिशिरान् सुधाशीतान् जालमार्गप्रविष्टान् वातायनवर्त्मगतान् । पूर्वप्रीत्या प्राक्तनप्रेम्णा । चक्षुः लोचनम् । अत्र जातावेकवचनम् । यथैव अभिमुखं संमुखं गतं यातं मद्विरहखेदात् तथैव संनिवृत्तं प्रत्यागतम् । तच्चक्षुः पक्ष्मभिः वल(?)लोमभिः । किंभूतैः । सजलगुरुभिः सबाष्पत्वाद्भारितैः छादयन्ती स्थगयन्ती । किमुपमा सा । साभ्रे साम्भोधरे अह्नि दिवसे स्थलकमलिनीव अजलजाताम्भोजिनीव । भूशयनात्तस्याः उपपन्नेयं उपमा । कीदृग्विधा । न प्रबुद्धा न सुप्ता चिन्तानिमीलितलोचनत्वात् न प्रबुद्धा विरहसंतापात् अपेतनिद्रा न सुप्ता । कथं स्वापप्रबोधयोः मिथोविरुद्धयोः एकत्र वृत्तिः इत्युच्यते । घनस्थगितवियति रवेरप्रकाशत्वात् न प्रबोधो दिनत्वात् । इति उभयहेतुजनिता उभयरूपता तस्या न विरुध्यते । मधोरिव शीतोष्णता । प्रबोधस्वापौ नयनधर्मौ लक्षणया पद्मिन्याः संकोचविकासयोः प्रयुक्तौ । अत्रापि सा तवालोके निपतिष्यतीति संबन्धः । आदिकुलकम् । अत्रोपमादीपकयोः संसृष्टिः ।

तस्याः विरहदशादौःस्थ्यं सत्यापयन् आह ।

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥ ८९ ॥

[मयि संभृतः स्नेहः यस्य एवंविधं तव सख्याः मनः जाने, अस्मात् प्रथमे विरहे इत्थंभूतां तां अहं तर्कयामि. सुभगं आत्मानं मन्यते तस्य भावः न खलु मां वाचालं करोति. भ्रातः, मया यत् उक्तं (तत्) निखिलं अचिरात् ते प्रत्यक्षं (भविष्यति).

I know your friend's (my wife's) love-laden heart for me and hence I picture her thus in her first separation (from me). It is not an overweening opinion of my lovableness that makes me prattle so. Whatever I have said will be personally ascertained by you for fact, my brother, before long.]

जाने सख्या इत्यादि। जाने वेद्मि मे दयितायाः इति वक्तव्ये चातुर्यादाह तोयद तव सख्याः त्वद्वयस्यायाः। मयि मद्विषये मनः चित्तं संभृतस्नेहं उपचितप्रीति। अस्माद् हेतोः। इत्थंभूतां कथितावस्थां प्रथमविरहे आद्ये विप्रलम्भे तां भवत्सखीं तस्याः अवस्थां वा तर्कयामि। अहमेवं उत्प्रेक्षे इत्येकवाक्यं वक्ष्यमाणं द्वितीयम्। वाचालं यत्किंचनवादिनं मां सुभगंमन्यभावः असुभगं सुभगं आत्मानं मन्यते सुभगंमन्यः तस्य भवनं भावः साभिमानो वा। खलु निश्चयेन यथा। न करोति न करिष्यति। इति तस्यावस्थाविषये यन्मयोक्तं अभिहितं भ्रातः बन्धो निखिलं समग्रं तत्ते तव प्रत्यक्षं स्पष्टं अचिरात् दिनैः दिनैः भविष्यति। अस्यायमर्थः। तदवस्थां तां अवलोक्य मद्वाक्यं अवितथं त्वमेव ज्ञास्यसि। अत्र अनुमानम्।

विरहविधुरनिजवधूखेदापनोदने यक्षः संदेशं पयोदस्य उपदिशन्नाह।

> सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
> शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
> मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे
> तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ ९० ॥

(a) खेदयेत् V. विप्रयोगः V. J. M. मद्वियोगः many mss. (c) °मतः J. V. (d) उन्निद्रां विरहशयनां D.; °शयनां सद्म° J. D., शयनां सौध° M.

[अहनि सव्यापारां मम वियोगः तथा न पीडयेत्. निर्गतः विनोदः यस्याः एवंविधां ते सखीं रात्रौ गुरुतरा शुक् यस्याः तादृशीं शङ्के. सद्मनः वातायने तिष्ठत्यसौ तादृशः (त्वं) उन्निद्रां, अवनौ शयनं यस्याः तादृशीं, साध्वीं निशीथे मम संदेशैः अलं सुखयितुं पश्य.

Separation from me will not so much distress her by day-time, when she will be occupied. Your friend (my wife), I am afraid, will have no distractions at night and her grief will be then intensified. See the good and true lady at midnight, when she is awake, and comfort her, in the best manner possible, with messages from me, stationing yourself in the window next to her bed on the ground.]

सव्यापारेत्यादि। अहमेवं शङ्के संभावये वारिद मद्वियोगो मम विरहः ते तव सखीं वयस्याम्। सखीपदोपादानेन पयोदस्य सौहार्दं आपादयति। सव्यापारां अवश्यकर्तव्यदेवतातिथिसपर्याकार्यव्यग्रमानसां अहनि दिने तथा अतिशयेन न पीडयेत् न बाधेत यथा रात्रौ निशि निर्विनोदां मनोदुःखापनोदकाः शुकसारिकालापालेख्यलेखनादिकेलयः तैर्वर्जिताम्। अत एव गुरुतरशुचं प्रचुरशोकां मदेकध्यानान्धत्वात् अचेतसम्। ततस्त्वं मत्संदेशैः मम वार्तावस्तुभिः सुखयितुं आह्लादयितुं अलं समर्थः। तां भवद्वयस्यां उन्निद्रां मद्विरहजातजागरां पश्य विलोकय। क्व निशीथे अर्धरात्रे। तथा कथं परस्त्रीसमीपोपसर्पणं न युक्तं इति शङ्कानिरासार्थं आह। साध्वीं पतिव्रतां। कीदृशः सन्। अवनिशयनासन्नवातायनस्थः अवनौ भूमौ शयनं शय्या विरहसंतापात् वा भूशयनं तस्याः आसन्नः संनिकृष्टो वातायनो गवाक्षः तत्र तिष्ठति तत्स्थः सन्। अनेन पयोदस्य योग्यदेशावस्थानकथनम्। अत्रानुमानम्।

तस्याः कृशिमदशादैन्यं निवेदयन्नाह।

> सा संन्यस्ताभरणमबला पेलवं धारयन्ती
> शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्।
> त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
> प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९१ ॥

(a) ° पेशलं M. (c) आस्रं D.

[अविद्यमानं बलं यस्याः तादृशी, संन्यस्तानि आभरणानि यस्मात् तादृक्, पेलवं, असकृत् दुःखदुःखेन शय्यायाः उत्सङ्गे निहितं गात्रं

धारयन्ती सा त्वां अपि नवजलमयं अस्रं अवश्यं मोचयिष्यति. आर्द्रः अन्तरात्मा यस्य सः सर्वः प्रायः करुणा वृत्तिः यस्य एवंविधो भवति.

With that delicate figure of hers, denuded of ornaments, tossed now and then on the lap of the bed in great anguish, she will certainly make you shed tears of fresh drops of rain. Whoever has a moist heart has as a general rule a compassionate nature.]

सा संन्यस्तेत्यादि । सा मदङ्गना । कीदृक् । अबला पतिवियुक्ता कृशा वा विरहकर्शितगात्रं अङ्गं । कीदृशम् । संन्यस्ताभरणं रमणशुचा परित्यक्तभूषणं सुकुमारं अत एव शय्योत्सङ्गे तल्पपृष्ठे निहितं आरोपितमपि तदङ्गं अतिक्षैण्यात् दुःखदुःखेन अतिक्लेशेन । अतिशये द्विर्वचनम् । धारयन्ती बिभ्रती । भ्रातः एवंविधां ग्लानिं अनुभवन्ती न केवलं मामेव त्वामपि द्रष्टारं अश्रु । कीदृशम् । नवजलमयं नूतनतोयनिर्वृत्तं मोचयिष्यति त्याजयिष्यति अवश्यं निश्चितम् । मुचेर्द्विकर्मकत्वात् अश्रु कर्म । ननु यदि सा दुःखिनी कस्मादहं रोदिमि इति अर्थान्तरन्यासमाह । प्रायेण बाहुल्येन सर्वो यः कोपि आर्द्रान्तरात्मा सरसचित्तः करुणावृत्तिः करुणा कृपा सैव तया वा वृत्तिः व्यवहृतिः यस्य स तथाभूतः भवति संपद्यते । करुणाशब्दस्य भाषितपुंस्कत्वात् न पुंवद्भावः । त्वमपि पयोधर पयःपूर्णमध्यत्वात् आर्द्रहृदयः ततः करुणावृत्तिः परदुःखदुःखितोसि । अत्र अर्थान्तरन्यासः ।

सुहृदम्भोददर्शनेन स्ववल्लभायाः शुभनिमित्तोदयं निवेदयन्नाह ।

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ९२ ॥

(c) वामं मृ° D. (d) मीनक्षोभाकुल° V. मन्ये मीनोच्चल° D.

[अलकैः रुद्धः अपाङ्गयोः प्रसरः यस्य तादृशं, अञ्जनमेव स्नेहः तेन शून्यं, अपि च मधुनः प्रत्यादेशात् विस्मृतः भ्रुवः विलासो

येन तादृशं, त्वयि आसन्ने सति, उपरि स्पन्दते तादृशं मृगाक्ष्याः नयनं, मीनानां क्षोभात् चलानां कुवलयानां श्रियः तुलां एष्यति इति शङ्के.

When you are near, I can well imagine how the up-turned eye of that fawn-eyed lady, of which the corner-glances are blocked by her hair, innocent of the brilliance lent by collyrium, oblivious of all play of the eyebrows by reason of her abstention from wine, will stand a comparison in point of loveliness with the blue lotus, agitated by the flitting fish.]

रुद्धापाङ्गेत्यादि। अहमेवं शङ्के संभावयामि तोयद तस्याः मृगाक्ष्याः हरिणलोचनायाः नयनं नेत्रम्। कीदृग्विधं। रुद्धापाङ्गप्रसरं रुद्धः प्रतिषिद्धः अपाङ्गस्य लोचनाञ्चलस्य प्रसरो विकासो यस्य तत्। निवृत्तकटाक्षविक्षेपम्। अलकैः कथितलक्षणैः कल्पनाभावात् प्रवृद्धैः। अञ्जनस्नेहशून्यं अञ्जनं कज्जलं तस्य स्नेहेन शून्यं रहितं पतिशोकातुरत्वात्। अत एव विस्मृतभ्रूविलासं विस्मृताः भ्रुवो विलासाः विभ्रमाः यस्य। न केवलं मनःखेद एव। प्रत्यादेशात् प्रत्याख्यानादपि चेति समुच्चये मधुनः सीधुनः। त्वयि भवति आसन्ने सति संनिहिते सति। कीदृशम्। उपरिस्पन्दि उपरि ऊर्ध्वं स्पन्दते स्फुरति तत्तथाविधम्। तद्धर्मिणि प्रत्यागमनसूचकम्। त्वां जलद यदोपरि विलोकयिष्यति तदा कीदृक् प्रतिभासिष्यते। मीनक्षोभात् मत्स्यपरिवर्तनात् चलं चञ्चलं यत् कुवलयं नीलोत्पलं तस्य श्रीः शोभा तस्यास्तुल्याकृतिः तां एष्यति आगमिष्यति तत्सादृश्यं अनुभविष्यति। इति शब्दः एवमर्थः। मीनक्षोभादित्यनेन नीलोत्पलस्य चलत्वं पाण्डुत्वं च विवक्षितम्। तथा हि यदोत्प्लवते परिवर्तते वा मत्स्यः तदा तदीयोदरदेशविशदच्छायाच्छुरितमूर्त्तितया तस्य नीलधवलत्वं तदङ्गसंयोगेन चटुलत्वं च संपद्यते। तथा च सति कृष्णावदातरुचा उपरिस्पन्दमानेन समं सता तस्य घटने (तद्घटते ?)। अन्यथा चलनमात्रं वीच्यादिनापि स्यात्। तदानीं मीनपदोपादानं व्यर्थमेव। स्त्रीणां वामाक्षिस्पन्दनं सुहृद्दर्शनसूचकं। वामत्वं विलोचनस्य एकवचननिर्देशादर्थाल्लब्धम्। अत्रोपमानुमानयोः संसृष्टिः।

तस्याः पुनः प्रशस्तनिमित्तसंभवं संभावयन्नाह ।

वामो वास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ९३ ॥

(a) वामश्चास्याः J. D. M.

[मदीयैः कररुहाणां पदैः मुच्यमानः चिरं परिचितं मुक्तानां जालं दैवस्य गत्या त्याजितः, संभोगस्य अन्ते मम हस्तेन संवाहनानां समुचितः, सरसायाः कदल्याः स्तम्भ इव गौरः, अस्याः वामः ऊरुः चलत्वं यास्यति वा.

And likewise will throb her left thigh, fair like the sappy trunk of the plantain tree, free (now) from my nail marks, doing without its wonted net of pearls under compulsion of adverse fate, accustomed to being shampooed by my hands after the pleasures of love.]

वामः चा(?)स्या इत्यादि। वामः सव्येतरो वाशब्दः उक्तोपमार्थो तस्याः मत्प्रियायाः विलोचनमिव वामः ऊरुः सक्थिप्रदेशः। कीदृशः। मुच्यमानः उज्झ्यमानः कररुहपदैः मदीयैः अस्मदीयैः। मुक्ताजालं अलङ्कारमौक्तिककलापं चिरपरिचितं पूर्वाभ्यस्तं त्याजितः मोचितः दैवगत्या विधिवशेन। संभोगान्ते सुरतावसाने समुचितः योग्यः हस्तसंवाहनानां करमर्दनानां मम संबन्धिनां। यास्यति गमिष्यति चलत्वं स्पन्दनत्वं। त्वयि मत्समागमसूचके निकटवर्तिनि सति स्फुरिष्यति इत्यर्थः। स पुनः कीदृशः। सरसकदलीस्तम्भगौरः सार्द्ररम्भाकाण्डपाण्डुः। तस्याः श्यामाया अपि विरहावस्थया ऊर्वोः गौरत्वं उपपन्नमेव। अत्र उत्प्रेक्षा।

स्वप्रियायाः प्रणयं प्रकाशयन्नाह।

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
त्तत्रासीनः स्तनितविमुखो याममात्रं सहस्व।

मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचि-
त्सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ९४ ॥

(a) दयिता लब्धनिद्रा यदि V. (b) अन्वास्यैनां J. V. D. M. several mss. तत्रासीनः (c) °यिनि जने J.

[जलद, तस्मिन् काले यदि सा लब्धं निद्रायाः सुखं यया एवंविधा स्यात्, तत्र स्तनिताद् विमुखः आसीनः याममात्रं सहस्व. प्रणयिनि मयि कथंचित् स्वप्ने लब्धे (सति), अस्याः गाढं उपगूढं सद्यः कण्ठात् च्युतः भुजौ एव लते तयोः ग्रन्थिः यस्य तादृशं मा भूत्.

If at this time, Cloud, she is enjoying the pleasure of sleep, sit there patiently for an hour without thundering. Let it not happen that when she has met me, her loving husband, somehow or other in a dream, her close embrace ends abruptly by the knot of (her) encircling arms slipping away from (my) neck.]

तस्मिन्काले इत्यादि । तस्मिन्काले समये यदि सा मद्वधूः लब्धनिद्रासुखा प्राप्तस्वापनिर्वृतिः स्यात् भवेत् तदा त्वं तत्र वर्त्मनि आसीनः स्थितः । कीदृशः । स्तनितविमुखः गर्जितवर्जितः सन् । याममात्रं प्रहरमेकं यावत् सहस्व प्रतीक्षेथाः। तां उन्निद्रां मा कृथाः । किमर्थं इत्याह । मा भूत् मा स्म भवत् अस्या मम प्रियायाः प्रणयिनि वल्लभे मयि स्वप्नलब्धे स्वप्नज्ञानेन प्राप्ते कथंचित् दैववशात् । गाढोपगूढं निबिडालिङ्गनम् । कीदृशम् । सद्यःकण्ठच्युतभुजलताग्रन्थि सद्यः तत्क्षणं च्युतो स्रस्तो भुजलतायाः बाहुवल्लयाः ग्रन्थिः पाशो यत्र तत्तथा कथितम् । प्रायो वल्लभवियुक्तानां तच्चिन्ताखिन्नमनसां निशि निद्रानाशात् उषसि स्वप्नसंभावना भवति । अत्र आक्षेपः ।

स्ववल्लभासंभाषणं अम्भोधरस्य उपदिशन्नाह ।

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।

विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ९५ ॥

(a) प्रोत्थाप्यैनां J. (c) विद्युद्गर्भे J. V. निहितनयनां V. (d) धीर° ⁰. धीर J. धीरैः D. °वचनो J.

[स्वस्य जलस्य कणिकाभिः शीतलेन अनिलेन तां उत्थाप्य, अभिनवैः मालतीनां जालकैः समं प्रत्याश्वस्तां, स्तिमिते नयने यस्याः तां मानिनीं, त्वया सनाथे गवाक्षे, विद्युत् गर्भे यस्य तादृशः धीरः (त्वं) स्तनितैः एव वचनैः वक्तुं प्रक्रमेथाः.

Awaken her and when she is revived, with the new-budding Mālatī bowers, by breezes cooled by your rain-drops, proceed to speak calmly from the window, graced by you, to the high-minded girl with words of thunder, the lightning enclosed in your interior so that her eyes are steady.]

तामुत्थाप्य इत्यादि । तां मद्वनितां सुप्तां उत्थाप्य प्रबोध्य । कीदृग्विधाम् । प्रत्याश्वस्तां वीतग्लानिं अनिलेन वायुना । कीदृशेन । स्वजलकणिकाशीतलेन निजवारिवर्षशीकरशिशिरेण समं सह जालकैः कलिकाकोशैः । कीदृशैः । अभिनवैः प्रत्यग्रैः मालतीनां जातीनाम् । सुमनसोपि प्रभाते शीतवातस्पर्शेन प्रबुध्यन्ते । त्वं कीदृक् । विद्युद्गर्भः विद्युत् गर्भे मध्ये यस्य स तादृशः । स्त्रीद्वितीयः परनारीसंभाषणं एकाकिनो न उचितमिति । तां किंभूताम् । स्तिमितनयनां निर्निमेषदृशमिति विलोकनादरप्रतिपादनम् । गवाक्षे वातायने । कीदृशे । त्वत्सनाथे भवदधिष्ठिते । वक्तुं अभिधातुं । धीरः स्थिरः । स्तनितवचनैः स्तनितानि गर्जितानि एव वचनानि तैः । मानिनीं मनस्विनीं प्रक्रमेथाः प्रारभेथाः । अत्र सहोक्तिः ।

मेघस्य दूतकर्म समर्थयन्नाह ।

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशाद्धृदयनिहितादागतं त्वत्समीपम् ।

यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ९६ ॥

(a) मभिदधे J. (b) तत्संदेशैः J. M. मनसि निहितैरागतं° J. मनसि निहितादागतं° V. D. °हितैरागतं° M.; °दागतं several mss.

[' अविधवे, भर्तुः प्रियं मित्रं अम्बुवाहं मां विद्धि; हृदये निहितात् तस्य संदेशात् तव समीपं प्राप्तवान्; यः अबलानां वेणीनां मोक्षे उत्सुकानि श्राम्यतां प्रोषितानां वृन्दानि मन्द्रैः स्निग्धैश्च ध्वनिभिः पथि त्वरयति '.

'Know me, O lady blessed with a living husband, to be the dear friend of your husband, a cloud; I have come to you with his message, inscribed by me on my heart; (know me to one) who speeds on with his deep and soft voice myriads of way-farers, toiling on the road and eager to untie the knots of their wives' hair.']

भर्तुर्मित्रमित्यादि । अत्र त्वद्दयितोदन्तमादाय दूतः अहमागतः । सहसा एवमुक्ता चिरं वियुक्ता सा पतिविशसाशङ्किनी पुण्यजाया कदाचित् जीवितं त्यजति इति संभावनया मेघः तत्प्रियप्राणितसत्ताबोधकसंबोधनेन तामाश्वास्य तत्संदेशमुपदिशति । हे अविधवे जीवद्भर्तृके विद्धि जानीहि मां मित्रं सुहृदं । कस्य । भर्तुः पत्युः इति । अनेन आत्मनः उपादेयत्वप्रतिपादनम् । प्रियं वल्लभं न मित्रमात्रं विश्रम्भकथास्थानमसि । कस्मात् तर्हि प्रवासायासं अङ्गीकृतवानसि इत्याह । अम्बुवाहं अम्बु द्रवद्रव्यं तद्वहति अम्बुवाहः । तोयवाहित्वेन आर्द्रहृदयोऽहं परदुःखदुःखित इति ख्यापयति । तत्संदेशात् तस्य वल्लभस्य संदेशः संदिश्यमानोर्थः तस्मात् । तेन इदमेव मदागमनस्य मुख्यं प्रयोजनं इति निवेदयति । हृदयनिहितात् चित्तारोपितात् । यत्तेन संदिष्टं तन्मम मनागपि न विस्मृतमिति धारयिष्णुतया स्वस्य दूतगुणाधारयिष्णुतां बोधयति । प्राप्तवान् आगतः त्वत्समीपं तवान्तिकं । न केवलं वार्तामात्रकथकस्त्वां पत्या संघट्टयितुमपि समर्थः इति कथयितुमाह । (यः वृन्दानि त्वरयति) शीघ्रयति पथि मार्गे प्रोषितानां प्रवासिनाम् । नव

प्रियोत्कण्ठितास्ते स्वयमेव त्वरन्ते इत्याशङ्क्य आह। श्राम्यतां प्रस्थाना-समर्थानामपि। यः खल्वहं प्रस्थानदुःस्थानपि पान्थान् सर्वान् निजप्रेयसीः प्रति प्रीतिमत्त्वात् प्रस्थापयामि स कथं त्वदीयमेकं पतिं त्वदभ्यर्णं तूर्णं न नेष्यामि इति भावः। केन कृत्वा। ध्वनिभिः शब्दैः। कीदृशैः। मन्द्रस्निग्धैः धीरमधुरैः। उद्धारमलक्षं च दूतवचः प्रशस्यते। किंभूतानि। अबलावेणिमोक्षोत्सुकानि अबलाः पतिवियुक्ताः योषितः तासां वेणयः केशसंयमविशेषाः तासां मोक्षो मोचनं तत्र उत्सुकानि उत्कण्ठितानि एतेन तासां पतिव्रतात्वप्रकाशनं। यतः ताः स्वभर्तृष्वेव आगतेषु तद्बन्धमोक्षं कुर्वन्ति न अन्यथा इति। अत्र ऊर्जस्वि।

तस्याः पतिसन्देशश्रवणादरं अम्बुदस्य निवेदयन्नाह।

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाष्य चैव।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपहृतः संगमात्किंचिदूनः ॥ ९७ ॥

(b) संभाव्य J. V. D. M. (c) °वहितं J. सोम्य V. (d) कान्तोपान्तात् J. °दुपगमः J. °दुपनतः V. D. दुपगतः M.

[सौम्य, इति आख्याते, उच्छ्वसितं हृदयं यस्याः, उद्गतं मुखं यस्याः, एतादृशी, मैथिली पवनस्य तनयं इव, त्वां वीक्ष्य, संभाष्य चैव अस्मात् परं अवहिता श्रोष्यति. सीमन्तिनीनां सुहृदा उपहृतः कान्तस्य उदन्तः संगमात् किंचित् ऊनः.

When you have said this, she will look up to you, as did Sītā to Hanūmant, her heart heaving up with eagerness, she will speak to you and henceforth she will listen attentively. News of their lovers, gentle cloud, brought by a friend, is little less to ladies than (actual) meeting.]

इत्याख्याते इत्यादि। इत्याख्याते कथिते सति पवनतनयं प्रियवार्ता-प्रापकं हनूमन्तं मैथिलीव विदेहदुहितेव। अत्र उपमानेन तस्या भर्तरि

भक्तिः अनुरक्तिश्च ख्याप्यते। उन्मुखी ऊर्ध्वमुखी। पवनपथस्थितं च वस्तु विलोकयन्त्युन्मुखत्वं प्रतिपद्यते। कीदृशी सा। उत्कण्ठोच्छ्वसितहृदया उत्कण्ठया उच्छ्वसितं सोच्छ्वासं हृदयं चित्तं यस्याः सा तादृशी। त्वां भवन्तं वीक्ष्य विलोक्य संभाष्य स्वागतं तुभ्यं इति आलाप्य च एवमनेन प्रकारेण श्रोष्यति आकर्णयिष्यति। अस्मात्कुशलसंभाषणात् परम् अनन्तरं अवहिता सावधाना। अत्यादरप्रतिपादनं। तस्याः किं आदरकारणं इत्याह। हे सौम्य। दर्शनीयाकृते। सोम एव सौम्यः। स्वार्थे यण्। यतः सीमन्तिनीनां स्त्रीणां कान्तोदन्तः प्रियतमवार्ताविशेषः। स कीदृग्। सुहृदुपहृतः सुहृदा मित्रेण उपहृतः आनीतः संगमात्संयोगात् किंचित् मनाक् ऊनो भवति विश्वासोत्पादनात्। अत्रोपमार्थान्तरन्यासयोः संसृष्टिः।

प्रियायाः कुशलप्रश्नव्याजेन पुण्यजनो निजजीवितसत्तां प्रतिपादयन्नाह।

तामायुष्मन्मम च वचनादात्मना चोपकर्तुं
ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ ९८ ॥

(a) °युष्मान् V. त्मनश्चो° J. D. M. (b) ब्रूया ए° D. M. (c) नियुक्तः J. (d) पूर्वाशास्यं J. V. D.

[आयुष्मन्, मम वचनात् च आत्मना च तां उपकर्तुं एवं (भवान्) ब्रूयात्; अबले, रामगिरेः आश्रमे तिष्ठत्यसौ तादृशः, वियुक्तः अव्यापन्नः तव सहचरः त्वां कुशलं पृच्छति. सुलभा विपद् येषां तादृशानां प्राणिनां एतद् एव पूर्वं आभाष्यम्.

Say this to oblige her, long-lived cloud, for my sake and of your own accord: Frail lady, your companion, dwelling in the hermitage at Rāmagiri, separated from you, (but) alive, asks for tidings of your health. Our first greetings can only be these, seeing how liable to mishap all living beings are.]

तां आयुष्मन्नित्यादि। तां मम दयितां। आयुष्मन्निति मेघसंबोधनम्। मम

वचनात् मदीयेन वचसा तथा आत्मना च स्वयं मम तस्याश्च मित्रवध्वा उपकर्तुं उपकारं कर्तुं ब्रूयात् वदेत् । एवं वक्ष्यमाणम् । तव सहचरः त्वदीयः पतिः अव्यापन्नः कुशली रामगिर्याश्रमस्थः रामगिरिनाम्नः पर्वतस्य आश्रमाः तपस्वि-निवासाः तेषु तिष्ठति इति तत्स्थः । इति तस्य मुनिवृत्तिख्यापनम् । अबले प्रोषितभर्तृके त्वां भवतीं कुशलं निर्विघ्नं पृच्छति प्रश्नयति । स कीदृग् । वियुक्तो दूरवर्ती । किमित्याह । यतः स्पृहणीयेष्वपि पदार्थेषु पूर्वं प्रथममाभाष्यं आशंसनीयं प्राणिनां असुमताम् । किंभूतानाम् । सुलभविपदां सुप्रापविपत्तीनां एतदेव कुशलमेव नान्यत् इत्यर्थः । अर्थान्तरन्यासः ।

एवंविधस्वाङ्गावस्थाकथनेन निजानुरागमङ्गनायाः प्रख्यापयन्नाह ।

अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं
साम्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ ९९ ॥

(a) प्रतनु M. (b) °णास्रद्रुत° D. णाश्रुद्रुत M. (d) °ल्पैस्ते V.

[वैरिणा विधिना रुद्धो मार्गः यस्य एतादृशः दूरवर्ती (सः) तैः संकल्पैः तनुना, गाढतप्तेन, सास्रेण, उत्कण्ठितेन, समधिकतरं उच्छ्वसिति तादृशेन अङ्गेन, तनु, तप्तं, अस्रं द्रवतीदं तादृशं, अवि-रता उत्कण्ठा यस्य तादृशं, उष्णाः उच्छ्वासाः यस्य तादृशं अङ्गं विशति.

Adverse fate having blocked his way, remaining in his far-off home, he brings about, by the (well-known) power of the imaginative faculty, a coalescence of his wasted, exceedingly scorched, tearful, and pining and sighing body with yours that is wasted, scorched and melting into tears, full of ceaseless yearnings and heaving out hot sighs.]

अङ्गेनाङ्गमित्यादि । तोयद तामेवं वदेः यथा त्वद्दयितो दूरवर्ती दवीयो-देशस्थितः संकल्पैः चित्तव्यापारैः तैस्तैः ... अनुरागवशात् तवाङ्ग

शरीरं निजेनाङ्गेन वपुषा विशति त्वया सह ऐक्यं भजते । भिन्नयोरप्यङ्गयोः सारूप्यादैक्यं संभवति । पृथग्विशेषणैः तदेव निरूपयति । तनु विरहवशात्कृशम् । चः समुच्चये । तनुना तत एव समता । गाढतप्तेन अतिशयसन्तापिना तप्तं उष्णं । सास्रेण सबाष्पेण अस्रद्रवं अस्रस्रावि । अस्रं द्रवति अस्रद्रवं पचादित्वात् । अविरतोत्कण्ठं अविरतं सद्यः उत्कण्ठा उत्का यस्य तत्तादृशम् । उत्कण्ठिना उत्कलिकावता । उष्णोच्छ्वासं संतप्तनिश्वासं अधिकतरोच्छ्वासिना भूरिततोच्छ्वासिना । इत्थं समवस्थाकथनेन तयोः समदुःखितां प्रतिपादयति । ननु साक्षात् कस्मान्न संयुज्यते इत्याह । विधिना विधात्रा वैरिणा शत्रुणा रुद्धमार्गः प्रतिषिद्धवर्त्मा । किं करोति वियोगस्य वर्षभोग्यत्वात् आगन्तुं न शक्नोति । अत्रोपमा ।

प्रणयाख्यानेन प्रियायाः प्रीतिमुत्पादयन्नाह ।

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनानामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ १०० ॥

(c) मदृष्टः° J. D. मगम्यः° V.

[यः आननस्य स्पर्शस्य लोभात् यद् अपि किल ते सखीनां पुरस्तात् शब्देन आख्येयं (तत्) कथयितुं कर्णे लोलः अभूत्, सः श्रवणस्य विषयं अतिक्रान्तः, लोचनानां अदृश्यः (सन्), मम मुखेन उत्कण्ठया विरचितानि पदानि यस्मिन् एवंभूतं इदं त्वां आह.

He who, fain to touch your face, was over-zealous to whisper into your ear what might have been spoken aloud before your friends, now that he is beyond the range of the ear and of the eye, sends to you through my mouth this message, the words of which have been composed in the midst of uneasiness.]

शब्दाख्येयमित्यादि । शब्देन श्रोत्रग्राह्येण [illegible] कथ्यते यत् । किल

संभावनायां। तव सखीनां त्वदालीनां पुरस्तात् प्रकटवाक्यं तदपि कर्णे श्रवसि कथयितुं आख्यातुं लोलो लम्पटो यः त्वत्पतिः अभूत् अभवत्। कुतः। आननस्पर्शलोभात् त्वन्मुखस्पर्शसुखाभिलाषात्। सोऽतिक्रान्तः अतीतः श्रवणविषयं कर्णगोचरं अतिदूरवर्तित्वात्। अत एव लोचनाभ्यां अदृश्यः चक्षुरग्राह्यः। एवं सत्यं लोकोक्तिरियमेष नाम दूरं गतो यथा न दृश्यते नापि श्रूयते इति। त्वां भवतीं इदं वक्ष्यमाणं मन्मुखेन अस्मदाननेन आह ब्रूते। कथम्। उत्कण्ठाविरचितपदं उत्कण्ठया औत्सुक्येन विरचितानि उच्चरितानि पदानि वचनानि यत्र कथनीये तत्तथोक्तम्। अत्र प्रेयस्वि। तथा च। प्रेयः प्रियतराख्यानम्। (दण्डी, २·२७५)।

पुण्यजनः प्रियायाः प्रत्यङ्गरूपसंपदुपमानवस्तूपन्यासोपदेशेन स्वप्रीतिं प्रकटयन्नाह।

श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातान्
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्थं क्वचिदपि न ते भीरु सादृश्यमस्ति ॥ १०१ ॥

(a) °हरिण° V. °प्रेक्षणे D. M. °पातं J. V. D. M. (b) गण्डच्छा° V. (d) °न्तैकस्मिन्.

[श्यामासु अङ्गं (उत्पश्यामि), चकितानां हरिणीनां प्रेक्षिते दृष्टिपातं, शशिनि वक्त्रस्य छायां, शिखिनां बर्हस्य भारेषु केशान्, प्रतनुषु नदीनां वीचिषु भ्रुवो विलासान् उत्पश्यामि. भीरु, हन्त, ते सादृश्यं एकस्मिन् तिष्ठतीदं तादृशं क्वचिदपि नास्ति.

I see your form in the Priyamgu creepers, your glances in the eyes of the frightened roes, the beauty of your cheek in the moon, your hair in the plumage of peacocks, the sport of your eye-brows in the tiny ripples of rivers; but, alas, timid one, nowhere can I see your likeness combined in one place.]

श्यामास्वङ्गमित्यादि। हे भीरु कातरे त्वया विप्रयुक्तः त्वत्सादृश्यदर्शनात्किल

कदाचित् आत्मानं आश्वासयामि इत्यहं उत्पश्यामि उत्प्रेक्षे। श्यामासु प्रियंगुलतासु अङ्गं वपुः। श्यामत्वतनुत्वाभ्यां तत्सादृश्यम्। चकितहरिणीप्रेक्षिते त्रस्तमृगीविलोकिते दृष्टिपातान् नेत्रव्यापारान् पारिप्लवत्वेन तत्सादृश्यम्। वक्त्रच्छायां वदनद्युतिं शशिनि निशीथिनीनाथे कान्तिमत्त्वात् आनन्ददायित्वात् तल्लेखा। शिखिनां शिखण्डिनां बर्हभारेषु पिच्छसंचयेषु केशान् नीलत्वात् बहुलत्वात् द्राघिमत्त्वात् मनोहरत्वात् तदनुकारः। प्रतनुषु कृशतरासु नदीवीचिषु सरिल्लहरीषु भ्रूविलासान् (चिल्ली) वल्लीविभ्रमान् कुटिलतायतत्वाभ्यां तदनुकारः। हन्त खेदे एकस्थं एकस्मिन् तिष्ठति एकस्थं क्वचिदपि पदार्थे सादृश्यं साम्यं नास्ति न विद्यते। यतस्तदेकैकावयवशोभाभाजां जङ्गमभावानां न कश्चिदपि रूपसामस्त्येन भवतीमनुहरति यमालोक्य मनाक् मनसि (!) लाभसुखं यावत् दुर्लभम्। विध्युपालम्भव्याजेन निजजायां अनुरागोत्पादनाय स्तौति इति तात्पर्यार्थः। अत्रोपमा।

विरहदायिदैवोपालम्भव्याजेन वल्लभायाः स्वखेदं निवेदयन्नाह।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया—
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः॥ १०२॥

(c) अस्रै° D. लिप्यते of V. not supported by Comm.

[शिलायां धातूनां रागैः त्वां प्रणयेन कुपितां आलिख्य यावद् आत्मानं ते चरणपतितं कर्तुं इच्छामि, तावद् मुहुः उपचितैः अस्रैः मे दृष्टिः आलुप्यते. तस्मिन् अपि क्रूरः कृतान्तः नौ संगमं न सहते.

With mineral colours I draw you on a rock furious with love's anger and as I am thinking of representing myself as fallen down at your feet, an ever-increasing torrent of tears robs me of my sight. Cruel fate will not brook our union even here.]

त्वामालिख्य प्रणयकुपितामित्यादि। त्वां भवतीं आलिख्य लिखित्वा प्रणयकुपितां प्रेम्णा क्रुद्धां धातुरागैः गैरिकादिवर्णैः शिलायां दृषदि। आत्मानं

निजाकारं ते तव चरणपतितं प्रसादयितुं पादप्रणतं। यावत् इति कालमान-
कथनं। इच्छामि कर्तुं विधातुम्। अस्रैः अश्रुभिः तावत् तस्मिन्नेव क्षणे त्वत्सा-
दृश्यदर्शनेन उद्बुद्धस्य मे मम उत्कलितान्तःकरणतया मुहुः वारंवारं उप-
चितैः प्रवृद्धैः दृष्टिः दृक् आलुप्यते प्रच्छाद्यते। रूपग्रहणे प्रभुर्न भवति इत्यर्थः।
मे मम। क्रूरः विषमः तस्मिन् आलेख्येऽपि संभावनायां न सहते न क्षमते
संयोगं नौ आवयोः कृतान्तो विधिः। अत्र त्वदङ्गसंगमे दग्धविधिरेव अप-
राद्धो न पुनः अस्मिन्नप्रीतिः इति प्रेयसीं आश्वासयति। अत्र प्रेयः।

विरहदशाविसंस्थुलाचेष्टितशोचनीयमात्मानं निवेदयन्नाह।

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ १०३ ॥

(b) सति स्व° V. (d) °ष्वस्रु° of V. not supported by Comm.

[स्वप्नस्य संदर्शनेषु कथमपि मया लब्धायाः ते निर्दयः आश्लेषः तस्य हेतोः आकाशे प्रणिहितौ भुजौ यस्य तादृशं मां पश्यन्तीनां स्थल्याः देवतानां मुक्ताः इव स्थूलाः अश्रूणां लेशाः तरूणां किसलयेषु बहुशः न खलु पतन्ति (इति) न.

The goddesses of the mountain plateaus very often shed tears as big as pearls on the tender foliage of trees when they see me throwing up my arms in the air for the purpose of mercilessly embracing you, recovered with difficulty in a dream experience.]

मामाकाश इत्यादि। मामाकाशे शून्ये एव प्रणिहितौ प्रसारितौ भुजौ यस्य तादृग् तं। निर्दयाश्लेषहेतोः निबिडालिङ्गननिमित्तं लब्धायाः प्राप्तायाः ते तव कथमपि दैववशात् मया कर्त्रा स्वप्नसंदर्शनेषु स्वप्नज्ञाने संदर्शनानि दर्शनानि तेषु। बहुवचनेन प्रातिनिशं पश्यामीति प्रकाशयति। पश्यन्तीनां विलोकयन्तीनां खलु निश्चयेन बहुशो अनेकशः स्थलीदेवतानां वनवसुंधराधिवासिदेवतानाम्। मुक्ता मुक्ताफल स्थूलाः (तत्सदृशीः?) तरुकिशलयेषु पादप-

पल्लवेषु तासां तरुशिखरास्पदत्वात् अश्रुलेशाः बाष्पलवाः न न पतन्ति अपि तु पतन्ति भ्रश्यन्ते च। द्वौ नञौ प्रकृतमर्थं गमयतः इति। यतो दुःखितं जनं दृष्ट्वा तद्दुःखदुःखिताः दयालवो रुदन्ति। अतो मामेवं अगाधदुःखवारिनिमग्नं विलोक्य करुणावत्यो वनदेवता अपि विपिनपादपदललक्ष्यमाणानि प्रतिक्षणं अश्रुजलानि विसृजन्ति। अत्र प्रेयस्वत्।

प्रियाप्रमोदाय प्रणयोपचारं विरचयन्नाह।

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १०४ ॥

(d) पूर्वस्पृष्टं of V. not supported by Comm.

[गुणवति, देवदारुद्रुमाणां किसलयानां पुटान् सद्यः भित्वा तस्य क्षीरस्य स्रुतिभिः सुरभयः, दक्षिणेन प्रवृत्ताः ये तुषारमयस्य अद्रेः वाताः, ते मया 'यदि किल तव अङ्गं एभिः पूर्वं स्पृष्टं भवेत्?' इति आलिङ्ग्यन्ते.

I embrace, virtuous one, the winds blowing from the Himalaya, which, after causing the buds of the pine leaves to burst forth and rendered fragrant by the flow of their milk, have proceeded in a southerly direction, in the hope that they may have touched your body before.]

भित्त्वा सद्य इत्यादि। भित्त्वा विदार्य सद्यः तत्क्षणं किशलयपुटान् देवदारुद्रुमाणां सुरदारुनाम्नां अनोकहानां ये तुषाराद्रिवाताः तुहिनगिरिमरुतः। किंभूताः। तत्क्षीरस्रुतिसुरभयः तेषां क्षीरं निष्यन्दः तस्य स्रुतिः स्रवणं तया सुरभयः सुगन्धयः दक्षिणेन दक्षिणदिग्विभागेन प्रवृत्ताः प्रसृताः ते मयालिङ्ग्यन्ते परिरभ्यन्ते। गुणवती तस्याः संबोधनम्। किमर्थं तदालिङ्गनं इत्याह। पूर्वं प्रथमं स्पृष्टं आलिङ्गितं किल यदिपदं संभावनायां भवेत् स्यात् अङ्गं वपुः कदाचित् एभिः मरुद्भिः तव भवत्या इति हेतौ। अत्र एकदिक-

सहसंभाव्यमाने (?) तदङ्गसंगमानां अनिलानां आलिङ्गनं संबद्धसंबन्धादपि मामाप्याययेदिति भणितं भवति । अत्र प्रेयस्वत् ।

प्रियाविरहदशादुस्तरौ निशावासरौ निरूपयन्नाह ।

संक्षिप्यन्ते क्षण इव कथं दीर्घयामास्त्रियामाः
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ १०५ ॥

(a) संक्षिप्येरत् V. संक्षिप्येत. J. D. M. °मा त्रियामा J. D. M.

[चटुले नयने यस्याः तादृशि, दीर्घाः यामाः यासां एवंविधाः त्रियामाः कथं क्षणः इव संक्षिप्यन्ते, सर्वासु अवस्थासु अहः अपि कथं मन्दमन्दः आतपः यस्य एवंविधं स्यात्, इत्थं दुर्लभा प्रार्थना यस्य एवंविधं मे चेतः गाढः ऊष्मा यासां ताभिः तव वियोगस्य व्यथाभिः अविद्यमानं शरणं यस्य एवंविधं कृतम्.

'How could the long nights be shortened so as to resemble a moment, and how would the day have a very soft sunshine in all vicissitudes of weather?'— entertaining impossible wishes like these, my mind has been rendered, quick-eyed one, helpless by agonies of separation which cause a severe scorching pain.]

संक्षिप्यन्ते इत्यादि । हे चटुलनयने चञ्चललोचने मम चेतः चित्तं अशरणं अनालम्बं त्वद्वियोगव्यथाभिः भवद्विरहवेदनाभिः । किंभूताभिः । गाढोष्माभिः गाढो निबिडः ऊष्मा तापः यासां तास्तथोक्ताः ताभिः । अन्नन्ताद् बहुव्रीहे र्डाज-न्तस्य स्त्रियां ऊष्मा (पा. ४।१।१२,१३)। ताभिः दुर्लभप्रार्थनं दुर्लभं दुष्प्रापं प्रार्थयति दुर्लभप्रार्थनं नन्द्यादेर्ल्युरिति (पा. ३।१।१३४) कर्तरि युप्र-त्ययः । कृतं विहितं । इत्थं अनेन प्रकारेण । तथा हि त्रियामा यामिन्यः । की-दृश्यः । दीर्घयामाः दीर्घाः आयामवन्तो यामाः प्रहराः यासां ताः तथाभूताः । आक्षेपे । क्षण इव निमेष इव संक्षिप्यन्ते इति कर्मकर्तरि । क्षिप्रं क्षीयन्ते । यतो विरहिणां निर्विनोदत्वात् मनसः कालकलापि कल्पशतायते ततः क्षपा-

संक्षेपं प्रार्थयन्ते। तथा सर्वावस्थासु ग्रीष्ममध्याह्नादिदशासु अहरपि दिनमपि मन्दमन्दातपं मृदुतरतनुतापं स्यात् भवेत्। तदा हि दाहातिरेकः खरतरतरणिकिरणपातात् संपद्यत इति संतापोपशमाय तन्मार्दवं अभिवाञ्छति। अत्र प्रेयस्वत्।

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १०६ ॥

(a) न त्वा° D. M. °न्नात्मना नावलम्बे J. V. D. (b) नितरां J. D. M. (c) कस्यैकान्तं J. M.

[ननु बहु विगणयन् आत्मना एव आत्मानं अवलम्बे. कल्याणि, तत् त्वं अपि कातरत्वं सुतरां मा गमः. अत्यन्तं सुखं, एकान्ततो दुःखं वा, कस्य उपनतम्? दशा चक्रस्य नेमेः क्रमेण नीचैः उपरि च गच्छति.

I do indeed reflect much and support myself by myself, and therefore, O auspicious one, do not feel very nervous about me. To whose lot has unadulterated happiness fallen, or unadulterated misery? For life's course has its ups and downs and herein follows the rotations of the circumference of a wheel.]

इत्यात्मानमित्यादि (?)। ननु अभिमुखीकरणे। अहमात्मानं बहु यथा भवति एवं विगणयन् पर्यालोचयन् आत्मनैव स्वयमेव अवलम्बे धारयामि ततः तस्मात् त्वमपि कल्याणि क्षेमभागिनि सुतरां अतिशयेन मा गमः प्रियतमे मा यासीः कातरत्वमधैर्यं आत्मानं आत्मनैव संस्थापय। यस्मात् कस्य संसारिणः सुखं निर्वृतिः अत्यन्तं अविच्छिन्नं उपनतं उपस्थितं दुःखं पीडा वा एकान्ततो नियमतः। अमुमेवार्थं अर्थान्तरन्यासदृष्टान्तेन द्रढयति। कदा कदाचित् नीचैः अधस्ताद् गच्छति व्रजति कदा कदाचिच्च ऊर्ध्वम्। दशा कालकृतावस्था। अत्र निदर्शनमाह। कथं। चक्रनेमिक्रमेण चक्रस्य रथाङ्गस्य यथा नेमिः बाह्यधारा तस्याः क्रमः परिपाटी तेन। अस्यायमर्थः। यथा चक्र-

धारोपरि वर्तमाना सैव उपरि वल्गति सैव क्षणेन अधः प्रयाति तद्वत् दशापि सुखदुःखानुभाविका भविनां एकरूपैव न भवति सुखदुःखयोः अनियतवृत्तित्वात्। तथा चोक्तम्। सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च। पर्यायतः सर्वमिह स्पृशन्ति तस्माद्धीरो न प्रहृष्येन्न शोचेत्॥ (महाभा.)। अर्थान्तरन्यासनिदर्शयोः संसृष्टिः अलंकृतिः। तथा च। अर्थान्तरे प्रवृत्तेन किंचित्तत्सदृशं फलम्। सदसद्वा निदर्श्येत यदि स्यात् तन्निदर्शनम्। (दण्डी, २.३४८)

विरहदहनतप्तां कान्तां आश्वासयन्नाह।

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु॥ १०७॥

(a) मासानन्यान् J. V. D. (c) विरहगणितं D. M. तमेवाभि° J.

[शार्ङ्गं पाणौ यस्य तस्मिन् भुजगस्य शयनाद् उत्थिते (सति) मे शापस्य अन्तः, शेषान् चतुरः मासान् लोचने मीलयित्वा गमय. पश्चाद् आवां विरहेण गुणितं तं तं आत्मनः अभिलाषं परिणतायाः शरदः चन्द्रिका यासां तादृशीषु क्षपासु निर्वेक्ष्यावः.'

My curse comes to an end when Viṣṇu rises from his bed of the cobra, S'eṣa. Pass the remaining four months with eyes shut (to all other considerations). After that, in the nights with the fuller moon-light of autumn, we shall gratify all possible heart's desires, multiplied as they have been by our separation.]

शापान्तो मे भुजेत्यादि। शापस्य उक्तलक्षणस्य अन्तो अवसानं मे मम भविष्यति इति संबन्धः। कदा। भुजगशयनात् भोगिशयनीयात् इति प्रस्थानकथनं। उत्थिते उद्बुद्धे इति कार्यप्रभृतिनिरूपणम्। शार्ङ्गपाणौ चक्रपाणौ इति विक्रमातिशयकरेणाभिधानेन शर(सार ?)निरूपणम्। अष्टौ परिगता मासाः। शेषान् अवशिष्टान्मासान् संवत्सरावयवान् गमय अतिवाहय। कति। चतुरः चतुःसंख्यावच्छिन्नान् नय। त्वमपि नयने लोचने मीलयित्वा निमील्य।

लोकोक्तिरियं दुःखानुभवसूचिका। पश्चाद् अनन्तरं संयोगे सति आवां त्वं च अहं च विरहगुणितं वियोगाभ्यस्तं तं तं तत्कालोल्लिखितं आत्माभिलाषं सं कामं निर्वेक्ष्यावः उपभोक्ष्यावहे। कदा। क्षपासु क्षणदासु। कीदृशीषु। परिणतशरच्चन्द्रिकासु परिणता प्रौढिं गता शरच्चन्द्रिका घनान्तसमयज्योत्स्ना यासु। एतेन उद्दीनपनविभावलाभसंभावनया वल्लभाया भाविसंयोगाख्यानं न दुःखं उत्खनाति। अत्र प्रेयस्वत्।

पूर्वानुभूतार्थाभिज्ञानेन प्रियायाः प्रत्ययं उत्पादयन्नाह।

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥ १०८ ॥

(a) त्वमसि J. D. (b) सस्वनं of V. not supported by Comm.

[भूयः च आह, 'त्वं अपि पुरा मे कण्ठे लग्ना शयने निद्रां गत्वा किमपि स्वरेण सहितं (यथा तथा) रुदती विप्रबुद्धा. असकृत् च पृच्छतः मे अन्तः हासेन सहितं (यथा तथा) त्वया कथितम्, 'कितव, कां अपि रमयन् त्वं मया स्वप्ने दृष्टः' इति.

This is what he has to say further : 'Sleeping in bed in close embrace with me, you (once) woke up crying aloud for no apparent cause ; and when I questioned you again and again, you replied with a smile : you rogue, in my sleep I saw you dallying with some woman.]

भूयश्चाहेत्यादि। स तव प्रियः प्रत्याययितुं भूयः पुनरपि इदमाह। पुरा पूर्वं अहं त्वमपि तल्पे शयने सुप्तौ। तत्रभवती मे मम कण्ठलग्ना कृतालिङ्गना निद्रां गत्वा स्वप्नमवाप्य किमपि निमित्तमासाद्य सस्वरं सशब्दं रुदती बाष्पं मुञ्चन्ती (वि)प्रबुद्धा जागरिता। ततो रोदननिदानं असकृद् अनवरतं पृच्छतो जिज्ञासोः च आनन्तर्यं त्वया भवत्या सान्तर्हासं गूढं हसित्वा मे मह्यं कथितं निवेदितं। हे कितव धूर्त कामपि कामिनीं रमयन् रममाणः स्वप्ने स्वप्नज्ञाने

दृष्टो विलोकितो मया अतो ईदृक् कोपात् अरोदं। इति वचनं अभिज्ञानम्।
अत्र रसवत्।

कालान्तराविनाशिनीं आत्मप्रीतिं प्रियायाः प्रतिपादयन्नाह।

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ १०९ ॥

(c) विरहह्रा° V. तेऽप्यभो° J. ते त्वभो° M.

[असिते नयने यस्याः तादृशि, एतस्मात् अभिज्ञानस्य दानात् मां कुशलिनं विदित्वा कौलीनात् मयि अविश्वासिनी मा भूः. स्नेहान् विरहे ह्रासिनः किमपि आहुः. ते हि अभोगात् इष्टे वस्तुनि उपचितो रसो येषां तादृशाः (सन्तः) प्रेमराशीभवन्ति.'

From this token, know me to be well and do not lose faith in me, oh black-eyed one, on account of scandalous reports. They say, without any reason absolutely, that love wears away in separation. Verily its zest for the object of desire increases by not being used and it grows into a solid mass of affection. ']

एतस्मान् मां इत्यादि। एतस्मात् अभिहिताभिज्ञानज्ञानदानात् चिह्ननिवेदनात् कुशलिनं कल्याणिनं मां विदित्वा ज्ञात्वा तस्य किल कालान्तरगतप्रीतेः अपरनारीसंगमः संभाव्यत इति कौलीनात् जनप्रवादात् असितनयने मेचकलोचने मयि मद्विषये प्रणयिनि अविश्वासिनी निष्प्रत्यया मा भूः अविश्वासं मा कृथाः। यथा त्वयि मम प्रीतिः तथा स्वमेव प्रमाणं इति कौलीनमेवोन्मीलयति। स्नेहान्प्रणयान् आहुः ब्रुवते विरहे वियोगे सति ह्रासिनः क्षयिणः। तथा चोक्तं। दुर्मन्त्रान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनात्। विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्। मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात्। स्त्री मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनम्॥ १॥ तच्च किमपि यत्किंचित् अविचारितरमणीयमित्यर्थः।

ते स्नेहा हि यस्माद् भोगात् उपभोगात् असेवयेत्यर्थः । इष्टे समीहिते वस्तुनि पदार्थे उपचितरसाः प्रवर्धिताभिलाषाः प्रेमराशीभवन्ति प्राग् अवियोगदशायां अतथाभूत्वा प्रेमराशीभवन्ति । च्विप्रत्ययः । प्रत्युत अधिकप्रीतिमया संपद्यन्ते । यदि वा स्निह्यन्ते अनुरज्यन्ते प्राणिन इति ते स्नेहाः विषयाः स्रग्वनिताचन्दनादयः । ते हि स्फुटं इष्टे वस्तुनि । अर्थवशात् विभक्तिपरिणामः । इष्टस्य अभिमतवस्तुनः प्रमदादिपदार्थस्य विरहे वियोगे सति भुक्त्वा नोपभुज्यन्ते अपभोगाद् हेतोः किमपि अध्यवसायाधिकं सानुरागाः सन्तः प्रेमराशीभवन्ति सहस्रगुणप्रमाणाः संभवन्ति । स्वभावः खल्वेष विषयाणां अप्राप्तानुभोगात् (कुर्यात् अमी विषयिणीं ?) अधिकतरामेव रुचिं उत्पादयन्ति । संप्रति तु तव विप्रयोगे विषयान्तरमपि मया न सेव्यते । किमुत वनितान्तरं । अतः व्यलीकलोकवादात् मयि मा शङ्कां कार्षीः । इति स्वप्रीतिं द्रढयन् प्रियतमां प्रत्याययति । अत्राक्षेपः ।

पुण्यजनः पयोदं संदेशप्रार्थनं अभ्युपगमयितुं आह ।

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्याख्यातुं न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११० ॥

(a) सौम्म V. (b) प्रत्यादेशात् J. D. M. तर्कयामि of V. not supported by Comm.

[सौम्य, इदं मे बन्धोः कृत्यं त्वया व्यवसितं कच्चित् ? भवतः धीरतां प्रत्याख्यातुं न खलु कल्पयामि. याचितः (सन्) निःशब्दोऽपि चातकेभ्यः जलं प्रदिशसि. प्रणयिषु हि ईप्सितस्य अर्थस्य क्रिया एव सतां प्रत्युक्तम्.

Gentle friend, have you made up your mind to render me this friendly service ? I cannot certainly regard your silence as being due to a refusal. You give water to the Cātakas without a word when they ask

...t of you. The good reply to those that make requests by fulfilling the desired object.]

कच्चित्सौम्य इत्यादि। कच्चित् अभीष्टप्रश्ने। हे सौम्य दर्शनीय। किमिदं संदेशप्रापणलक्षणं मित्रकृत्यं सुहृदः कार्यं मे मम संबन्धि त्वया भवता व्यवसितं कर्तुमङ्गीकृतम्। प्रत्याख्यातुं निराकर्तुं धीरतां तूष्णीभावं भवतः तव खलु स्फुटं न कल्पयामि। (समर्थितमेव तदेव?)। वक्त्रभिप्रायस्य वचनलिङ्गत्वात् अभ्युपगमवचनाभावे कथमभ्युपगतमिति चेत् तदर्थमाह। निःशब्दोऽपि निर्वचनोऽपि प्रदिशसि वितरसि जलं जीवनं याचितः प्रार्थितः चातकेभ्यः सारङ्गेभ्यः। बहुवचनेन व्याप्तिः प्रतिपाद्यते। हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु प्रत्युक्तं प्रतिवचनं ईप्सितार्थक्रियैव अभीष्टार्थसंपादनमेव। महान्तो हि कामनाकरणेन ब्रुवते न वचसा। अत्र अनुमानार्थान्तरन्यासयोः संसृष्टिः।

कृतोपकारं वारिदं आशीर्भिः अभिनन्दयन्नाह।

> एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
> सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
> इष्टान्देशान्विचर जलद प्रावृषा संभृतश्री-
> र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ १११ ॥

(a) °चितं प्रार्थनादारम° J. M. (c) °शान्जलद विचर M. (d) सत्ये for च ते J.

[जलद, सौहार्दाद् वा विधुरः इति अनुक्रोशस्य बुद्ध्या वा न उचितं प्रार्थनाया वर्त्म यस्य एतादृशस्य मे एतत् प्रियं कृत्वा, प्रावृषा संभृता श्रीः यस्य तादृशः (त्वं) इष्टान् देशान् विचर, एवं च क्षणमपि ते विद्युता विप्रयोगः मा भूत्.

I am not used to (the path of) begging a favour. After doing me this good turn, be it out of friendship or out of compassion for me, seeing that I am suffering, ramble over any countries you like, oh cloud, in the fulness of the glory of the rains, and may you be

never separated, as I am, even for a moment, from your (beloved) lightning.]

एतत्कृत्वा प्रियमित्यादि । एतत् सन्देशप्रापणलक्षणं प्रियं इष्टं कृत्वा विधाय मे मम । कीदृशस्य । अनुचितप्रार्थनावर्त्मनो दिव्यानुभावात्समस्तवाञ्छितवस्तुत्वात् अननुरूपयाञ्चामार्गस्य जलद पयोद सौहार्दात् मित्रभावाद्वा विधुरो दुःखितोऽयं इति वा मम विषये अनुक्रोशबुद्ध्या कृपाधिया वा त्वया महदुपकृतमिति इष्टान् वाञ्छितान् देशान्विषयान् विचर विहर । कीदृशः सन् । संभृतश्रीः उपचितलक्ष्मीकः प्रावृषा वर्षाभिः । मा(स्म?)भूत् मा स्म भवत् । क्षणमपि मुहूर्तमपि ते तव विद्युता तडिता प्रियया वियोगो । यथा मम इति दृष्टान्तस्य आशीर्विषयं (? °यत्व) आत्मनो मानयतीति । अत्रोर्जस्विसमुच्चयदृष्टान्तानां संकरः । तथा च । यत्रैकत्रानेकं वस्तु परं स्यात्सुखावहाद्येव । ज्ञेयः समुच्चयोऽसौ त्रेधान्यः सदसतोर्योगः ॥ (रुद्रट. ७·१९) । आशीर्वचनं अभिलषिते वस्तुनि आशंसनम् ॥ श्रीः ।

उद्भासिताखिलपदामिह मेघदूते काव्ये प्रवृद्धरसबन्धुरभावभाजि ।
सज्जीभवद्गुणकथां स्थिरदेवनामा टीकामिमामकृत कीर्तिमिव प्रसन्नां ॥१॥

आरोहन्ति पतत्रिणोऽपि निकटप्रस्थे तथोच्चुङ्गतां
जानीते पुनरस्य मन्दरगिरेर्मूर्धाध्वनीनो रविः ।
भूयांसो रचयन्ति वाचमुचितव्युत्पत्तिसारां गिरं
ग्रथ्नाति स्थिरदेव एव हि कविर्वागर्थवीथीगुरुः ॥ २ ॥

इति सरस्वतीशृङ्गारहारापरनाम्नो महाकवेः स्थिरदेवस्य कृतिर्मेघदूतमहाकाव्यस्य टीकेयं समाप्ता ॥ *

---

* After this follows the usual statement by the scribe:
आविधातृविधृतात्मबुद्धिभिर्यो गिरामविषयोऽपि योगिराट् ।
गोमतीतटमुकुन्दमूर्तिभा-गोमतीतगुण एष गीयते । १ । श्रीरस्तु ।
संवत् १५२१ वर्षे श्रावण शुदि ७ बुधे अद्येह वीरमग्रामे राणश्रीवाघविजयराज्ये मोढज्ञातीयपण्डितकीकासुतलालाकेन लघुभ्रातृणामध्ययनाय मेघदूताभिधानमहाकाव्यस्य टीकेयं लिखिता । यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ श्रीः ॥

Appendix

The five versions, J. S. V. D. and M.

An attempt has been made in the prceding pages to give not only the text of the Meghadūta aaccording to Sthiradeva (S.), but to have a conspectus of the readings of S. and four other principal versions of the poem, viz. those of Jinasena (J.) in the Pars'vābhyudaya (Edn. Pathak, variants noted by Hultzsch), Vallabhadeva (V.) (Edn. Hultzsch), Dakṣiṇāmūrtinātha (D.) (Edn. Triv. S. S. by T. Ganapati Sastri) and Mallinātha (M.) (Edn. Nandargikar). The respective dates of these versions have been discussed in the Introduction. In referring to S. V. &c. we shall be referring to the editions as well as to the commentators, or in the case of J., the poet.

M.'s text of the Meghadūta contains 121 stanzas, including 5 stanzas which he declares to be interpolated. D.'s text contains 110 stanzas, besides 5 on which there is no commentary. J.'s text contains 120 verses; the text of S. contains 112. These are all found in M.'s text. V.'s text contains 111 st., plus one which is not included in M.'s text and which has been given in the Appendix by Hultzsch.

Order of the stanzas in the different versions.

The numbered stanzas in S. V. and D. are all regarded by us as genuine. Supposing the stanzas in J. and M. are renumbered after dropping what are regarded by us as additional stanzas, we shall be in a position to compare the order of the stanzas in each version.

We might adopt the name पूर्वमेघ for St. 1–63 and उत्तरमेघ for 64–111.

In the पूर्वमेघ, with the exception of St. 9–12 the order is the same for all. For 9–11 the distribution is as follows:

	S. V.	D. M.	J.
आपृच्छस्व	9	12	12
मन्दं मन्दं	10	9	10
तां चावश्यं	11	10	9
कर्तुं यच्च	12	11	11

In the उत्तरमेघ the order for St. 64–85 and 92–111 is the same for all except J. with the following exceptions.

	S. V.	D. M.
यत्र स्त्रीणां	67	69
नेत्रा नीता	68	68
नीवीबन्धो'	69	67

The order of J. for the first eighteen verses of the उत्तरमेघ is: 1, 4, 5, 2, 7, 6, 3, 8, 11, 15–18, 12–14; while in 92-111 J. interchanges st. 104 and 105.

Stanzas 85–91 are variously arranged in the different varsions as will be seen from the following:

	S.	V.	J.D.	M.
आद्ये बद्धा	1	1	4	5
आधिक्षामां	2	3	2	2
निःश्वासेना°	3	4	3	4
पादानिन्दो°	4	5	5	3
जाने सख्या°	5	6	7	7
सव्यापारा°	6	2	1	1
सा संन्यस्ता°	7	7	6	6

Thus, leaving aside J., the only passages where there is a difference of arrangement among S., V., D. and M. observable are 9–12, 67–69 and 85–91. S. and V. differ only in the place they assign to सव्यापारा.

Authentic and Spurious Stanzas.

Stanzas may be added in a text deliberately or by marginally written stanzas having been incorporated in the text. Commentators, on the other hand, do not deliberately suppress a stanza. Scribes may drop lines, but not a whole stanza, especially when the stanza is long and there is no ostensible ground for haplology. On comparing different versions of a poem, the shortest version is, therefore, prima facie, more entitled to credence than an inflated one. When two mss. from two different provinces of India agree in dropping a stanza, there is practically a certainty that it is not genuine. When S., V. and D., therefore, give short versions of 112 and 110 stanzas, we have to accept only the stanzas common to them to be genuine. D., however, does not drop st. 70 altogether. It gives the stanza but does not give a commentary on it. We require some proof for saying that the commentator knew mss. where the stanza was absent, and, if possible, there must be corroboration coming from another province. Additional verse No. 1, which appears in V, has been declared as suspicious by V. himself and additional verse No. 3 which appears in S., was declared to be an interpolation by contemporaries of S. and does not appear in V. and D. Further, the latter comes in a place where the यक्ष has no connection whatever. These two stanzas, therefore, have been omitted from the text.

Additional Stanza No. 1.

There is a difficulty about the st. अश्वक्लान्त &c. Why should an interpolator write a stanza which contains practically the same thoughts as a genuine one, which contains even some improvements on it? V., knowing it to be a cruder version of 17, has commented on it. It is written in Kalidasa's style. I suspect it to be the st. originally composed by K., of which he gave an impro-

well version later. The first version managed to survive for some centuries and then disappeared from the current text altogether. The main difference between st. 17 and add. st. 1 is that while in the latter the mountain obliges the cloud and the cloud returns the obligation, in the former the cloud has already obliged the mountain and the cloud is asked to be a guest of one who is sure to receive him hospitably.

Additional Stanzas:

Our text presumes 111 stanzas to be genuine. In order to present a complete conspectus of the five versions, we give below all the remaining stanzas from J., V. and M. together with a statement of the places where they have been inserted in the different versions, the numbering of the verses being as in S.

---

(१) अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सत्कारार्द्रः फलति नचिरेणोपकारो महत्सु ॥

J. after 17.—(a)° मांश्रित्रकूट°, (d) सद्भावार्द्रः.

[जलद, सानुमान् आम्रकूटः अध्वना क्लान्तं प्रतिमुखं गतं त्वां तुङ्गेन शिरसा श्लाघमानः वक्ष्यति. त्वं अपि तस्य नैदाघं अग्निं आसारेण शमयेः. सत्कारेण आर्द्रः महत्सु उपकारः न चिरेण फलति.

The mountain Āmrakūṭa (Citrakūṭa), oh cloud, honouring you, will bear you on his lofty head, when you approach in his direction, fatigued by your journey. You, on your side, should quench any summer fire on it with your heavy shower. Obligation conferred on the great, tempered (moistened) with respect,

bears fruit without delay.]

(२) अम्भोबिन्दुग्रहणचतुरांश्चातकान्वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥

(b) M., after 21.— (d) सोत्कण्ठानि.

[अम्भसः बिन्दूनां ग्रहणे चतुरान् चातकान् वीक्षमाणाः, श्रेणीभूताः बलाकाः परिगणनया निर्दिशन्तः सिद्धाः, स्तनितस्य समये, उत्कम्पेन सहितानि प्रियाणां सहचरीणां संभ्रमेण आलिङ्गितानि आसाद्य त्वां मानयिष्यन्ति.

The Siddhas, while looking on the skill of the Cātakas in picking up rain-drops and stating an (accurate) calculation of the number of the cranes going in flights, will very much appreciate you when they receive the hurried and tremulous embraces of their beloved companions at the time when you thunder.]

(३) हारांस्तारां° – Printed in the text on p. 43 after St. 34.

(४) प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥

J. M., after 31.

[यत्र अभिज्ञो जनः ‘ अत्र वत्सानां राजा प्रद्योतस्य प्रियां दुहितरं जह्रे, अत्र तस्य एव राज्ञः हैमं तालद्रुमाणां वनं अभूत्, अत्र किल नलगिरिः दर्पात् स्तम्भं उत्पाट्य उद्भ्रान्तः ’ इति आगन्तून् रमयति.

'Here did the king of the Vatsas carry off the beloved daughter of Pradyota,' 'here was the wood of golden palmyras of the same king,' 'here (the elephant) Nalagiri rooted out his tying post in the insolence (of his '*mada*') and ran wild,'—thus do the knowing people there delight the visitors.]

(५) पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥

J., after 68; M., after 31.— (a) शष्पश्यामा (b) °न्तः पयोदाः.

[यत्र पत्रं इव श्यामाः, दिनकरस्य हयैः स्पर्धिनः वाहाः; शैलवद् उदग्राः, त्वं इव प्रभेदात् वृष्टिमन्तः करिणः; संयुगे दशमुखं प्रतिगतं (यथा स्यात्तथा) तस्थिवांसः चन्द्रहासस्य व्रणानां अङ्कैः प्रत्यादिष्टा आभरणानां रुक् यैः तादृशाः योधानां अग्रण्यः (सन्ति).

There the horses, dark like foliage, vie with the chargers of the sun, as the mountain-high elephants pouring forth showers (of ichor), due to the bursting out of their temples, with you; the great warriors there, having stood ready for battle against Rāvaṇa, throw into the shade the splendour of ornaments by the scars left by the wounds inflicted by the Candrahāsa (Rāvaṇa's sword).]

(६) यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥

J. after 70; M. after 65.— (a) यत्रासन्न°; °रतिकराः (b) °रसना (d) ज्योत्स्नाः प्र°.

[यत्र उन्मत्तैः भ्रमरैः मुखराः पादपाः नित्यं पुष्पं येषां तथाविधाः (सन्ति); हंसानां श्रेणीभिः रचिता रशना यासां तादृश्यः नलिन्यः, नित्यं पद्मानि यासां तथाविधाः (सन्ति); केकाभिः उच्चैः कण्ठाः येषां ते भवनसंबन्धिनः शिखिनः नित्यं भास्वान् कलापः येषां तादृशाः (सन्ति); प्रदोषाः नित्यं ज्योत्स्नया प्रतिहता तमसः वृत्तिः अत एव रम्याः (सन्ति).

There, the trees have eternal flowers, and resound with (the humming of) intoxicated bees ; the lotus-creepers bear lotuses all the year round and flights of swans form their (tinkling) girdles ; the domestic peacocks with their full-throated cries have a plumage of lasting lustre ; and the evenings counteract all activity of darkness with their perennial moonlight.]

(७) आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यत्र प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न खलु च वयो यौवनादन्यदस्ति ॥

J. after 70; M. after 65.— (c) °न्यस्मात्प्र° (d) न च खलु

[यत्र नयनसंबन्धि सलिलं आनन्देन उत्थं, न अन्यैः निमित्तैः; कुसुमशरात् जायते असौ तादृशात् इष्टेन संयोगः तेन साध्यात् तापात् न अन्यः (तापः); प्रणयस्य कलहात् अन्यत्र विप्रयोगस्य उपपत्तिः न अपि; वित्तेशानां यौवनात् अन्यत् न च खलु वयः अस्ति.

There, tears arise out of joy, not any other cause ; there is no other fever except that of love, and it is curable by union with the beloved person ; there is no possibility of a separation except in love-quarrels, and the Yakṣas have no other age of life but youth.]

(८) मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥

J. after 68; M. after 66.—(a) पयसि शि° (b) णां तटवनरु°.

[यत्र अमरैः प्रार्थिताः कन्याः मन्दाकिन्याः सलिलेन शिशिरैः मरुद्भिः सेव्यमानाः, अनुतटं रोहन्ति तादृशानां मन्दाराणां छायया वारितं उष्णं यासां तादृश्यः, कनकमयीषु सिकतासु मुष्टेः निक्षेपेण गूढैः अन्वेष्टव्यैः मणिभिः संक्रीडन्ते.

There, girls, wooed by gods, play with jewels, which are hidden under the golden sands with closed hands and are then to be found out, waited upon by breezes cooled by the heavenly Ganges, the sun being kept off from them by the shade of the Mandāras that grow on each ridge.]

(९) अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥

J. after 68; M. after 67.—(a) अक्षीणान्त° (d) मध्वापानं;

[यत्र प्रत्यहं (अहनि अहनि) अक्षय्यः अन्तर्भवनसंबन्धी निधिः येषां तादृशाः, विबुधानां वनिताः एव वारमुख्याः ताः सहायाः येषां तादृशाः, बद्धः आलापः यैः तादृशाः, कामिनः, धनपतेः यशः उद्गायद्भिः, रक्तः कण्ठः येषां तादृशैः किंनरैः सार्धं, वैभ्राजं आख्या यस्य तत् बहिः (स्थितं) उपवनं निर्विशन्ति.

There, the Yaksha gallants, in possession of an inexhaustible family treasure, go daily to the outside

park called Vaibhrāja, accompanied by the divine courtezans and sweet-voiced Kinnaras, singing forth the glory of Kubera, and enjoy it, holding conversation with each other.]

(१०) वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पम् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥

J. after 68; M. after 71.—(a) वासः क्षौमं (b) विकल्पान् (c, d) यस्मिन्नेकः.

[यस्यां एकः कल्पवृक्षः, चित्रं वासः, नयनयोः विभ्रमस्य आदेशे दक्षं मधु, किसलयैः सह पुष्पाणां उद्भेदं, भूषणानां विकल्पं, चरणौ एव कमले तयोः न्यासस्य योग्यं लाक्षायाः रागं,—सकलं अबलामण्डनं सूते.

The fancy garment, the wine that diligently imparts sportive grace to the eyes, bunches of flowers with sprouting leaves, a variety of ornaments, the red paint of the lac, worthy of being applied to the lotus-like feet,—every ornament of a woman is (in fact) there yielded by the Kalpa-tree alone.]

(११) आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥

J. M. after 109.— (a) °स्यैनां; °रहादुग्र°, °रहे शोकदष्टां (b) °मादद्रेर्वि° (c) साभिज्ञानं: प्रहितवचनैस्तत्र दत्तैर्ममापि (d) धारयेदम्, etc.

[एवं प्रथमेन विरहेण उदग्रः शोकः यस्याः एतादृशीं ते सखीं

आश्वास्य, त्रिनयनस्य वृषेण उत्खाताः कूटाः यस्य तादृशात् शैलात् आशु निवृत्तः (सन्), अभिज्ञानेन सहितं (यथा स्यात्तथा) प्रहितैः कुशलैश्च तस्याः वचोभिः प्रातःसंबन्धिनं कुन्दस्य प्रसवं इव शिथिलं मम अपि जीवितं धारयेथाः॥

Having thus reassured your friend (my wife) in the midst of her overwhelming grief in her first parting (from her husband), and returning from the mountain of which the summits have been dug up by S'iva's bull, revive my life also, drooping like the morning Kunda flower, with a message from her, in which news of her health is sent with a confirmatory token.]

NOTES

The title of the poem is to be explained by Pāṇ 4. 3. 87 धिकृत्य कृते ग्रन्थे with वा० लुबाख्यायिकाभ्यो बहुलम् : मेघश्चासौ दूतश्च दूतः त अधिकृत्य कृतं काव्यं मेघदूतम्. Another title, viz. मेघसंदेशः current in southern India and Ceylon. D. is right in saying that the idea of the poem was suggested to K. by the ām. to which, indeed, there is an express reference in st. 97. n the other hand, judging from भामह I. 42, several poems ding in दूत must have been composed as early as the 6th ntury and possibly even before the मेघदूत. The message, oreover, occupies a small part of the poem. Kalidāsa mself divides his poem consciously into two parts, the मार्ग cupies the bulk and the संदेश comes last (st. 13).

A problem has been raised by S. and followed up by veral commentators as to whether Me. is a महाकाव्य or a डकाव्य. S. mentions it as a क्रीडाकाव्य and strenuously urges claims for being styled a महाकाव्य, on the ground that it ls the conditions of a महाकाव्य. V. supports this by saying t although some features of a महाकाव्य are absent from Me. annot be a खण्डकाव्य if it is otherwise a महाकाव्य and says at it is a केलिकाव्य. Later commentators like S. say that hough it does not come under the definition of a महाकाव्य, it ne because it has been composed by a महाकवि. M. holds it be a महाकाव्य, advancing the same argument as S.

1. स्वाधिकारप्रमत्तः D. says that the comp. is not easily decible, as it cannot be a पञ्चमीतत्पुरुष: and the case-relation t be that of पञ्चमी as the root प्रमद् governs the abl. प्रमत्त = अदक्ष and therefore सप्तमीतत्पुरुष is possible. If the ding originally had been स्वाधिकारात्प्रमत्तः there was no on why it should have been changed to स्वाधिकारप्रमत्तः. The

harder reading has a presumption of genuineness in its favour. It is not necessary to know how the Yakṣa failed in his duty; but commentators have exercised their ingenuity. S. says that the Yakṣa, loath to leave his bed early in the morning, plucked lotuses overnight for the morning S'iva-worship of Kubera, so that a bee hidden in a lotus-bud bit Kubera, who thereupon cursed him. This same explanation has been repeated by सारो० शापः महिमानं अस्तं गमयति and so is अस्तंगमितमहिमा. वर्षं यावत् भोग्यः acc. of time. वर्षभोग्येण acc. to the rule that when the second member of a compound has a guttural, the ऋ, र, ष् in the first member causes a change of न् to ण्. Why is precedence given to जनकतनया when Rāma and she were living there? S. suggests that the explanation is to be sought in the fact that the poem emphasises the शृङ्गाररस and from this point of view a woman is preferable to a man; also that Sīta's greatness is also emphasised by this preference shown to her. छायातरु is taken by M. as a synonym of the नमेरु; but it is better to understand it in a non-technical sense. Why the pl. रामगिर्याश्रमेषु? Because the Yakṣa in his restlessness was constantly changing his residence. Rāmagiri cannot be चित्रकूट as V. and M. say, but must be रामटेक near Nagpur, which contains old remains, and in other ways answers to the description in the Me. We owe the identification to Wilson and it has been supported by an inscription of प्रवरसेन II (Prof. Mirashi's कालिदास, p. 121). The metre of the poem is the मन्दाक्रान्ता, which contains seventeen syllables in a line, with the scansion – – – –, ⏑ ⏑ ⏑ ⏑ ⏑–, – ⏑ – – ⏑ – –. It is described thus: मन्दाक्रान्ता जलधि(4)षड(6)गै(7)र्मों भनौ ताद् गुरू चेत्.

2. As regards the कनकवलयभ्रंश cf. S'āk. III, कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते. आषाढस्य प्रशमदिवसे is an emendation proposed by V. on the ground that the rainy season consists of S'rāvaṇa and Bhādrapada, and that it was possible for scribes to mistake the original [illegible] for [illegible]. It is clear that

the reading in all Mss. before V. was प्रथम. As to the commencement of the rains, K. was a careful observer and he had opportunities of observing the rains at रामगिरि (Mirashi, loc. cit.). On account of the precession of the equinoxes, the seasons have advanced by 20 days since the time of K. If the rains set in now about the middle of Jyeṣṭha, they would do so in K.'s times about the beginning of Āṣāḍha. वप्रक्रीडापरिणत— वप्र rampart, earthwork; cf. वेलावप्रवलयां, रघु० १.३०. An elephant is called परिणत when he is तिर्यग्दन्तप्रहारः, when he dashes his tusks obliquely against a wall &c. The cloud appeared like such an elephant, as it was dark and huge, and was bending over the peak.

3. राजराजः, राज्ञां यक्षाणां राजा, is an epithet of कुबेर. राजन् at the end of a comp. becomes राज. केतकाधानहेतोः The Ketaka flower having love associations, the cloud would have its love-awakening influences intensified and hence this epithet. D. (not J.) observes that one would not praise this epithet much. Seventeen old commentators, as can be seen from N., give this reading. The harder reading is always to be preferred, especially when there is such a strong backing for it. After all, what is the sense yielded by कौतुकाधानहेतोः? D. कौतुकं कामविषयौत्सुक्यं, कौतुकार्पणहेतोरित्यर्थः ; M. अभिलाषोत्पादकारणस्य. The यादव and विश्व lexicons have been quoted in support. The reading therefore is only apparently simple. It raises other difficulties. मेघालोके &c.—cf. विक्रमो. IV. निर्वृतानामप्युत्कण्ठा० सुखी is one who has his wife by his side. अन्यथावृत्ति (अन्यथाभूता वृत्तिर्यस्य) having its function perturbed.

4. नभः, नभस्य, सहः, सहस्य, तपः, तपस्य, मधु, माधव, &c. are more ancient names of months than नक्षत्र names like श्रावण &c. दयिताजीवनालम्बनार्थी is the reading of D. and apparently of S. The translation is based on the reading of V. J. M. दयि...र्थी प्रवृत्तिं हारयिष्यन् wishing to convey news intended to prop up his wife's life. हारयिष्यन्— The future participle conveys a desiderative sense. The Kutaja flowers grow

in the rainy season; we do not know if the Ramtek abounds in them. हृ with वि and आ to utter, to speak; cf. the Vyāhṛtis भूः, भुवः, स्वः, also भूतार्थव्याहृतिः सा हि, रघु. १०. ३३. प्रत्यासन्ने नभसि is explained by S. also as 'when the sky approaches the earth' i. e. in the rainy season.

5. Two 'Kva's show incompatibility; cf. क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः, रघु. १.२. संदेशार्थ; subject-matter of a message. औत्सुक्य uneasiness or yearning of love. प्रणयकृपणाः. is the reading of all older commentators. प्रकृतिकृपणः is only an apparent improvement; for, the explanation of M. स्वभावदीन is far from satisfactory. What does चेतनाचेतनेषु स्वभावदीनाः mean? M.'s ultimate meaning is अचेतनयाचकाः. Kalidāsa is used to सापेक्ष compounds like the one here: चेतनाचेतनेषु प्रणयः तस्मिन् कृपणः; cf. मरुतां आकृष्टलीलान्, रघु. ६.१; रतेः गृहीतानुनयेन, रघु. ६.२. &c.

6. पुष्करावर्तकाः clouds that cause destruction of the world. M. understands them to be two different classes. N. quotes authority for saying that they form only one class. प्रकृतिपुरुषः प्रकृतिश्चासौ पुरुषश्च. प्रकृतिः one of the seven constituents of the state: स्वाम्यमात्यौ च राष्ट्रं च कोशो दुर्गं बलं सुहृत्; here a minister. कामरूप--the cloud is called upon to assume various forms in st. 43, 57. 78. बन्धुः, a kinsman, includes the wife. याच्ञा (याच् + ना). For the idiomatic construction वरं याच्ञा etc. S. and V. both quote the Mbh. line वरं कूपशताद्वापी.

7. संतप्तानां etc. Here is a pun. A similar pun is to be found in st. 91. Vide Mr. K. L. Ogales's article on K.'s puns in महाराष्ट्रसाहित्यपत्रिका, 1928. Why has the epithet in (d) been added? S. and V. understand it as a mark by which Alakā can be recognized by the cloud. But the cloud is supposed to be able to recognise it without difficulty in st. 63. The first two lines appeal to the sense of pity of the cloud; The latter two probably appeal to his æsthetic and religious feeling. 'In accepting my mission you will not have to go

to a wretched and dirty place ; you have to go to a place like Alakā ' etc.

8. In the last st. and in st. 6, the Y. has spoken of himself as an unhappy creature. In this he refers to his lonely wife whom he cannot go back to console. In this way ll. 1 and 2 would be on a different footing from ll. 1 and 2 in st. 16. उद्गृहीता०-अलकः tresses of hair. They have been held up as they are hanging loosely ; a woman did not braid her hair when her husband was away from home on a journey. The hair were formed into a knot without being braided and this was called an एकवेणी or वेणीबन्ध; cf. Comm. on p. 38, वेणी-बन्धो विरहिणीधर्मः ; cf. also st. 85 and comm. on p. 101. विरहविधुर distressed by separation from her husband. तस्मात् etc. explains, not the peculiarity of his situation, but that of his wife's situation.

9. Is this the right place for this st. ? This was the thought prominent in the minds of critics who removed it from this place to just before st. 13, where the route is narrated. The actual position of the st. in S. and V. can be defended thus. We have to look upon st. 9-12 as a unit. The Y. has made his appeals, in his own name, in the name of his wife. Now he urges the cloud actually to start on his journey, the only preparation for it being to take leave of his kind host (st. 9). The moment is propitious for the journey and there is a guarantee of good omens on the way (st. 10). The Y. assures the cloud of the utility of the journey (st. 11) and of the presence of good company, without which the journey may prove irksome (st. 12). It may be said that the leave-taking should not be mentioned so early as this ; but it would then have to be postponed to the end of the poem and, this is more important, the leave-taking has been brought in only to urge immediate departure. There are two reasons why the leave-taking with the mountain is necessary ; it has venerable relics on

it and it is an affectionate friend. आ + प्रच्छ is A. (to take leave of). रघुपतिपदैः अङ्कितं.—Footmarks of Rāma are shown on Rāmgarrh in C. P. but it cannot be our Rāmagiri on account if its geographical position (Mirashi, p. 120). उष्णं बाष्पं मुञ्चतः— The mountain discharges hot vapours after the first showers and these are punningly spoken of as his tears of joy. भवतः संयोगं एत्य is the reading of J. and M., Construed as it is by M. it is not objectionable, but भवता is better. If, however, भवतः is connected with यस्य, it gives a bad sense, as the cloud cannot be supposed to discharge hot tears.

10. S. and V. यथा पवनः नुदति चातकश्च नदति तथा बलाकाः भवन्तं सेविष्यन्ते: i. e., from the omens in ll. 1-2 the prognostications of ll. 3-4 follow. M, following an alternative explanation of D, understands यथा in the sense of इव and this is better. N.'s objections against M.'s interpretation do not bear a scrutiny; ll. 1-2 give present omens; ll. 3-4 future ones. Kālidāsa has mentioned omens elsewhere : cf. रघु. ३. १४. पवनश्चानुकूल॰.—D. quotes a passage from वराहमिहिर about the auspiciousness of the चातक. M. अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं तद्विस्तरभयान्नालेखि. सगर्वः, the reading of S, is supported by four mss. The reading तोयगृध्नुः of V. is also mentioned by S. तोयगृध्नु—greedy of water. सगन्धः = सगर्वः acc. to M. D understands it as 'a kinsman', the चातक being entirely dependent on the cloud for his water-need. गर्भाधानस्य क्षणः may mean 'moment' or 'joy' of impregnation. According to a popular supposition the cranes are impregnated by rain-drops. V. reads गर्भाधानस्थिरपरि°.

11. अविहतगतिः is a significant epithet. Delays may be dangerous. एकपत्नीं (एकः पतिः यस्याः तां) devoted wife. The expression भ्रातृजाया establishes the cloud as Y.'s brother. सद्यःपातप्रणयि—प्रणयः is inclination; cf. आहारे कृतप्रणयः. सद्यःपातिप्रणाय is a v. l. loving and therefore prone to dissolution

याति, पतितुं शीलं यस्य. रुणाद्धि–रुध् to block, to prevent. D. reads (c) as °सदशप्राणमप्यङ्ग°.

12. शिलन्ध्र, शिलिन्ध्र, शिलीन्ध्र, सिलिन्ध्र are the different forms of the same word we come across. To these has to be added शिलिन्द्र, the reading of Hultzsch's Kashmir ms. of Māgha VI. 72. It is the name of the flower of the कन्दली, the wild plantain acc. to V. D. M. On the other hand S. and nine other commentators, quoted by N. on p. 14, take it to mean छत्रक or भूमिस्फोट, i. e. mushroom, and they all read उच्छिलीन्ध्रातपत्रां. When the reading is उ....भ्रामवन्ध्यां, the earth ceases to be barren because of the sprouting Kandali flowers, or mushrooms. प्र + भू to have power, to be able to. मानसोत्काः—S. often uses the word उत्का (f.) in the sense of उत्कलिका, yearning. पाथेयं (पथि साधु Pāṇ. 4. 4. 104) provisions for journey; cf. पाथेयमुत्सृज बिस॰, विक्रमो° 4. 15. The Haṃsas go to the Mānasa lake, which is situated between the Kailāsa and the Himālayan range, in the rainy season, which is summer there, and return to India in winter.

12. We have to take l. 2 as having been used parenthetically; cf. a similar use of the parenthesis in Megh. 84, 85, where also an independent sentence is inserted into a running clause, of which the continuity is broken by it. The breach of continuity might create confusion in the mind and may amount to a fault, but it is used rhetorically with good effect. See tr. of these stanzas. K. gives here a plan of the poem as well as the cloud's route. श्रोत्रपेयं-K. betrays here a consciousness of poetic power, which he rarely does; cf. मन्दः कवियशःप्रार्थी-रघु॰ I. 3 S. points out that the water contemplated in the route is not the water of flooded rivers, but the light water of the mountain streams; but we do find river water being mentioned and their streams also have been mentioned as attenuated. The tr. has inadvertently dropped the words परिलघु पयः स्रोतसां, 'the attenuated waters of rivers.

Let us have before us an outline of the cloud's route. He leaves the mountain रामगिरि (14), passes over Y.'s head to his north (15); passes over the country that lies to the north, climbs Māla, and after a slight detour arrives on the आम्रकूट, where he rests a little (16-18). He next covers the intervening distance and comes to the Narmadā (19-20). Passing the hilly country, full of deer and peacocks on the other side of it, he comes to the Das'ārṇas, sips water of the Vetrāvatī and rests a little on Nīcaiḥ (21-25). He next passes the Navanadī and the garden land beyond and going west in order to see Ujjayinī, he crosses the Nirvindhyā and arrives at Ujjayinī and after seeing the sights and visiting the Mahākāla temple, rests there for the night (26-38). Leaving Ujja. before morning, he crosses the Gambhīrā and passing the forests of fig-trees inhabited by elephants, he visits the Skanda temple at Devagiri (39-44). Passing the Carmaṇvatī and Das'apura, the Brahmāvarta country and the holy Kurukṣetra, he takes in the water of the Sarasvatī and next of the Ganges at Kanakhala, and rests on a Himālayan peak (45-52). He spends some time there, visiting the holy places sacred to S'iva, and passing through the Krauncarandhra he goes to Kailāsa, on the slope of which lies Alakā (53-63). The journey takes tow days; cf. S. on 89.

14. This st. marks the very first step in the journey of the cloud. The cloud is imagined to have just left the mountain. दृष्टोत्साहः etc.— The cloud is going on a friendly mission to a distant place and hence the admiration for his energy. सरसनिचुलात्—what is the use of this epithet? S. gives a highly ingenious, though not absoultely convincing explanation. The cloud will have taken leave of his host and the leave-taking between him and Y. will be just here; there must be a river near-by where the Niculas grow and a जलाश्रय is a proper place for leave-taking. दिङ्नागानां &c. Why is the plural number used here? Because, says S., there

